DHARMAKUTAM

VOL. I.

BALAKANDA

BY

TRYAMBAKARAYA MAKHI.



SRIRANGAM:
SRI VANI VILAS PRESS.
1916.
Copyright Registered.

॥ श्रीः ॥

॥ धर्माकूतम् ॥

तञ्जानगराधीशस्यैकोजिमहाराजस्य मन्त्रिणो गङ्गाधरा-
ध्वरिणः पुत्रेण शहजिशरभोजिमहीपालस्यामात्येन

त्र्यम्बकराजमखिना

विरचितम् ।

१. बालकाण्डः

श्रीरङ्गम्
श्रीवाणीविलासमुद्रायन्त्रालयः ।

PREFACE.

DHARMAKUTAM is a rare and hitherto unpublished work discovered for the first time from among the treasures of literature that lie huddled up quite unknown in the vaults of the once famous Tanjore Palace Library. The work is unique in that it consists of six dissertations in easy flowing Sanskrit style on the six kandas of the world-renowned "Ramayana" of Sage Valmiki. These lectures prove, as will be observed, in a most convincing manner that the great Valmiki wrote the Epic more to illustrate in practical life the precepts of the several Dharmasastras than to depict the life-history of Sri Rama. All the great Sages such as Vasishta, Gautama, Manu, Yâgnyavalkya and others have written Smritis to regulate the daily life of the Aryas. Probably Valmiki also wanted to follow in the wake of these eminent men and compose a Dharmasastra but he seems to have thought it better, as

pointed out in this Dharmakutam, to write out the life of one who has regularly observed the tenets of the Smritis instead of recording in the usual stereotyped way the hard and fast rules themselves. He has thus made his work not only very entertaining but has also shown by concrete example the practical applicability of the Dharmasastras. It is in this light that Dharmakutam takes up the study of Ramayana. The object of these dissertations is to convince the readers that the Ramayana is chiefly intended to inculcate a right conception of one's Dharma. Each incident therein depicted, each portrayal of character is chiefly intended to expound some one or other of the several aspects of Dharma. The lectures are all in very simple style, easily understandable by all, full of excerpts from the various Dharmasastras in justification of the intrepretations given of the Ramayana. This kind of intrepreting the Ramayana, not as a mere epic detailing the story of Rama but as an allegory teaching morals and duty, was a desideratum up to now. Further, this intrepretation appears to be the correct and proper

one to make of the Ramayana for the following among other reasons.

1. In the very beginning when the sage Valmiki questions Narada as को न्वस्मिन् etc., he desires to know of the great personage who has fully understood the Dharma and in the reply Narada speaks of Rama as रक्षिता स्वस्य धर्मस्य one who has well observed his Dharma.

2. In the Aranyakanda even Mâreechi the hater of Dharma speaks of Rama as रामो विग्रहवान्धर्मः Dharma incarnate.

3. In the Yuddhakanda the great Suka says यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते. He who does not transgress Dharma and in whom Dharma does not waver.

4. Narada speaks of Rama as चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति one who directs the four castes to remain in their respective Dharma.

5. In the Ayodhyakanda Rama speaks of himself as विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम् know me as one who like the Rishis live on Dharma alone.

6. Lakshmana in the course of his vow says धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि । पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ If Rama is really Dharma incarnate etc., let this arrow kill the son of Ravana.

6. In the Yuddhakanda Brahma addresses Rama as लोकानां त्वं परो धर्मः you are the supreme Dharma of the people.

8. In the Bhagavadgita the Lord Sri Krishna says that all the incarnations of Vishnu are made only for the purpose of firmly establishing Dharma which might have fallen low. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

Thus it will be observed that Ramayana is rightly understood only when Rama is studied as one who knows Dharma fully well, who has followed Dharma correctly and who is himself Dharma incarnate.

It may be asked why Rama of all people was chosen as the Ideal man when there were far superior beings such as Vasishta, Visvamitra and others. Dharmakutam supplies the answer These superior personages have, on occasions, transgressed the Dharmic laws but by means of their extraordinary Tapasic powers they have subsequently set themselves right. Rama was the only person who was throughout his life rigorously observant of Dharma in every act of his—so much so that Bhattacharya has stated that whatever Rama did was Dharma. Hence Valmiki took him as his hero. Even the apparently wrong acts of Rama are on scrutiny found to be quite justified in the light of the Smritis. In the Balakanda we have one such instance in the slaying of the Demoness Tadaka

To kill a woman is as everybody knows, considered a sin. The Dharmakutam adduces very sound and convincing arguments to show that Rama considered every side of the question before committing the deed and that he was perfectly within the Dharmic laws in killing that vile wretch Tadaka. As space forbids a detailed statement of this interesting discussion, the readers are referred to pages 127—134 of this remarkable volume. Another very interesting portion to which we wish to refer our readers is the discussion of the form of Rama's marriage. At first sight Rama's marriage does not appear to come under any of the recognised eight forms of orthodox marriage. But as a matter of fact it is the Prajapatya form of marriage as is clear from a perusal of pages 309—318 of this precious volume. Thus the Dharmakutam should be read in full to be appreciated at its true worth and we think we have shown enough to convince the readers that its study would be both useful and enlightening. It throws the Ramayana

in the limelight of the Smritis and thereby makes its intrinsic merit shine in all splendour.

The author of this unique work is one Tryambakarâya Makhi who, while he was young, was brought up by king Ekkoji (1676—1684 A. D.) of the Bhosala Dynasty of Tanjore. King Ekkoji had as his minister one Gangâdharâdhvari the son of Bâbâji Yajva of the Bhâradvaja family. This Gangâdharâdhvari had two sons viz., Nrisimharâya Makhi who was also a minister at the court of King Ekkoji and the author of Tripuravijayachampu and Tryambakarâyamakhi the author of this work. When King Ekkoji bequeathed his kingdom to his eldest son Shahji in the year 1684 A. D. he appointed this Tryambakarâyamakhi as his son's minister after properly training him for the post. And when Shahji was succeeded by his next brother Sharfoji in the year 1711 A. D. Tryambakarâyamakhi continued as his minister also. Our author appears to have made Swamimalai—a holy spot on the banks of the Cauvery, four miles from Kumbakonam,—his place of abode.

He seems to have performed on a grand scale with the help of his king Shahji, a yagnya in the year 1698 as is evidenced by the "Achâra Navaneeta" of Ânandaraya Makhi alias Appâ Dikshita, the son of our author's brother Nrisimharâya Makhi and by the "Râghvâbhyudaya" Nataka of Bhagavantaraya. Thus it will be seen that our author comes of a highly respectable family whose members were almost all of them great Vidvans and ministers at the Court of the Bhosala Kings of Tanjore. The manuscript also of this book was found in the Tanjore Palace Library only as stated before and its existence was first brought to our notice by our esteemed colleague Pandit S. Subrahmanya Sastry of Tanjore. When we perused the manuscript we found that the author had performed his task in a marvellously lucid manner and that the work deserved immediate publicity. We are very much indebted to Pandit S. Subrahmanya Sastri who with his usual enthusiasm towards the cause of Sanskrit literature in general and towards the publications of the Sri Vani Vilas Press in particular,

undertook the onerous task of editing this work with the help of this single manuscript that was alone available. We feel proud in having unearthed this work and brought it to light and we eagerly look forward to the completion of all the six dissertations when we might turn back with pleasure on the acquisition of a real masterpiece.

T. K. Balasubrahmanyam.




शिवधनुर्भङ्गः ॥



॥ श्रीः ॥

॥ धर्माकूतम् ॥



सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिका-
झंकारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च ।
तत्तौर्यत्रिकरीतिमेति शिरसः शश्वन्मदान्दोलनं
यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि नः ॥

तव करकमलस्थां स्फाटिकीमक्षमालां
नखरकिरणभिन्नां दाडिमीबीजबुद्ध्या ।
अनुकलमनुकर्षन्येन कीरो निरुद्धः
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥ २ ॥

प्रह्लादोक्ति यथार्थां लघु चिकलयिषुर्निर्गतः स्तम्भगर्भा-
द्वज्रादुग्रैर्नखाग्रैर्झटिति विदलयन्दैत्यराजस्य वक्षः ।
दुर्धर्षक्रोधवेगः कलशजलनिधेः कन्यकां वीक्ष्य हृष्ट-
स्तुष्टूषुब्रह्मरुद्रप्रमुखसुरनतः पातु मां श्रीनृसिंहः ॥ ३ ॥

कालिन्द्याकाशसिन्धुव्यतिकरमतिकृद्विग्रहश्रीतरङ्गं
हाराहीन्द्रादितत्तत्समुचितरुचिरालंक्रियालंकृताङ्गम् ।
निर्यन्नालिङ्गनोद्यन्निरवधिपरमानन्दभोगैकसान्द्रं
द्वन्द्वं चन्द्रावतंसं वितरतु शिवयोरूर्जितं मङ्गलं नः ॥

शाखाभिः प्रथितोऽपि सन्विजयते यः पल्लवानाश्रयो
यः सूते पुरुषार्थजातमचिरात्कालं च नापेक्षते ।

सन्तो यत्र नमन्ति चोच्छ्रितफलावाप्त्यै स विश्वोन्नतो
यज्ञेशाद्भुतकल्पकः फलतु मे वाञ्छानुरूपं फलम् ॥ ५ ॥

शश्वत्पार्श्वे वसन्त्योः सरसिरुहदृशोः सादरं देवसेना-
वल्ल्योः संनद्धपुष्पस्तबकनिभकुचाभोगविन्यस्तहस्तः ।
वक्त्रेष्वन्येषु तर्षस्फुरदधरपुटेष्वाननाभ्यामुभाभ्या-
माजिघ्रन्मुग्धहासं मुखकमलयुगं पातु नः कार्त्तिकेयः ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

यः प्रौढरामाभिरतोऽप्यरक्तो वाचंयमोऽप्यद्भुतवाग्विलासः ।
वल्मीकभूरप्यभुजंगसङ्गस्तं भावये सत्कविसार्वभौमम् ॥ ८ ॥

वेदान्ते ये गुरवो विहितविधानेषु ये च मे गुरवः ।
आद्या प्रणतिस्तेषामक्षरमात्रे गुरूणां च ॥ ९ ॥

अस्ति स्यन्दनहस्तिघोटकघटासंकीर्णशृङ्गाटका
गुप्ता वीरभटैर्गभीरपरिखा चोलेषु तञ्जापुरी ।
यत्सौधाञ्चलसंचलद्ध्वजपटीसंचारितैर्मारुतैः
शान्तश्रान्ति निरन्तरं प्रियतमैः क्रीडन्ति सिद्धाङ्गनाः ॥

तत्रासीच्चतुरम्बुराशिरशनासंशोभमानां भुवं
भुञ्जानः स्वयमेक एव सकलक्ष्मापालचूडामणिः ।
गाम्भीर्यादिगुणैरनन्यसुलभैः श्रीरामचन्द्रोपमः
श्रीमानेकमहीपतिः कृतमहाराष्ट्राधिपत्योच्छ्रयः ॥ ११ ॥

प्रतापे चण्डांशुः प्रमदजनने शीतकिरणः
प्रदाने कल्पद्रुः परिणतसदुक्तौ सुरगुरुः ।
प्रभुत्वे देवेन्द्रः प्रबलरिपुभङ्गे रघुपतिः
प्रतीतः कल्याणैः स जयति गुणैरेकनृपतिः ॥ १२ ॥

तस्य श्रीरिव शार्ङ्गिणः पशुपतेर्गौरीव जम्भद्विषः
पौलोमीव सुदक्षिणेव जगतां जेतुर्दिलीपप्रभोः ।

सद्वंशप्रभवा च पञ्चमहिषी सौशील्यतोऽरुन्धती
दीपाम्बेति भुवि श्रुता विजयते सान्द्रानुकम्पा जने ॥१३॥

सीताराघवयोश्चरित्रमखिलं येनाञ्जसा वर्णितं
येनापि प्रथमानधर्मजगुणैः श्रीरुक्मिणीकृष्णयोः ।
येन श्रीगिरिकन्यकागिरिशयोरन्यैश्च यैरीदृशां
तेषामप्यनयोर्गुणा ननु गिरां दूरे ततो मादृशाम् ॥ १४ ॥

तस्यैकोजिमहीपतेः सुचरितो मन्त्री दिगन्तश्रुतः
शक्रस्येव बृहस्पतिः शुभमतिः सर्वज्ञचूडामणिः ।
भारद्वाजकुलाब्धिशीतकिरणो बाबाजियज्वात्मजो
मन्त्रस्तम्भितदुष्टभूपभुजगो गङ्गाधराख्योऽध्वरी ॥ १५ ॥

वाग्देवी वदनं दया च नयनं दोःस्तम्भमोजस्विता
क्षान्तिर्मानसमाश्रिता शमदमप्रष्ठैः सहान्यैर्गुणैः ।
इत्यङ्गेषु यथायथं बलवदाक्रान्तेषु सौजन्यतः
कीर्त्तिर्यस्य दिगन्तरे विहरति स्वैरं सुधांशूज्ज्वला ॥ १६ ॥

धर्मक्रियाणां विषये प्रमाणं यदीयमाचारमुदाहरन्ति ।
मनस्विनां यस्य च दर्शनानि निरुत्तरां निष्कृतिमाहुरार्याः ॥

अजस्रमेकोजिमहीवलारेरमात्यधुर्यत्वमुपाश्रितेन ।
प्रत्याहृतासीत्प्रथितैरुपायैर्येनैव तज्ज्ञातिहृता धरित्री ॥ १८ ॥

यस्यैव बुद्धेरुचितैर्विलासैरमुष्य राज्ञः सुकृतैकभोग्या ।
कवेरकन्याजलसेकधन्या चोलावनी सेयमकारि हस्ते ॥ १९ ॥

स्थाने कृतोऽसाविह जीवितोऽसावुत्तारितोऽसावमुनेति वादैः ।
अजातशत्रुत्वमभूदमुष्य प्रसिद्धमा सेतुहिमाचलाभ्याम् ॥२०॥

तस्यैकोजिमहीपतेस्त्रिजगतीदोर्गर्वसर्वंकषाः
पुत्राः सच्चरितास्त्रयः समभवञ्श्रीशाहराजादयः ।
सौभ्रात्रातिशयेन दाशरथिभिस्तुल्याः प्रजारञ्जनै-
र्हर्षोत्कर्षमकार्षुरादृतजनास्ते वृद्धसेवापराः ॥ २१ ॥

अथ सकलकलासु प्रौढिमाढौकमानाः
सपदि समवृधंस्ते सच्चरित्राः कुमाराः ।

अनुपममनुकूलं वीक्ष्य दाम्पत्ययोगं
त्रय इव पुरुषार्थाः संगता मूर्तिमन्तः ॥ २२ ॥

तत्राग्रजः शाहजिभूमिपालः
सर्वासु विद्यासु विनीतबुद्धिः ।
आनन्दकारी जगतोऽखिलस्य
पितुर्भरं स स्वयमग्रहीष्ट ॥ २३ ॥

डिल्लीशोपद्रवेण स्वपदविचलितो यः शिवोजेस्तनूजो
राजारामः स येन स्वपुरमुपगतो रक्षितस्तत्क्षणेन ।
भाग्यैरिन्द्रोपभोग्यैः पुनरपि महति स्थापितः स्वाधिराज्ये
भ्रातृस्नेहे रघूणां पतिरपि न समो यस्य शुद्धाशयस्य ॥

रक्षित्वा सेतुनाथं शरणमुपगतं पाण्ड्यराजात्तगन्धं
दीपाम्बाहस्ततोऽपि व्यरचयत तुलादीनि दानानि सेतौ ।
यस्तीरे सह्यजाया निरुपधिधरणीभूषणैः सर्वमान्या-
न्विद्वद्वर्त्रैः प्रयत्नाद्दिशि दिशि विदितैरग्रहारानतानीत् ॥

धर्मस्थेम्नि युधिष्ठिरो भुजबले भीमः प्रतापेऽर्जुनः
शान्तौ शान्तनवः शुचौ गिरि हरिश्चन्द्रः सुकीर्त्तौ नलः ।
कारुण्ये रघुपुंगवो वितरणे कर्णो विवेके मनु-
र्विज्ञाने जनकश्च शाहजिनृपः सोऽयं गुणानां निधिः ॥

श्रीगङ्गाधरमन्त्रिणोऽपि तनयौ कृष्णाम्बिकागर्भजा-
वेकक्ष्मापतिना कृतावभवतां तातादिकारे स्थिरे ।
शाहेन्द्रेण च सानुजेन सततं ज्येष्ठानुवृत्त्यादृतौ
श्रुत्युक्ताखिलनित्यकर्मकरणश्रद्धाविशुद्धान्तरौ ॥ २७ ॥

ज्येष्ठस्तयोर्जन्मगुणोन्नतिभ्यां
प्रियः प्रकृत्या पितुरोजसा च ।
अभूदसामान्यचरित्रयोगा-
दन्वर्थनामा नरसिंहयज्वा ॥ २८ ॥

यत्र स्वपुत्रादपि शाहभूपा-
दरञ्यत प्रत्यहमेकभूपः ।

यश्च स्वतातादपि तत्र रक्तो
धुरं तदीयामवहन्नियुक्तः ॥ २९ ॥

प्रसादवानादृतबन्धुवर्गः
स्थिरस्वभावः स्थितिमानभिज्ञः ।
अगर्हिताचारशुभान्तरङ्गो
निबर्हिताभ्यन्तरशत्रुवर्गः ॥ ३० ॥

सत्येन जिह्वां प्रशमेन चेतो
मुखं प्रसादेन दृशौ दयाभिः ।
दानेन हस्तौ च तपोभिरङ्गा-
न्यलञ्चासनो यस्य चिरादकार्षीत् ॥ ३१ ॥

तस्यानुजन्मा तरुणाग्निहोत्री
तस्यैव वात्सल्यवतः प्रभावात् ।
समुल्लसल्लौकिकवैदिकश्रीः
समीरितस्त्र्यम्बकनामधेयः ॥ ३२ ॥

एकोजिप्रभुणा गुणान्तरविदा देव्या च दीपाम्बया
बाल्ये यः परिगृह्य वत्सलतया संवर्धितः सादरम् ।
बुद्धीरप्युपदिश्य शाहजिमहीनेतुः स्वसूनोः स्थिरे
सोऽयं मन्त्रिपदे त्रियम्बकमखी स्वातन्त्र्यमासादितः ॥

भ्राता शाहमहीपतेः शरभजी राजाथ शास्ति क्षितिं
विश्वानन्दविधायिभिर्गुणगणैरावर्जयन्विष्टपम् ।
वृत्तीर्ब्रह्महिताय शाहजिमहाराजार्पिताः पालय-
न्नाधिक्येन सदादृतद्विजवराशीर्वर्धितप्राभवः ॥ ३४ ॥

नित्यं वर्षति वासवो जनपदामोदाय वृष्टिं हितां
कावेरीसलिलैश्च चोलधरणी स्वच्छन्दमाप्लाव्यते ।
यस्मिन्राज्यमिदं प्रशासति निराबाधं जगन्मोदते
सोऽयं श्रीशरभक्षितीन्दुरवनीपालो विजेजीयते ॥ ३५ ॥

सोऽयं ज्येष्ठपुरस्क्रियोपचरितं यं मन्त्रिवर्यं दया-
नावा प्राणमहार्णवादुदधरद्दाक्षिण्यशाली नृपः ।

वृत्तिं चाकृत यस्य सह्यगिरिजाकूलेऽनुकूले श्रुति-
स्मृत्युक्ताखिलनित्यकर्मसु वसुत्यागाय भोगाय च ॥ ३६ ॥

यः कौमारिलतन्त्रतः समतनोत्कर्मस्थितिं पावनीं
ब्रह्मोपादिशदादिशोकधुतये यो नारदाय स्फुटम् ।
तं स्कन्दं परिचर्य साधु परया भक्त्या तदाप्तुं मह-
त्कर्मब्रह्मफलं सुधीः कलयते यः स्वामिशैले स्थितिम् ॥

स एव श्रीकीर्त्तिप्रबलविलसद्बोसलकुल-
क्षमापालैः प्रेम्णा विधृतवचनस्त्र्यम्बकमखी ।
अभिप्रायं धर्मे विशदयति वाल्मीकिवचसा-
मिदं प्रेक्षावन्तः सरसमभिनन्दन्तु दयया ॥ ३८ ॥

कृतिरियं सकलश्रुतिसंमता
स्मृतिपुराणवचोभिरलंकृता ।
प्रणिहितेन हृदा परिपश्यतां
भवति तत्परमार्थनिदर्शनी ॥ ३९ ॥

श्रीमता महर्षिणा वाल्मीकिना श्रीमद्रामचरितं काव्यरूपेण निबद्धम्। तच्च काव्यं व्याख्यातृभिरप्रसिद्धपदार्थकेन दुरन्वयव्यवहितान्वययोरन्वयप्रदर्शनेनापरिपूर्णस्थले अध्याहारकल्पनेन विरोधसमाधानेन च शिवविष्ण्वादिपरत्वेन च व्याख्यातम्। तत्र कैरपि धर्मे तात्पर्यं न स्पष्टीकृतमिति तत्प्रतिपाद्यते। ननु धर्मे तात्पर्यप्रतिपादनमनुपपन्नं रामयणे सर्वत्र रामचरितस्यैव वर्णिततया धर्मतात्पर्ये प्रमाणाभावादिति चेन्न; 'को न्वस्मिन्–' इति प्रश्ने धर्मज्ञत्वविशिष्टस्यैव महापुरुषस्यावगमेन, उत्तरवाक्ये 'रक्षिता स्वस्य धर्मस्य' इति धर्मसंरक्षकत्वप्रतिपादनेन, आरण्यकाण्डे 'रामो विग्रहवान्धर्मः' इति रामस्य धर्मस्वरूपत्वप्रतिपादकधर्मद्वेषिमारीचवाक्येन, 'यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते' इति युद्धकाण्डे शुकवाक्येन, 'चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति' इति नारदवाक्येन, अयोध्याकाण्डे 'विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम्' इति रामवाक्येन 'धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि। पौरुषे चाप्र-

तिद्वन्द्वः शत्रुं जहि रावणिम्' इति धर्मस्वरूपत्वप्रतिपादकशपथरूपलक्ष्मणवाक्येन, युद्धकाण्डे 'लोकानां त्वं परो धर्मः' इति ब्रह्मवचनेन, 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति सर्वेषां विष्णववताराणां दुष्टनिग्रहशिष्टपरिपालनपूर्वकं धर्मप्रतिष्ठापकत्वप्रतिपादकगीतास्थभगवद्वचनेन च धर्मज्ञत्वधर्मानुष्ठातृत्वधर्मस्वरूपत्वविशिष्टस्यैव रामस्य चरितं वर्णितमित्यवगम्यते । तच्च धर्म ऐदंपर्यमन्तरा अनुपपन्नमिति धर्मतात्पर्यप्रतिपादनमुपपन्नम् । अत एव भट्टाचार्यैरुक्तम्— 'रामवद्वर्तितव्यं स धर्मः, रावणवन्न वर्तितव्यं सोऽधर्मः' इति । किं च 'पुण्यं वेदैश्च संमितम्' 'वेदोपबृंहणार्थाय तावग्राहयत प्रभुः' इति वचनाभ्यां वेदोपबृंहकत्वं वेदसंमितत्वं चावगतम् । वेदश्च 'वेदोऽखिलो धर्ममूलम्' 'वेदो धर्ममूलम्' इत्यादिवचनैर्धर्मप्रतिपादकोऽवगतः । तादृशवेदोपबृंहकत्वं तत्संमितत्वं च धर्मतात्पर्यमन्तरानुपपन्नमेवेति यु-

क्तमेव धर्मतात्पर्यप्रतिपादनम् । धर्मश्चालौकिकः श्रेयः-साधनम् । 'चोदनालक्षणोऽर्थो धर्मः' इति तु जैमिनिः । आपस्तम्बाचार्यास्तु— 'यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यद्गर्हन्ते सोऽधर्मः' इति । एतादृशे धर्मे प्रमाणं चतुर्विधम्– श्रुतिः स्मृतिः सदाचारः सतामात्मनस्तुष्टिरिति । तथा च मनुः— 'वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्' इति । गौतमोऽपि—'वेदो धर्ममूलं तद्विदां च स्मृतिशीले' इति । अत्र शीलपदेन सदाचारवाचिना सन्मनस्तुष्टिरपि लक्ष्यते । आपस्तम्बोऽपि— 'धर्मज्ञसमयः प्रमाणं वेदाश्च' इति । धर्मज्ञसमय इत्यनेन स्मृतिः सदाचारः आत्मनस्तुष्टिरिति त्रयमपि लक्ष्यते । तथा चोक्तन्यायेन धर्मलक्षणानां सर्वमतेनापि चातुर्विध्यं सिद्धम् । नैतेषां धर्मे तुल्यवत्प्रामाण्यम्; अपि तर्हि वेद एव स्वतन्त्रप्रमाणम्, तदनु स्मृतिः, तत आचारः, तत आत्मनस्तुष्टिरिति । तत्प्रकारश्च वेदे धर्मो यादृशः प्रतिपादितस्तादृश एव ऋषिभिर्विद्यमानाः शाखाः पर्यालोच्य उच्छिन्नशाखाः-

र्थांश्च स्मृत्वा देशकालाधिकार्यवस्थाभेदेन वर्णाश्रमादि-भेदेन च व्यवस्थया स्मृतिषूपनिबद्धः । देशभेदे तावद्बो-धायनः— 'पञ्चधा विप्रतिपत्तिः, दक्षिणतस्तथोत्तरतः, यानि दक्षिणतस्तानि व्याख्यास्यामो यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्व-सृदुहितृगमनमिति; अथोत्तरत ऊर्णाविक्रयः शीधुपान-मुभयतोदद्भिर्व्यवहारः आयुधीयकं समुद्रयानमिति, तदि-तरदितरस्मिन्कुर्वन्दुष्यतीतरदितरस्मिन्देशे प्रमाणमेव स्या-त्' इति । कालभेदे विष्णुपुराणम्— 'यत्कृते दशभि-र्वर्षैस्त्रेतायां हायनेन तत् । द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ ॥ तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजः । प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम्' इति । अधिकारिभेदे 'यस्य त्रैवार्षिकं वित्तं स सोमं पातुमर्हति । प्राक्सौमिकीः क्रियाः कुर्याद्यस्य स्याद्वार्षिकं धनम् । सर्व-संस्थाधिकारी स्यादाहिताग्निर्धने सति । आदध्यान्नि-र्धनोऽप्यग्नीन्नित्यं पापभयाद्द्विजः' इति मनुः । अवस्थाभेदे-ऽपि मनुः— 'चतुर्थमायुषो भागमुषित्वायं गुरौ द्विजः ।

द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥ गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्। वनेषु तु विहृत्यैवं तृतीयं भागमायुषः। चतुर्थमायुषो भागं सङ्गं त्यक्त्वा परिव्रजेत्' इति। वर्णभेदे— 'ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्। वैश्यस्य च तपो वार्त्ता तपः शूद्रस्य सेवनम्' इति मनुः। आश्रमभेदे 'तस्याश्रमविकल्पमेके ब्रुवते, ब्रह्मचारी गृहस्थो भिक्षुर्वैखानसः, तेषां गृहस्थो योनिरप्रजननत्वादितरेषाम्; तत्रोक्तं ब्रह्मचारिण आचार्याधीनत्वमनिचयो भिक्षुर्वैखानसो वने मूलफलाशी गृहस्थः सदृशीं भार्यां विन्देत' इति गौतमः। एते धर्मा मनुनापि संगृहीताः— 'वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च। वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह' इत्येवंप्रकारेण। स्मृतयो वेदानुसारिण्यः। तथा च कालिदासः— 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' इति। स्मृत्यनन्तरं महतामाचारः प्रमाणम्, तत्संदेहे व्यवस्थापकत्वात्। तदुक्तम्— 'अर्थोऽपि नैकः स्मृतयो विभिन्ना नैको मुनिर्यस्य मतं प्रमाणम्। धर्मस्य

तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः' इति । महतामप्याचारसंशये आत्मनस्तुष्टिः प्रमाणत्वेन प्रतिपादिता— 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तः-करणप्रवृत्तयः' इति । एवं वेदोक्त एव धर्मः त्रिभिः प्रमाणैः प्रपञ्च्यत इति सिद्धम् । तदाहुर्बोधायनाचार्याः— 'उपदिष्टो धर्मः प्रतिवेदम्, तस्यानुव्याख्यास्यामः, स्मार्तो द्वितीयः, तृतीयः शिष्टागमः' इति । अत्र वेदः प्रथमं प्रमाणं स्मृतिर्द्वितीयं प्रमाणं शिष्टाचारस्तृतीयं प्रमाण-मित्यर्थः । प्रथमत्वद्वितीयत्ववर्णनं श्रुतिस्मृत्योर्विरोधे श्रु-तिर्बलीयसीत्येतदर्थम् । तथा च श्रुतिस्मृत्योर्विरोधे स्मृत्यर्थं परित्यज्य श्रुत्यर्थ एव ग्राह्यः । तथा चापस्तम्बा-चार्याः— 'विप्रतिषेधे श्रुतिलक्षणं बलीयः' इति । एवं स्मृत्याचारयोर्विरोधे आचारापेक्षया स्मृतिर्बलीयसी । तथा च कात्यायनः— 'स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत् । तथैव लौकिकाचारं स्मृतिबाधात्परित्यजेत्' इति । एतदर्थमेव तृतीयः शिष्टागम इत्युक्तम् । एतेषु चतुर्षु प्रमाणेषु धर्मे वेद एव श्रेष्ठं प्रमाणमिति स्थितम् ।

स वेदः सम्यग्येनाभ्यस्यते स तु सत्पुरुषो मन्वादिः ऋषिश्च। तेन वेदार्थं संगृह्य यदुच्यते सा स्मृतिः। तथा च बोधायनाचार्याः— 'धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः। क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः' इति। तस्य धर्मबुद्ध्या यदनुष्ठानं स सदाचारः। तस्य धर्मविकल्पे एकत्र मनसो या प्रीतिः सा सन्मनस्तुष्टिः। एवं स्थिते भगवान्वाल्मीकिरपि धर्मनिरूपणार्थं प्रवृत्तः। नियोगरूपेण धर्मप्रतिपादनं स्मृतिरेव भविष्यति। स्मृतयस्तु बहुभिः प्रणीताः। आचारलक्षणो धर्मः एकपुरुषधौरेयचरितमधिकृत्य एकस्मिन्ग्रन्थे कृत्स्नशः केनापि न प्रतिपादितः। सदाचारस्य तु श्रुतिस्मृतिषु संशये संशयितार्थनिर्णायकत्वेन प्राबल्यम्। तथा च श्रुतिः— वेदमनूच्य' इत्यादिना 'संविदा देयम्' इत्यन्तेन शिष्यं विशिष्यानुशिष्य 'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः संमर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः' इति। आपस्तम्बोऽपि— 'न धर्माधर्मौ

चरत आवं स्व इति, न देवगन्धर्वा न पितर इत्याचक्षते-ऽयं धर्मोऽयमधर्म इति, यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः यद्गर्हन्ते सोऽधर्मः, सर्वजनपदेष्वेकान्तसमाहित-मार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलु-पानामदाम्भिकानां वृत्तसादृश्यं भजेत' इति। स तु सदा-चारः श्रुतिस्मृतीतिहासपुराणादिष्वेकैको विशकलित-तया तेन तेनाचरितः तेन तेन तत्तत्फलं प्राप्तमिति प्रति-पादितः। एकस्य पुरुषस्य कृत्स्नं चरित्रमाख्यायिकारू-पेण क्रमेण क्वापि न प्रतिपादितम्। तत्तु कस्यचित्पुरुष-धौरेयस्य समग्रधर्मानुष्ठानकर्तुश्चरित्रमेकेन निबन्धेन कर्त-व्यम्, तेन सर्वोऽपि सदाचारः प्रदर्शनीय इत्यभिसंधाय लोकोपकाराय रघुवरचरितं काव्यरूपेण कृतवान्। तत्र श्रीरामचरित्रवर्णनेन सदाचारलक्षणो धर्मः तात्पर्येण प्रति-पादितः। ननु काव्ये असद्वस्तुनिरूपणं समीचीनव-स्तुनोऽसत्त्वप्रतिपादनम् असद्वस्तुनः सद्वस्तुत्वेन प्रति-पादनम् अर्थवादबाहुल्यम् 'काव्यालापांश्च वर्जयेत्' इति निषेधश्चेत्येवमादिदोषे स्थिते धर्माधर्मविवेचनं कथं का-

व्यरूपेण क्रियत इति चेत्; निषेधस्य असत्कृतासन्नायक-प्रतिपादकाधर्मप्रतिपादकप्राकृतकाव्यविषयत्वात् महाक-विभिः काव्यानि सन्नायकप्रतिपादकानि धर्मप्रधानानि पुरुषार्थसाधकानि कृतानि सद्भिः परिगृहीतानि च। अत एव च कालिदासकृतकाव्यानामपि स्मृतित्वेन महतामङ्गी-कारः। तथा च भट्टाचार्यैः 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः, इति कालिदासस्मृतेः' इत्युक्तम्। तस्मान्महद्भिः कृतानां काव्यानां धर्मप्राधान्येन स्मृतितुल्य-ता सिद्धा। श्रुतिस्मृत्यर्थ एव काव्येन प्रतिपादितो हृदयर-ञ्जकः। तदुक्तं प्राचीनैः—'वेदे यदुच्यते सा राजाज्ञा, स्मृ-तिषु ऋषिभिर्यदुच्यते स मित्रोपदेशः, काव्ये यदुच्यते स कान्तासंमितोपदेशः' इति। उक्तं च— 'यद्वेदात्प्रभुसं-मितादधिगतं शब्दप्रधानाच्चिरं यच्चार्थप्रवणात्पुराणकथ-नादिष्टं सुहृत्संमितात्। कान्तासंमितया यया सरस-तामापाद्य काव्यश्रिया कर्तव्ये कुतुकी बुधो विरचित-स्तस्यै स्पृहां कुर्महे' 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासंमिततयो-

पदेशयुजे' इति। एवं स्थिते महर्षिणा वाल्मीकिना परमपुरुषस्य पुण्यश्लोकस्य चरितवर्णनं देवर्षिनारदोपदेशेन ब्रह्मणो वरप्रदानेन च धर्मप्राधान्येन वेदोपबृंहकत्वेन परमपुरुषार्थसाधकत्वेन च कृतं स्मृतितुल्यमित्यविवादम्। तादृशचरितवर्णनाय लोकोत्तरगुणं महापुरुषं पृच्छति— तपःस्वाध्यायनिरतमित्यादिना ॥

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम्॥

अत्र नारदस्य चत्वारि विशेषणानि। तत्र तपोनिरत इत्यनेन विशेषणेन सर्वसामर्थ्यं प्रतिपादितम्। तथा च मनुः— 'यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम्। तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्' इति। स्वाध्यायनिरत इत्यनेन यत्किंचिद्वदति तद्वेदोक्तधर्मानुगुणतयैव वदतीति सूचितम्। वाग्विदां वरमित्यनेन वक्तृत्वं प्रतिपादितम्। मुनिपुंगवमित्यनेन अतीन्द्रियाभिज्ञत्वं सूचितम्। अग्रे त्रिलोकज्ञ इत्यनेन विशेषणेन लोकत्रयसंचारेण प्रत्यक्षतया सदसद्वस्त्वभिज्ञत्वं प्रदर्शितम्। एतैर्विशेषणैः सर्व-

गुणसमष्टिमत्त्वं सर्वज्ञत्वं सर्वजनमान्यत्वं सर्वोत्कृष्टमाहात्म्यं च सूचितम्। एतादृशं नारदं भगवान्वाल्मीकिः सर्वगुणसमष्टिरूपं पुरुषम्,

को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥

चारित्रेण च को युक्तः सर्वभूतेषु को हितः।
विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः॥

आत्मवान्को जितक्रोधो द्युतिमान्कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे॥

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्॥

इति पृष्टवान्। तस्य सर्वगुणसमष्टिरूपः परमपुरुषः

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।

इत्याद्युत्तरवाक्येन श्रीरामस्वामी नारदेनोक्तः। ननु देवपितृब्रह्मर्षिराजर्षियक्षदैत्यनागसुपर्णादिषु महाप्रभावशालिष्ववस्थितेषु श्रीराम एव किमर्थं प्रतिपादित इति चेत्;

तैस्तैर्वसिष्ठविश्वामित्रादिभिः स्वकीयसामर्थ्यानुगुणतया धर्मव्यतिक्रमः कृतः । तथा चाह कात्यायनः— 'दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम्, तेषां तेजोविशेषेण प्रत्यवायो न विद्यते, तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः' इति । अतस्तेषां सर्वोऽप्याचारो धर्मत्वेन न ग्राह्यः । श्रीरामस्वामी तु सामर्थ्ययुक्तोऽपि क्लेशमनुभवन्धर्मव्यतिक्रममकृत्वैव धर्मानुगुणतयानुष्ठानं कृतवान् । तथैव अन्येनापि बलवता धर्मव्यतिक्रमो न कर्तव्यः । तथा च महाभारते आरण्यके युधिष्ठिरं प्रति मार्कण्डेयवचनम्— 'तवापदं त्वय्यसमीक्ष्य रामं सत्यव्रतं दाशरथिं स्मरामि । स चापि राजा सह लक्ष्मणेन वने निवासं पितुरेव शासनात् ॥ धन्वी चरन्पार्थ मयैव दृष्टो गिरेः पुरा ऋश्यमूकस्य सानौ । स चापि शक्रस्य समप्रभावो महानुभावः समरेष्वजेयः ॥ विहाय भोगानचरद्वनेषु नेशे बलस्येति चरेदधर्मम्' इति । अतः अयमेव महापुरुषः सदाचारलक्षणार्थमुपात्तः । तस्याचारस्तु सदाचारत्वेन सर्वैरप्यङ्गीकृतः । तस्यैव महापुरुषस्य गुणाश्चरित्रं च सूत्रप्रायेण

आ सर्गसमाप्तेः नारदेन वाल्मीकिं प्रत्युपदिष्टम् । तन्मनसि धृत्वा अग्रे वाल्मीकिरालोचनापूर्वकं सविस्तरं ब्रह्मणो वरप्रदानेन चरितवर्णनं द्वितीयसर्गादि कृतवान् ॥

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः ।
पूजयामास धर्मात्मा सहशिष्यो महामुनिः ॥

अत्र धर्मात्मा महामुनिः इति विशेषणद्वयेन कर्तुः सत्पुरुषत्वमुक्तम् ॥

विचचार ह पश्यंस्तत्सर्वतो विपुलं वनम् ।
तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ॥

ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिस्वनम् ।
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ॥

जघान [illegible] निषादस्तस्य पश्यतः ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥

ततः करुणवेदित्वाद्धर्मोऽयमिति द्विजः ।
निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

तस्यैवं ब्रुवताश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥

चिन्तयन्स महाप्राज्ञश्चकार मतिमान्मतिम् ।
शिष्यं चैवाब्रवीद्वाक्यमिदं स मुनिपुंगवः ॥

पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥

पूर्वं पादबद्धाक्षरः श्लोको न स्थितः । श्रीरामस्वामिचरितवर्णनं पादबद्धाक्षरश्लोकैर्वाल्मीकिना कारयितव्यमिति भगवतश्चतुर्मुखस्य च्छन्दात् शोकनिमित्तेन पादबद्धाक्षरः श्लोको वाल्मीकेर्वदनारविन्दान्निःसृतः । एतदारभ्य च्छन्दोबद्धानि काव्यानि जातानि । अनेन रामायणस्यादिकाव्यत्वं वाल्मीकिरपि सर्वेषां कवीनां मार्गदर्शीति च सूचितम् ॥

आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुंगवम् ॥

वाल्मीकिरपि तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
प्राञ्जलिः प्रणतो भूत्वा तस्थौ परमविस्मितः ॥

प्रणम्य विधिवच्चैनं पृष्ट्वानामयमव्ययः ।

अत्र ब्रह्मणः स्वयमेवागमनेन वाल्मीकेर्माहात्म्यं तपसश्च सिद्धिर्व्यक्तीकृता ॥

अथोपविश्य भगवानासने परमार्चिते ।
वाल्मीकये महर्षये संदिदेशासनं ततः ॥

ब्रह्मणा समनुज्ञातः सोऽप्युपाविशदासने ॥

अनेन ब्रह्मणा आसने अवस्थानस्याभ्यनुज्ञानात् सर्व-ऋषिभ्योऽग्रत्वम् ॥

उपविष्टे तदा तस्मिन्साक्षाल्लोकपितामहे ।
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥

पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ।
यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥

शोचन्नेव मुहुः क्रौञ्चीमुपश्लोकमिमं पुनः ।
जगावन्तर्गतमना भूत्वा शोकपरायणः ॥

तमुवाच ततो ब्रह्मा प्रहसन्मुनिपुंगवम् ।
श्लोक एव त्वया बद्धो नात्र कार्या विचारणा ॥

अनेन च्छन्दोबद्धश्लोको वाल्मीकिना कृतः । तदङ्गीकृत्य श्लोक एव नाम स्थपितम् ॥

मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ।
रामस्य चरितं सर्वं कुरु त्वमृषिसत्तम ॥

अनेन श्रीरामस्वामिचरितवर्णनं स्वयं ब्रह्मणा कर्तव्यमपि स्वाशयानुरूपेण वाल्मीकिरेव करिष्यतीति मत्वा तस्य मुखात्सरस्वतीं निःसार्य स्वयमेवागत्योपश्लाघनपूर्वकं कुर्विंत्यभ्यनुज्ञानेन भगवतो वाल्मीकेर्ब्रह्मावतारत्वं सूचितम् ॥

धर्मात्मनो गुणवतो लोके रामस्य धीमतः ।
वृत्तं कथय वीरस्य यथा ते नारदाच्छ्रुतम् ॥

अस्य काव्यस्य श्रीरामस्वामी नायकः । अत्र अनन्त-गुणाभिरामस्यापि रामस्य धर्मत्वादिगुणचतुष्टयवर्णनं ब्रह्मणो मुखचतुष्टयसाकल्यद्योतनार्थम् । एवं च रामकथां कुर्वत एव मुखं सफलमिति द्योतितम् ॥

रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ।
रामस्य सह सौमित्रे राक्षसानां च सर्वशः ॥

वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ।
तच्चाप्यविदितं सर्वं विदितं ते भविष्यति ॥

अनेन रहस्यार्थवेदनरूपवरदानमुक्तम् ॥

न ते वागनृता काव्ये काचिदत्र भविष्यति ।

अनेनासत्काव्यदोषाः सर्वेऽपि निरस्ताः । यथावृत्तार्थप्रतिपादनाच्च स्मृतिरेवेति सूचितम् ॥

कुरु रामकथां पुण्यां श्लोकबद्धां मनोहराम् ॥

अनेन न केवलं दोषाभावः, अपि तु वक्तुः श्रोतुश्च पुण्याधायकमिति सूचितम् ॥

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥

अनेन धार्मिकेण पुरुषेण कृतं धर्मप्रधानपुरुषचरित्रवर्णनं चिरकालं सर्वोपादेयतयावतिष्ठत इति सूचितम् ॥

यावद्रामायणकथा त्वत्कृता प्रचरिष्यति ।
तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि ॥

इत्युक्त्वा भगवान्ब्रह्मा तत्रैवान्तरधीयत ॥

अनेन कर्तुर्भगवतो वाल्मीकेः परमपुरुषार्थसिद्धिरप्युक्ता भवति, 'तस्य सर्वेषु लोकेषु कामचारो भवति' इति श्रुतिवचनात् । एवं च अन्यस्यापि महापुरुषचरित्रवर्णनकर्तुर्महाफलप्राप्तिः सूचिता । एवमनेकवरान्प्रदाय ब्रह्मा तत्रैवान्तरधीयत ॥

उदारवृत्तार्थपदैर्मनोरमै-
स्तदास्य रामस्य चकार कीर्त्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारधीर्मुनिः ॥

अनेन ब्रह्मणो लब्धवरस्य कीर्त्तिमतो वाल्मीकेस्तत्कृत-यशस्करकाव्यस्य तत्प्रतिपाद्यस्य यशस्विनः सकलकल्या-णगुणाभिरामस्य रामस्य च महिमातिशयः प्रतिपादितः ॥

दशशिरसश्च वधं निशामयध्वम् ।

अनेन दशशिरोवध इति काव्यस्य नामोक्तम् ॥

श्रुत्वा वस्तु समग्रं तद्धर्मात्मा धर्मसंहितः ।
व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥

ब्रह्मणः सकाशाद्वरं प्राप्य काव्यारम्भार्थं प्रवृत्तो भगवान्धर्मात्मा वाल्मीकिः ।

उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः ।
प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषत गतिम् ॥

अनेन धर्माधायकं कर्म शुचिना नियमेन कर्तव्यमिति सूचितम् ॥

रामलक्ष्मणसीताभी राज्ञा दशरथेन च ।
सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्त्वतः ॥

हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् ।
तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यति ॥

स्त्रीतृतीयेन च तदा यत्प्राप्तं चरता वने ।
सत्यसंधेन रामेण तत्सर्वं चान्ववेक्षितम् ॥

ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः ।
पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥

तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महाद्युतिः ।
अभिरामस्य रामस्य चरितं कर्तुमुद्यतः ॥

धर्मेण योगजधर्मेण ॥

कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ।

समुद्रमिव रत्नाढ्यं सर्वश्रुतिमहोदधिम् ।
स यथा कथितं पूर्वं नारदेन महर्षिणा ॥

रघुवंशस्य चरितं चकार भगवानृषिः ॥

त्रिवर्गफलयुक्तं धीमतः श्रीरघुवरस्य चरितं कृत्स्नं पाणावामलकमिव दृष्ट्वा, वाल्मीकिना तपोयोगमहिम्ना धर्मप्रधानं समग्रं काव्यं कृतम् । तत्प्रकारमाह—

प्राप्तराज्यं च रामस्य वाल्मीकिभगवानृषिः ।
चकार चरितं कृत्स्नं विचित्रपदमात्मवान् ॥

अनेन ग्रन्थकरणकालः सूचितः ॥

चतुर्विंशत्सहस्राणि श्लोकानां कृतवानृषिः ।
तथा सर्गशतान्पञ्च षट्काण्डानि तथोत्तरम् ॥

कृत्वापि तन्महाप्राज्ञः सभविष्यं सोत्तरम् ॥

अत्र चतुर्विंशतिसहस्रसंख्योक्त्या चतुर्विंशत्यक्षरगायत्रीतुल्यता सूचिता । प्रथमपद्ये 'तपःस्वाध्यायनिरतम्'

इत्यत्र प्रथमं तकारस्य सर्गप्रान्ते 'पठन्द्विजः—' इत्येतस्मिन्पद्ये 'महत्त्वमीयात्' इत्यत्र 'यात्' इत्यक्षरस्य ग्रहणादपि गायत्रीरूपत्वं सूचितम्। अन्यच्च, गायत्री सवितृप्रतिपादिका। अयं ग्रन्थः तद्वंशप्रतिपादकः। तस्माद्गायत्र्या एव विस्तरः॥

चिन्तयामास को न्वेतत्प्रयुञ्जीयादिति प्रभुः।
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः॥

अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ।
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ॥

भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ।
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ॥

वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥

अनेन समीचीनविद्या मेधाविने नियताय देयेति धर्मः सूचितः, 'न विद्यामूषरे वपेत्' इति श्रुतेः॥

तौ तु गान्धर्वतत्त्वज्ञौ मूर्च्छनास्थानकोविदौ ॥
भ्रातरौ स्वरसंपन्नौ गन्धर्वाविव रूपिणौ ॥

रूपलक्षणसंपन्नौ मधुरस्वरभाषिणौ ।
[illegible]क्षोद्भूतौ बिम्बौ रामदेहात्तथापरौ ॥

तौ राजपुत्रौ कात्स्न्र्येन धर्म्यमाख्यानमुत्तमम् ।
वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥

ऋषीणां च द्विजातीनां साधूनां च समागमे ।
यथोपदेशं तत्त्वज्ञौ जगतुस्तौ कुशीलवौ ॥

अनेन अध्येत्रा सम्यगधीतायाः विद्याया महतां समीपे प्रचारः कर्तव्य इति सूचितम् ॥

महात्मानौ महाभागौ सर्वलक्षणलक्षितौ ।
तौ कदाचित्समेतानामृषीणां भावितात्मनाम् ॥

आसीनानां समीपस्थाविदं काव्यमगायताम् ।
पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ॥

जातिभिः सप्तभिर्बद्धं तन्त्रीलयसमन्वितम् ।
हास्यशृङ्गारकारुण्यरौद्रवीरभयानकैः ॥
बीभत्साद्भुतसंयुक्तं काव्यमेतदगायताम् ॥

अनेन वेदत्रयसाम्यं सूचितम्, 'मितममितं स्वरः' इत्यैतरेयब्राह्मणोक्तलक्षणात् । मितम् ऋगादि, अमितं यजुरादि, स्वरः सामादि । अस्मिन्ग्रन्थे मितं श्लोकः, स्वरो गीतिः, एतद्वयमिह स्पष्टम् । अमितं साम्यम् । कथमिति चेत्; 'मा निषाद' इत्येतत्पद्यानन्तरमेव पादबद्धग्रन्थः, तत्पूर्वं छन्दोबद्धपद्यानामभावात् । 'तपःस्वाध्यायनिरतम्' इत्यारभ्य 'क्रौञ्चीमिदं वचनमब्रवीत्' इत्येतदन्तस्य ग्रन्थस्य अमितत्वं विना नान्या गतिः । इदानीं प्रत्यक्षं छन्दोबद्धतया दृश्यत इति चेत्, श्लोकोत्पत्त्यनन्तरं तच्छिष्यैः छन्दोबद्धतया रचितो भविष्यति । तस्मात् 'मा निषाद' इत्येतत्पूर्वस्य ग्रन्थस्य अमितत्वरूपं यजुष्ट्वं सिद्धम् । तस्माद्वेदत्रयसाम्यमुपपन्नम् । तथा च प्रथमसर्गे नारदवाक्यम्—

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् ।

इति । वेदैरिति बहुवचनाद्वेदत्रयसाम्यं सिद्धम् ॥

तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः ।
साधु साध्विति चाप्यूचुः परं विस्मयमागताः ॥

ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ।
प्रशशंसुः प्रशस्तव्यौ गायन्तौ तौ कुशीलवौ ॥

अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ।
चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् ॥

प्रविश्य तावुभौ सुष्ठु तथा भावमगायताम् ।
सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा ॥

एवं प्रशस्यमानौ तैस्तपःश्लाघ्यैर्महात्मभिः ।
संरक्ततरमत्यर्थं मधुरं तावगायताम् ॥

प्रीतः कश्चिन्मुनिस्ताभ्यां संमतः कलशं ददौ ।
प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महातपाः ॥

अन्यः कृष्णाजिनं प्रादान्मौञ्जीमन्यो महामुनिः ।
कश्चित्कमण्डलुं प्रादाद्यज्ञसूत्रमथापरः ॥

औदुम्बरीं व्रसीमन्यो जपमालामथापरः ।
आयुष्यमपरे चोचुर्मुदा तत्र महर्षयः ॥

अनेन महद्भिर्मुनिभिः श्लाघापूर्वकपारितोषिकप्रदानेन इतरैरपि पुण्यकथाश्रोतृभिः स्वस्वशक्त्यनुसारेण धर्मवक्ता पूजनीय इति सूचितम् । अनेन महाजनपरिग्रहोऽपि सूचितः । 'तस्माद्गायते न देयम्' इति निषेधो वृत्त्यर्थम-सद्गायकविषय इत्यपि सूचितम् । एतत्काव्यं पठतां श्रोतृणां च आयुष्कारकं पुष्टिजनकं च । तथा च—

आयुष्यं पुष्टिजनकं सर्वश्रुतिमनोहरम् ॥

प्रथमसर्गेऽपि,

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥

एतदाख्यानमायुष्यं पठन्रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥

पठन्द्विजो वागृषभत्वमीया-
त्स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीया-
ज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥

इत्युक्तम् । एवं च पुरुषार्थप्राप्तिः प्रतिपादिता ॥

प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायनौ ।
रथ्यासु राजमार्गेषु ददर्श भरताग्रजः ॥

स्ववेश्म चानीय ततो भ्रातरौ तौ कुशीलवौ ।
पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः ।

आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ।
उपोपविष्टः सचिवैर्भ्रातृभिश्च परंतपः ॥

दृष्ट्वा तु रूपसंपन्नौ तावुभौ नियतस्तदा ।
उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा ॥

श्रूयतामिदमाख्यानमनयोर्दैववर्चसोः ।
विचित्रार्थपदं सम्यग्गायिनौ समचोदयत् ॥

तौ चापि मधुरं रक्तं स्वञ्चितायतनिस्वनम् ।
तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम् ॥

ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ।
श्रोत्राश्रयसुखं गेयं तद्बभौ जनसंसदि ॥

इमौ मुनी पार्थिवलक्षणान्वितौ
कुशीलवौ चैव महातपस्विनौ ।
ममापि तद्भूतिकरं प्रचक्षते
महानुभावं चरितं निबोधत ॥

ततस्तु तौ रामवचःप्रचोदिता-
वगायतां मार्गविधानसंपदा ।
स चापि रामः परिषद्गतः स्वनै-
र्बुभूषयासक्तमना बभूव ह ॥

अनेन अस्य प्रबन्धस्य विरुद्धकथानभिरुचिना धर्म-विरुद्धकेवलार्थपरजाबालिवाक्यश्रवणकुपितेन धर्मप्रधानेन श्रीरामेणादरपूर्वकं श्रुतमिति धर्मावगमाय सत्संग्राह्यता

सूचिता । तमेव धर्मं महर्षिणा वाल्मीकिना 'व्यङ्ग्य-प्रधानं काव्यमुत्तमम्' इति व्यङ्ग्यमर्यादया प्रतिपादयता श्रीरामस्वामिचरितमेव वाच्यत्वेन प्रतिपाद्यते ॥

सर्वापूर्वमियं येषामासीत्कृत्स्ना वसुंधरा ।
प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥

प्रजापतिर्मनुः । तस्येयं पृथिवी ब्रह्मणा दत्ता । स च एतस्याः परिपालनम् वर्णाश्रमधर्माणां रक्षणं दुष्टनिग्रहः शिष्टपरिपालनं च कर्तव्यम् इति बुद्धया पृथिव्याम् आर्यावर्तपुण्यभूमौ,

कोसलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥

अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥

तस्यां कर्मानुष्ठानार्थं वेदोक्तधर्मविषयव्यवस्थापिकां स्मृतिं धर्मतो राज्यपरिपालनायोपदिश्य 'यस्त्विन्द्रियाणि

मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ तस्मादसक्तः सततं कार्यं कर्म समाचर । असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ संन्यासः कर्मयोगश्च निश्रेयसकरावुभौ । तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते' इत्येवमादिभिः श्लोकैः प्रतिपादितं कर्मयोगं च 'इमं विवस्वते योगं प्रोक्तवानहमव्ययम् । विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्' इति भगवद्गीताप्रतिपादितक्रमेण दत्त्वा इक्ष्वाकुं पुत्रं नियुक्तवान् । इतरदेशेषु धर्मविरुद्धाचारबाहुल्यात् तेषु वासस्यापि प्रतिषिद्धत्वात् तत्रत्याचारः प्रमाणीकर्तुं न शक्यते । तथा च बोधायनः– 'अवन्तयोऽङ्गमगधाः सौराष्ट्रा दक्षिणापथाः । उपावृत्तिसिन्धुसौवीरा एते संकीर्णयोनयः ॥ आरट्टान्कारस्करान्पौण्ड्रान्सौविरान्वङ्गकलिङ्गान् प्रानूनानिति च गत्वा पुनस्तोमेन यजेत । सर्वपृष्ठया वा । अथाप्युदाहरन्ति— पद्भ्यां स कुरुते पापं यः कलिङ्गान्प्रपद्यते । ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः इति । अतः पृथिव्यां प्रमाणीभूताचारनिर्धारणाय आ-

र्यावर्तः पुण्यदेशस्तैरेव गृहीतः । प्रागदर्शनात् प्रत्यक् कालवनात् दक्षिणेन हिमवन्तम् उदक् पारियात्रम् एतदार्यावर्तम् । तस्मिन्य आचारः स प्रमाणम्' इति । तत्र अयोध्यायामिक्ष्वाकुप्रभृतयः धर्मेण पृथ्वीपालनं कृत्वा राज्ये स्वस्वपुत्रानभिषिच्य यथाकालं वानप्रस्थाश्रममाश्रितवन्तः । तथा च तद्वंश्यानामिदमेव व्रतमुक्तं कालिदासेन— 'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्त्वा यूने सितातपवारणम् । मुनिवनतरुच्छायां देव्या तया सह शिश्रिये गलितगवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्' इति, 'वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्' इत्यपि । तद्वंश्यास्तु अग्रे विस्तरेण प्रतिपाद्यन्ते । तद्वंशे विशुद्धाद्दशरथात्पतिव्रतानामग्रगण्यायां कौसल्यायां श्रीरामस्वामिनो जन्म प्रतिपादयिष्यते । महतां शुद्धजनिर्दुर्लभा । तथा च महाभारते— 'नदीनां च ऋषीणां च साधूनां च महात्मनाम् । प्रभावो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च' इति । एतस्योदाहरणं कुम्भोद्भववैन्यादयो बहवः

सन्ति । विस्तरभयान्न लिख्यन्ते । अयं तु श्रीरामस्वामी विशुद्धमातापितृजन्यः । अतस्तत्पितुर्दशरथस्य प्रभावः षष्ठे सर्गे वक्ष्यते—

पुर्यां तस्यामयोध्यायां वेदवित्सर्वसंग्रहः ।
दार्ढ्यदर्शी महातेजाः पौरजानपदप्रियः ॥

इक्ष्वाकूणामतिरथो यज्वा धर्मरतो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥

बलवान्निहतामित्रो मित्रवान्विजितेन्द्रियः ।
धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥

यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा वसञ्जगदपालयत् ॥

तेन सत्याभिसंधेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥

एतादृशे धार्मिके राज्ञि राज्यं प्रशासति सति,

तस्मिन्पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥

नाल्पसंनिचयः कश्चिदासीत्तस्मिन्पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थो गवाश्वधनधान्यवान् ॥

कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥

सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥

नाकुण्डली नामकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो नानुलिप्ताङ्गो नासुगन्धश्च विद्यते ॥

नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥

नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न च निर्वृत्तसंकरः ॥

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥

न नास्तिको नानृतको न कश्चिदबहुश्रुतः ।
नासूयको न चाशक्तो नाविद्वान्विद्यते तदा ॥

नाषडङ्गविदत्रासीन्नाव्रतो नासहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्याधितो वापि कश्चन ॥

कश्चिन्नरो वा नारी वा नाश्रीमान्व्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥

वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥

दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥

क्षत्रं ब्रह्ममुखं त्वासीद्वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वधर्मनिरतास्त्रीवर्णानुपचारिणः ॥

योधानामग्निकल्पानां पेशलानां सुवर्चसाम् ।
संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥

काम्भोजविषये जातैर्बाह्लीकैश्च हयोत्तमैः ।
नित्यमत्तैः सदा पूर्णा नागैरचलसंनिभैः ॥

अनेन राज्ञो धर्मतः परिपालनेन जनानां धर्मनिरतत्वं सौख्यं राज्ञश्च ऐहिकामुष्मिकश्रेयःप्राप्तिर्भवतीति सूचितम् । तथा च प्राचीनाः—'राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः । लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजाः' इति । एतादृशस्य धर्मप्रधानस्य दशरथस्य धर्मप्रधानाः प्रधानपुरोहिताः । तेषां गुणाः सप्तमे सर्गे—

तस्यामात्या गुणैरासन्नैक्ष्वाकस्य महात्मनः ।
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥

अष्टौ बभूवुर्वीरस्य महामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥

धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः ।
अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत् ॥

ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ।
वसिष्ठो वामदेवश्च मन्त्रिणश्च तथापरे ॥

विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ।
परस्परानुरक्ताश्च नीतिमन्तो बहुश्रुताः ॥

श्रीमन्तश्च महात्मानः शास्त्रज्ञा दृढविक्रमाः ।
कीर्त्तिमन्तः प्रणिहिता यथावचनकारिणः ॥

तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः ।
क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं वचः ॥

तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा ।
क्रियमाणं कृतं वापि चारेणापि चिकीर्षितम् ॥

कुशला व्यवहारेषु सौहृदेषु परीक्षिताः ।
प्राप्तकालं च ते दण्डं धारयेयुः सुतेष्वपि ॥

कोशसंग्रहणे युक्ता बलस्य च परिग्रहे ।
अहितं चापि पुरुषं न विहिंस्युरदूषकम् ॥

वीराश्च नियतोत्साहा राजशास्त्रमनुव्रताः ।
शुचीनां रक्षितारश्च नित्यं विषयवासिनाम् ॥

ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् ।
सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥

शुचीनामेकबुद्धीनां सर्वेषां संप्रजानताम् ।
नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ॥

कश्चिन्न दुर्गतः [illegible]तिर्नरः ।
प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥

सुवाससः सुवेषाश्च ते च सर्वे सुशीलिनः ।
हितार्थं च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥

गुरौ गुणगृहीताश्च प्रख्याताश्च पराक्रमे ।
विदेशेष्वपि विख्याताः सर्वतो बुद्धिनिश्चयात् ॥

संधिविग्रहतत्त्वज्ञाः प्रकृत्या संपदान्विताः ।
मन्त्रसंवरणे युक्ताः शक्ताः सूक्ष्मासु बुद्धिषु ॥
नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः ॥

एतेन राज्ञा सद्गुणविशिष्टा अष्टौ मन्त्रिणः संगृह्या इति सूचितम् । तथा च मनुः—'मौलाञ्शास्त्रविदः शूरा॰ल्लब्धलक्षान्कुलागतान् । सचिवान्सप्त वाष्टौ वा प्रकुर्वीत परीक्षितान् ॥ मन्त्रिणो यस्य कुलजा असंहार्याः सहोषिताः । नृपतेर्मतिदाः सन्ति संबन्धज्ञानकोविदाः ॥ अनागतविधातारः कालज्ञानविशारदाः । अतिक्रान्तमशोचन्तः स राज्यफलमश्नुते । समदुःखसुखा यस्य सहायाः प्रियकारिणः । अर्थचिन्तापराः सभ्याः स राज्यफलमश्नुते' इति ॥

ईदृशैस्तैरमात्यैस्तु राजा दशरथोऽनघः ।
उपपन्नो गुणोपेतैरन्वशासद्वसुंधराम् ॥

अवेक्षमाणश्चारेण प्रजा धर्मेण रञ्जयन् ।
विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसंगरः ॥

स तत्र [illegible]ः शशास पृथिवीमिमाम् ।
नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः ॥

[illegible]त्रयाप्ततसामन्तः प्रतापहतकण्टकः ।
स शशास जगद्राजा दिवं देवपतिर्यथा ॥

तैर्मन्त्रिभिर्मन्त्रहिते निविष्टै-
र्वृतोऽनुरक्तैः कुशलैः समर्थैः ।
स पार्थिवो दीप्तिमवाप युक्त-
स्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥

अनेन 'स्वयं समर्थोऽपि राजा सर्वलक्षणान्वितैः पुरोहितामात्यैरन्वित एव राज्यपालनं कुर्यात्' इति धर्मः सूचितः । तथा च मनुः— 'अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् । विशेषतोऽसहायेन किमु राज्यं महोदयम् ॥ नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् । तेन कार्यं विनिश्चित्य ततः कर्म समारभेत्' इति । तस्मिन्मन्त्रिणि याज्ञवल्क्योऽपि— 'सन्मन्त्रिणः प्रकुर्वीत राज्ञो

मौलान्स्थिराञ्शुचीन्। तैः सार्धं चिन्तयेद्राजा विप्रेणाथ ततः स्वयम्' इति। तथा च कामान्दकीये–'इति स्म राज्यं सकलं समीरितं परा प्रतिष्ठास्य धनं सुसाधनम्। गृहीतमेतद्विपुलेन मन्त्रिणा त्रिवर्गनिष्पत्तिमुपैति शाश्वतीम्॥ राज्यभारावसन्नानां राज्ञां किल पदे पदे। स्थिरवृत्ताः कुलामात्याः स्वैरं विश्रान्तिभूमयः' इति। एतादृशस्य राज्ञो दशरथस्य सर्वधर्मानुष्ठातुः सुतोदयप्रयुक्तो धर्मो नासीत्। पुत्रोत्पत्तेश्च ऋणनिवर्तकत्वं नरकोद्धारकत्वम् उत्तमलोकप्रापकत्वं वंशाभिवृद्धिकरत्वं च श्रुतावुक्तम्। ऋणनिवर्तकत्वे तावत्— जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री' इति। नरकोद्धारकत्वे च 'पुन्नाम्नो नरकात्त्रायत इति पुत्रः' इति। उत्तमलोकप्रापकत्वे च 'नापुत्रस्य लोकोऽस्ति' इति। वंशाभिवृद्धिकरत्वे च 'प्रजातन्तुं मा व्यवच्छेत्सीः' इति। बोधायनोऽपि— 'पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण नाकमेवाधिरोहति' इति।

'सप्तावरान्सप्त पूर्वान्षडन्यानात्मसप्तमान्। सत्पुत्रमधिगच्छानस्तारयत्येनसो भयात्। तस्मात्प्रजासंतानमुत्पाद्य फलमवाप्नोति। तस्माद्यत्नवान्प्रजामुत्पादयेदात्मनः फललाभाय। तस्मात्पुत्रं चोत्पाद्यात्मानमेवोत्पादयति इति विज्ञायते 'आत्मा वै पुत्रनामासि' इति। एवं द्वितीय आत्मा जीवता द्रष्टव्यो यः पुत्रमुत्पादयति स यथा भवति' इति। तथा च आदिपर्वणि कुन्तीं प्रति पाण्डुवचनम्—'अप्रजस्य महाभागे न द्वारं प्रतिचक्षते। देहनाशे ध्रुवो नाशः पितृणामेव निश्चयः। ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि। पितृदेवर्षिमनुजदेवैः शतसहस्रशः॥ एतानि तु यथाकालं यो न बुध्यति मानवः। न तस्य लोकाः सन्तीह धर्मवस्तु प्रतिष्ठिताः॥ यज्ञैस्तु देवान्प्रीणाति स्वाध्यायैस्तपसा मुनीन्। पुत्रैः श्राद्धैः पितॄंश्चैव आनृशंस्येन मानवान्॥ अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता। इति कुन्ति विदुः प्राज्ञाः शाश्वतं धर्ममास्थिताः॥ इष्टं दत्तं तपस्तप्तं नियमाश्च स्वनुष्ठिताः। सर्वमेवानपत्यस्य न पावनमिहोच्यते'। भारते आदिप-

र्वेणि आस्तिक्ये– 'एतस्मिन्नेव काले तु जरत्कारुर्महातपाः। चचार पृथिवीं कृत्स्नां यत्र सायंगृहो मुनिः ॥ चरन्दीप्त्या महातेजा दुश्चरामकृतात्मभिः । तीर्थेष्वाप्लवनं कुर्वन्पुण्येषु विचचार ह ॥ वायुभक्षो निराहारः शुष्यन्नहरहर्मुनिः । स ददर्श पितॄन्गर्ते लम्बमानानधोमुखान् ॥ एकतन्त्वावशिष्टं वै वीरणस्तम्बमाश्रितान् । तं च तन्तुं शनैराखुमाददानं बिलाश्रयम् ॥ निराहारान्कृशान्दीनान्तर्तस्थांस्ताणमिच्छतः । उपश्रुत्य स तान्दीनान्दीनरूपोऽभ्यभाषत ॥ के भवन्तोऽवलम्बन्ते वीरणस्तम्बमाश्रिताः । कृच्छ्रामापदमापन्नाः प्रियं किं करवाणि वः ॥ तपसोऽस्य चतुर्थेन तृतीयेनापि वा पुनः । अर्धेन वापि निस्तर्तुमापदं ब्रूत मा चिरम् ॥ अथ वापि समग्रेण तरन्तु तपसा मम । पितरः— वृद्धो भवान्ब्रह्मचारी यो नस्त्रातुमिहेच्छति ॥ न तु विप्राग्र्य तपसा शक्यमेतद्व्यपोहितुम् । अस्ति नस्तात तपसः फलं प्रवदतां वर ॥ संतानप्रक्षयात्तस्मिन्पतामो निरयेऽशुचौ । संतानः परमो धर्म एवमाहुर्मनीषिणः ॥ यायावरा नाम वयमृषयः संशित-

व्रताः। लोकात्पुण्यादिह भ्रष्टाः संतानप्रक्षयाद्विभो। प्रनष्टं नस्तपः पुण्यं न हि नस्तन्तुरस्ति वै। जरत्कारुरिति ख्यातो वेदवेदाङ्गपारगः॥ नियतात्मा महात्मा च सुव्रतः सुमहातपाः। तेन स्म तपसो लोभात्कृच्छ्रमापादिता वयम्॥ न तस्य भार्या पुत्रो वा बान्धवो वास्ति कश्चन तस्माल्लम्बामहे गर्तें नष्टसंज्ञा ह्यनाथवत्। यांस्तु पश्यसि नो ब्रह्मन्वीरणस्तम्बमाश्रितान्॥ सोऽद्यास्माकं कुले तन्तुरासीत्स कुलवर्धनः। यानि पश्यासि वै ब्रह्मन्मूलानीमानि वीरुधः॥ एते नस्तन्तवस्तात कालेन परिभक्षिताः। यतस्त्वं पश्यसि ब्रह्मन्मूलमस्यार्धभक्षितम्॥ तत्र लम्बामहे सर्वे सोऽप्येकस्तपसि स्थितः। यमाखुं पश्यसि ब्रह्मन्काल एष महाबलः॥ स तं तपोरतं मन्दं दशनैः क्षिपते तुदन्। जरत्कारुं तपोलुब्धं मन्दात्मानमचेतसम्॥ छिन्नमूलान्परिभ्रष्टान्कालोपहतचेतसः। नरकस्थान्प्रपश्यास्मान्यथा दुष्कृतिनस्तथा। अस्मासु पतितेष्वत्र सह पूर्वैः सहान्वयैः। छिन्नः कालेन सोऽप्यत्र गन्ता वै नरकं ततः॥ तपो वाप्यथ वा यज्ञो यच्चा-

न्यत्पावनं महत् । तत्सर्वं न समं तात संतत्येति सतां मतम् ॥ एतच्छ्रुत्वा जरत्कारुर्दुःखशोकपरायणः । उवाच व्याप्तिदुःखाद्वाष्पसंदिग्धया गिरा ॥ अहमेव जरत्कारुः किल्बिषी भवतां सुतः । एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः ॥ मया निवर्तिता बुद्धिर्ब्रह्मचर्यात्पितामहाः । करिष्ये वः प्रियं कामं निवेक्ष्ये नात्र संशयः' । हरिवंशेऽपि सुपुत्रकामां रुक्मिणीं कृष्णो निजगाद— 'पुत्रेण लेभिरे लोकान्सता कामदुहो हि मे ॥ नरकं पुदिति ख्यातं दुःखं च विबुधा विदुः । पुतत्राणात्ततः पुत्रमिहेच्छन्ति परत्र च ॥ अनन्ताः पुत्रिणो लोकाः पुरुषस्य प्रिये शुभाः । पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् ॥ तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । पुत्रवन्तं बिभेतीन्द्रः किं नु तेनाजितं भवेत् ॥ नापुत्री विन्दते लोकान्कुपुत्राद्वन्ध्यता वरा । कुपुत्रो नरको यस्मात्सुपुत्रः स्वर्ग एव हि ॥ तस्माद्विनीतं यत्पुत्रं श्रुतवन्तं दयापरम् । विद्या च विनयो यस्मात्तस्मात्पुत्रं सुधार्मिकम् ॥ इच्छेत्पुत्रं पुत्रकामः पुरुषो यत्नवान्बुधः' इति । एतादृशः पुत्रो

नास्तीति अष्टमसर्गे उक्तम्—

तस्य त्वेवंप्रभावस्य धर्मज्ञस्य महात्मनः ।
सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥

अतः पुत्रोत्पत्त्युपायं चिन्तयतो धर्मप्रधानस्यास्य दशरथस्य प्राचीनभवपरम्पराजनितसुकृतपरिपाकवशात् प्रकृष्टधर्म एवाभिलषितसाधने बुद्धिरासीत्—

चिन्तयानं च तस्यैवं बुद्धिरासीन्महात्मनः ।
सुतार्थं हयमेधेन किमर्थं न यजाम्यहम् ॥

इति । तथा च अश्वमेधस्य पुत्रोत्पादकत्वमत्रैव स्फुटम् । प्रकृष्टत्वं च सकलपापनिवर्तकत्वाद्ब्रह्मलोकप्रापकत्वात् मुक्तिजनकत्वाच्च । पापनिवर्तकत्वं च 'सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इति श्रुतेः । ब्रह्मलोकप्रापकत्वं च 'तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत् तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनो गच्छन्ति' इति श्रुतेः । तस्यैवोपासनासहितस्य समष्टिहिरण्यगर्भभावप्रापकत्वमुक्तं बृहदारण्यके— 'उषा

वा अश्वस्य' इत्यारभ्य 'अप पुनर्मृत्युं जयति' इत्यन्तेन । एवं महाफलत्वात्सर्वोत्कृष्टोऽयमश्वमेधः । तथा च मनुः— 'ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः' इति । किं बहुना? यतः यदपेक्षया उत्कृष्टं पापं नास्ति सापि ब्रह्महत्या अन्यदीयाश्वमेधावभृथस्नानेन मुच्यते । तथा चापस्तम्बाचार्याः— 'ब्रह्महा आश्वमेधिकं वावभृथमवेत्य मुच्यते' इति । तथा अन्यदापि 'येऽश्वस्य हुतस्य गन्धमाजिघ्रन्ति, सर्वे ते पुण्यलोका भवन्तीति विज्ञायते । सहपुण्यकृतः पापकृतश्च हस्तसंरब्धा प्राममभ्युदायन्ति सर्वे ते पुण्यलोका भवन्तीति विज्ञायते' इति । महापुरुषः पुत्रत्वेन भावीत्यतोऽप्येवं सर्वोत्कृष्ट एव धर्मे बुद्धिरासीत् ॥

ततोऽब्रवीदिदं राजा सुमन्त्रं मन्त्रिसत्तमम् ।
शीघ्रमानय मे सर्वान्गुरूंस्तान्सपुरोहितान् ॥

ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ।
समानयत्स तान्सर्वान्[illegible]॥

सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् ।
पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः ॥

तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ।
इदं धर्मार्थसहितं श्लक्ष्णं वचनमब्रवीत् ॥

मम लालप्यमानस्य पुत्रार्थे नास्ति वै सुखम् ।
तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥

तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा ।
कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचार्यताम् ॥

ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् ।
वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखेरितम् ॥

ऊचुश्च परमप्रीताः सर्वे दशरथं वचः ।
संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥

सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ।
सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव ॥

यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ।
ततः प्रीतोऽभवद्राजा श्रुत्वा तद्विजभाषितम् ॥

अत्र महर्षिभिरपि अनुग्रहं कृत्वा फलमवश्यंभावीति निश्चित्य कर्मारम्भोऽभ्यनुज्ञातः आ सर्गसमाप्तेः । नवमसर्गे—

एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ।
ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः ॥

सनत्कुमारो भगवान्पूर्वं कथितवान्कथाम् ।
ऋषीणां संनिधौ राजंस्तव पुत्रागमं प्रति ॥

काश्यपस्य तु पुत्रोऽस्ति विभण्डक इति श्रुतः ।
ऋश्यशृङ्ग इति ख्यातः तस्य पुत्रो भविष्यति ॥

सवने नित्यसंरुद्धो मुनिर्वनचरः सदा ।
एतस्मिन्नेव काले तु रोमपादः प्रतापवान् ॥

अङ्गेषु प्रथितो राजा भविष्यति महाबलः ।
तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ॥

अनावृष्टिः सुघोरा वै सर्वभूतभयावहा ॥
अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः ।

ब्राह्मणान्श्रुतवृद्धांश्च समानीय प्रवक्ष्यति ॥
वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः ।

विभण्डकसुतं राजन्सर्वोपायैरिहानय ॥
आनीय च महीपाल ऋश्यशृङ्गं सुसत्कृतम् ।

प्रयच्छ कन्यां शान्तां वै विधिना तेन सत्कृतः ॥
आनीतोऽवर्षयद्देवं शान्ता चास्मै प्रदीयते ।

ऋश्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति ॥
सनत्कुमारकथितमेतावद्व्याहृतं मया ॥

अनेन नवमसर्गेण ऋश्यशृङ्गस्य भगवतः अङ्गदेशे पादन्यासमात्रेण सकलराजदोषनिरसनेन देवो ववर्षेति प्रतिपादितम् । एतस्य विस्तरो दशमेऽभिहितः । एकादशे सर्गे—

तं तु राजा दशरथो यशस्कामः कृताञ्जलिः ।
ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥

यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ।
लभते च स तं कामं द्विजमुख्याद्विशांपतिः ॥

पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः ।
वंशप्रतिष्ठानकराश्रिषु लोकेषु विश्रुताः ॥

एवं स देवप्रवरः पूर्वं कथितवान्कथाम् ।
स त्वं पुरुषशार्दूल तमानय सुसत्कृतम् ॥

स्वयमेव महाराज गत्वा सबलधा .नः ।
अनुमान्य वसिष्ठं च सूतवाक्यं निशम्य च ॥

वसिष्ठेनाभ्यनुज्ञातो राजा संपूर्णमानसः ।
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥

अनेन प्राचीनऋत्विगभ्यनुज्ञानेनैव अन्य आनेयः, न तु तदतिक्रमणेनेति सूचितम् । तथा च बोधायनः—

योऽस्य संस्तुततमः स्यात्तं प्रथमं वृणीत तेन सचिवेनान्यं लिप्सेतेति । तथा तस्य चेत्पूर्वपुरुषैर्वृताः स्युस्तानेव नातिवृणीत । अव्यवच्छिन्नाश्चेत्कौलेनाध्ययनेन मानुषेण शीलवृत्ताभ्यामिति । प्राचीनऋत्विगभ्यनुज्ञानेनैवान्य आनेयो न तु तदतिक्रमेणेत्ययमर्थोऽन्वयव्यतिरेकाभ्यां फलमुखेन स्पष्टीक्रियते । अन्वयस्तावत् अङ्गदेशानीतऋष्यशृङ्गकारितक्रतुना चत्वारः पुत्रा भविष्यन्तीति सनत्कुमारवाक्यं सुमन्त्रेण कथितं श्रुत्वा वसिष्ठाभ्यनुज्ञां विना ऋश्यशृङ्गानयनमयुक्तमिति निश्चित्य अवाप्य तदनुज्ञां मुदितमना दशरथः समानीय ऋष्यशृङ्गं वसिष्ठऋष्यशृङ्गाभ्यां कारितयागेन सकलदुरितनिरसनपूर्वकमभिलषितसिद्धिमवापेति । व्यतिरेकस्तावत्, एतद्वंश्यस्त्रिशङ्कुः सशरीरस्वर्गप्राप्तये यज्ञः कारयितव्य इति प्रार्थितेन वसिष्ठेन गुरुणा प्रत्याख्यातो गुरुपुत्रानासाद्य निवेदितपूर्ववृत्तान्तः गुरुपुत्रैरपि

इक्ष्वाकूणां तु सर्वेषां पुरोधाः परमो गुरुः ।
न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥

अशक्यमिति चोवाच वसिष्ठो भगवानृषिः ।
ते वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ॥
बालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ॥

इति न्यायतः प्रतिषिद्धोऽपि तद्वचनातिक्रमात्प्राप्तनीचजातिः भगवन्तमुग्रे तपसि वर्तमानं लोकमर्यादामन्यथयितुं समर्थं विश्वामित्रं शरणं प्राप्तः । तेन,

पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥

दुःप्रापं सशरीरेण दिवं गच्छ नराधिप ।
स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम् ॥
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ॥

इति प्रतिज्ञापूर्वकं सशरीरं स्वर्गं प्रापितोऽपि,

गुरुशापहतो मूढ पत भूमिमवाक्शिराः ।
एवमुक्तो महेन्द्रेण त्रिशङ्करपतत्पुनः ॥

स तु अद्यापि अवाक्शिराः अन्तरिक्षे लम्बमानस्तिष्ठतीति । एवं च महावंशप्रसूतस्यातिधर्मिष्ठस्य त्रिशङ्कोर्विश्वामित्रेण निखिलस्वतपोव्ययेन [illegible] गुरु-शापदोषेण महेन्द्रेण पातितस्यावाक्शिरसः अन्तराले अवस्थानात् गुरुशापोऽप्रतिकार्य इति सूचितम् । तस्मात् [illegible] त्विक्साचिव्येनैव अन्य आनेय इति सिद्धम् । अयमर्थो महाभारते आश्वमेधिके पर्वणि संवर्तमरुत्तीयेऽप्यभिहितः । तथा हि बृहस्पतिं प्रति मरुत्तवाक्यम्— 'भगवन्यन्मया पूर्वमधिगम्य तपोधन । कृतोऽभिसंधिर्यज्ञाय भवतो वचनाद्गुरो ॥ तदहं यष्टुमिच्छामि संभाराः संभृताश्च मे । याज्योऽस्मि भवतः साधो तत्प्राप्नुहि विधत्स्व च ॥ बृहस्पतिः— न कामये याजयितुं त्वामहं पृथिवीपते । वृतोऽस्मि देवराजेन प्रतिज्ञातं च तस्य मे ॥ मरुत्तः— पित्र्यमपि तव क्षेत्रं बहु मन्ये च ते भृशम् । तवास्मि याज्यतां प्राप्तो भजमानं भजस्व माम् ॥' तव पित्रा अङ्गिरसा याज्यत्वेन परिगृहीतोऽहं त्वयाप्यवश्यं याज्य इत्यर्थः । बृहस्पतिः— 'अमर्त्यं याज-

यित्वाहं याजयिष्ये न मानुषम् । मरुत्त गच्छ वा मा वा निवृत्तोऽप्यन्ययाजनात् ॥ न त्वां याजयितास्म्यद्य वृणु त्वं यमिहेच्छसि । उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ॥ एवं बृहस्पतिना प्रत्याख्यातो नारदं प्रत्युक्तवान्मरुत्तः— गतोऽस्म्यङ्गिरसः पुत्रं देवाचार्यं बृहस्पतिम् । यज्ञार्थमृत्विजं प्रष्टुं स च मां नाभ्यनन्दत ॥ प्रत्याख्यातश्च तेनाहं जीवितं नाद्य कामये ।' इति निरपराधिनः स्वस्य गुरुणा नाहं याजयिष्यामीति प्रत्याख्यानपूर्वकमन्यं वृणीष्वेत्यभ्यनुज्ञानेनान्यवरणे दोषाभावेऽपि अन्यवरणापेक्षया प्राणत्यागोऽपि वर इति क्लिश्यमानं मरुत्तं संजीवयन्निव नारदः प्रत्युवाच— 'राजन्नङ्गिरसः पुत्रः संवर्तो नाम धार्मिकः । चङ्क्रमीति दिशः सर्वा दिग्वासा मोहयन्प्रजाः । स गच्छ यदि याज्यं त्वां न वाञ्छति बृहस्पतिः ॥ प्रसन्नस्त्वां महातेजाः संवर्तो याजयिष्यति । मरुत्तः— सजीवितोऽहं भवता वाक्येनानेन नारद' इति परम्परागतगुरुपुत्रलाभान्मरणान्निवृत्तः संतुष्टोऽभवदित्यर्थः । तदनु नारदवचनानुसारेण संवर्तं याजकं प्राप्य

तदुपदेशेन आराधितपरमेश्वरप्रसादलब्धबहुधनो यज्ञमारब्धवान्। तत इन्द्रकुबेरादिदेवानां गुरुरपि गुरुर्देवान् विहाय मर्त्यं न याजयिष्यामीति प्रतिज्ञां परित्यज्य अन्यं वृणीष्वेत्यभ्यनुज्ञां विस्मृत्य संवर्तप्रवर्तितमानवयज्ञवैभवश्रवणसंजातयाजनकामो लोभेनेन्द्रप्रेषितदूत्येन आर्त्विज्यं प्रार्थितवान्। मरुत्तोऽपि वृतसंवर्तपरित्यागे मित्रद्रोहान्महत्पापं भवतीत्याह— 'त्वं चैवैतद्वेत्थ पुरंदरश्च विश्वे देवा वसवश्चाश्विनौ च। मित्रद्रोहे निष्कृतिर्नास्ति लोके महत्पापं ब्रह्महत्यासमं तत्' इति दूतमुक्त्वा प्रत्याचख्यौ। प्रत्याख्यानेन क्रुद्धः स्वयमेतादृशदोषान् जानन्नपि देवानामपि अमार्गान्निवर्तयिता बृहस्पतिर्ब्राह्मणोत्तमं तपस्विनं निवृत्तिमार्गे वर्तमानं साक्षादनुजं संवर्तं सवनगतं मरुत्तं च राजानं हन्तुमिन्द्रं प्रेरितवान्। ततः मरुत्तहननाय वज्रोद्यतहस्तमिन्द्रं संवर्तः स्तम्भयामास। ततो मरुत्तः प्रार्थनेन इन्द्रादीन्देवान् स्वस्वभागग्रहणे यज्ञपरिचर्यायां च नियुक्तवान्। 'ततः संवर्तश्चित्यगतो महात्मा यथा वह्निश्चित्यगतो द्वितीयः। हवींष्युच्चैराह्वयन्देवसंघाञ्जुहावाग्नौ मन्त्रवत्संप्रतीतः।

ततः पीत्वा वलभित्सोममग्र्यं ये चाप्यन्ये सोमपा देवसंघाः। सर्वेऽनुज्ञाताः प्रययुः पार्थिवेन यथाजोषं तर्पिताः प्रीतिमन्तः' इति । अनेन निरपराधिनो यजमानस्य ऋत्विजा परित्यागो न कार्य इति सूचितम् । मरुत्तेन च त्रिशङ्कुवदन्यवरणमकृत्वा पूर्वपरिगृहीतऋत्विग्वंश्यस्यैव वरणमहिम्ना स्वप्रतिस्पर्धीन्द्रादिकारित[illegible]तिशयलब्धवैभवेन सर्वातिशायी यज्ञः प्राप्तः । एवं सति इदानीमपि ऋत्विग्यजमानदोषाभावे परस्परापरित्यागेन स्थेयम् । सति तु दोषे परित्याग इत्ययमर्थः शक्तमदुष्टं चेति विशेषणाभ्यामवगम्यते । मनुः— 'ऋत्विजं यस्त्यजेद्याज्ये याज्यं चर्त्विक्त्वजेद्यदि । शक्तं कर्मण्यदुष्टं च तपो दण्डः शतं शतम्' इति । अयोध्याकाण्डेऽपि—

अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ।
निर्दहेदपि शक्रस्य द्युतिं धर्मनिरोधनात् ॥

तथा च गौतमः— 'निन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः' इति ।

आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम् ।
ऋषिपुत्रं ददर्शादौ दीप्यमानमिवानलम् ॥

ततो राजा यथान्यायं पूजां चक्रे विशेषतः ।
सखित्वात्तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना ॥

रोमपादेन चाख्यातमृषिपुत्राय धीमते ।
सख्यं संबन्धिकं चैव तदा तं प्रत्यपूजयत् ॥

एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ।
सप्ताष्ट दिवसान्राजा राजानमिदमब्रवीत् ॥

शान्ता तव सुता राजन्सह भर्त्रा विशांपते ।
मदीयं नगरं यातु कार्यं हि महदुद्यतम् ॥

रोमपादः—
उवाच वचनं विप्र गच्छ त्वं सह भार्यया ।
ऋषिपुत्रः प्रतिश्रुत्य तथेत्याह नृपं तदा ॥

स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्यया ।
अन्तःपुरं प्रवेश्यैनं पूजां कृत्वाथ शास्त्रतः ॥

कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥

द्वादशे सर्गे—

ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे ।
वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत् ॥

ततः प्रसाद्य शिरसा तं विप्रं देववर्णिनम् ।
यज्ञाय वरयामास संतानार्थं कुलस्य वै ॥

तथेति च स राजानमुवाच च सुसत्कृतः ।
संभाराः संप्रियन्तां ते तुरगश्च विमुच्यताम् ॥

ततः ऋष्यशृङ्गाद्यभ्यनुज्ञयापि यज्ञ आरब्धः । एतेन महतः कर्मण आरम्भे महाब्राह्मणानामभ्यनुज्ञा ग्राह्येत्ययं धर्मः सूचितः ॥

त्रयोदशे सर्गे—

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ।
प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान् ॥

अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च ।
अब्रवीत्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमः ॥

यज्ञो मे क्रियतां ब्रह्मन्यथोक्तं मुनिपुंगव ।
यथा न विघ्नः क्रियते यज्ञाङ्गेषु विधीयताम् ॥

भवान्हि लग्धः सुहृन्मह्यं गुरुश्च परमो भवान् ।
वोढव्यो भवता चेह भारो यज्ञस्य चोद्यतः ॥

अनेन यज्ञादिमहाकर्मारम्भे नूतनेषु ऋत्विक्षु सत्स्वपि प्राचीन एव सर्वज्ञे आस्तिके महाब्राह्मणे भारं विनिक्षिप्य तद्वचनानुसारेण कर्म कर्तव्यमिति सूचितम् ॥

तथेति च स राजानमब्रवीद्द्विजसत्तमः ।
करिष्ये सर्वमेवैतद्भवता यत्समर्थितम् ॥

ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान् ।
स्थपत्ये निष्ठितांश्चैव वृद्धान्परमधार्मिकान् ॥

यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ।
दातव्यमन्नं विधिवत्सत्कृत्य न तु लीलया ॥

सर्वे वर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ।
न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ॥

अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा ।
अवज्ञया कृतं हन्याद्दातारं नात्र संशयः ॥

अत्र श्रद्धापुरःसरमेव दानं कर्तव्यम् । अश्रद्धया दानं निष्फलमित्युक्तम् । तथा च श्रुतिः— 'श्रद्धया देयम्' इति । भगवद्गीतायामपि— 'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह' इति ॥

ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ।
बहूनि रत्नान्यादाय राज्ञो दशरथस्य वै ॥

ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ।
उपयाता नरव्याघ्र राजानस्त्व शासनात् ॥

मयापि सत्कृताः सर्वे यथार्हं राजसत्तमाः ।
यज्ञियं च कृतं राजन्पुरुषैः सुसमाहितैः ॥

निर्यातु च भवान्यष्टुं यज्ञायतनमन्तिकात् ।
सर्वकामैरुपहृतैरुपेतं वै समन्ततः ॥

द्रष्टुमर्हसि राजेन्द्र मनसेव विनिर्मितम् ।
तदा वसिष्ठवचनादृश्यशृङ्गस्य चोभयोः ॥

शुभे दिवसनक्षत्रे निर्यातो जगतीपतिः ।
ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः ॥

ऋश्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ।
यज्ञवाटगताः सर्वे यथाशास्त्रं यथाविधि ॥

अत्र यज्ञादिकं कर्म ब्राह्मणपुरःसरं कर्तव्यम् । अयं धर्मः सर्वेषां साधारणः । राज्ञां तु विशिष्य ब्रह्ममुखत्वं सर्वत्रातिशयाधायकम् । तथा च श्रुतिः— 'तस्माद्राजन्यो ब्राह्मणवानन्यं राजन्यम्' इति । गौतमश्च—'ब्राह्मणं

च पुरो दधीत विद्याभिजनवान्रूपवयःशीलसंपन्नं न्याय-वृत्तं तपस्विनं तत्प्रसूतः कर्माणि कुर्वीत, ब्रह्मप्रसूतं हि क्षत्रमृध्यते न व्यथत इति च विज्ञायते' इति। महाभारते आदिपर्वणि तापत्येऽपि—'यस्तु स्यात्कर्मवृत्तोऽपि पार्थ ब्रह्मपुरस्कृतः। जयेन्नक्तंचरान्सर्वान्स पुरोहितधूर्गतः॥ तस्मात्तापत्य यत्किंचिन्नृणां श्रेय इहेप्सितम्। तस्मिन्कर्मणि योक्तव्या दान्तात्मानः पुरोहिताः॥ वेदे षडङ्गनिरताः शुचयः सत्यवादिनः। धर्मात्मानः कृतात्मानः स्युर्नृपाणां पुरोहिताः॥ जयश्च नियतो राज्ञः स्वर्गस्तस्मादनन्तरम्। यस्य स्याद्धर्मविद्वाग्मी पुरोधाः शीलवान्शुचिः॥ लाभं लब्धुमलब्धुं वा लब्धं च परिरक्षितुम्। पुरोहितं प्रकुर्वीत राजा गुणसमन्वितम्॥ पुरोहितमते तिष्ठेद्य इच्छेद्भूतिमात्मनः। प्राप्तुं वसुमतीं सर्वां सर्वशः सागराम्बराम्॥ न हि केवलशौर्येण तापत्याभिजनेन च। जयेदब्राह्मणः कश्चिद्भूमिं भूमिपतिः क्वचित्॥ तस्मादेवं विजानीहि कुरूणां वंशवर्धन। ब्राह्मणप्रमुखं राज्यं शक्यं पालयितुं चिरम्'

इति ॥ तथा आरण्यके युधिष्ठिरदाल्भ्यसंवादेऽपि—
'ब्रह्म क्षत्त्रेण संसृष्टं क्षत्त्रं च ब्रह्मणा सह । उदीर्णं दहतः शत्रून्वनानीवाग्निमारुतौ ॥ नाब्राह्मणस्तात चिरं बभूषेदिच्छन्निमं लोकममुं च जेतुम् । विनीतधर्मार्थमपेतमोहं लब्ध्वा द्विजं नुदति नृपः सपत्नान् ॥ चरन्नैःश्रेयसं धर्मं प्रजापालनकारितम् । नाध्यगच्छद्बलिर्लोके तीर्थमन्यत्र वै द्विजात् ॥ अनूनमासीदसुरस्य कामैर्वैरोचनेः श्रीरपि चाक्षयासीत् । लब्ध्वा महीं ब्राह्मणसंप्रयोगात्तेष्वाचरन्दुष्टमथो व्यनश्यत् ॥ नाब्राह्मणं भूमिरियं स भूतिर्वर्णं द्वितीयं भजते चिराय । समुद्रनेमिर्नमते तु तस्मै यं ब्राह्मणः शास्ति नयैर्विनीतम् ॥ कुञ्जरस्येव संग्रामे परिगृह्याङ्कुशग्रहम् । ब्राह्मणैर्विग्रहीणस्य क्षत्त्रस्य क्षीयते बलम् ॥ ब्राह्मणान्न परा दृष्टिः क्षात्त्रमप्रतिमं बलम् । तौ यदा चरतः सार्धं तदा लोकः प्रसीदति ॥ यथा हि सुमहानग्निः कक्षं दहति सानिलः । तथा दहति राजन्यो ब्राह्मणेन समं रिपुम् ॥ ब्राह्मणेष्वेव मेधावी बुद्धिवीर्येण संचरेत् । अलब्धस्य

च लाभाय लब्धस्य परिवृद्धये ॥ अलब्धलाभाय च लब्ध-वृद्धये यथार्हतीर्थप्रतिपादनाय । यशस्विनं वेदविदं विप-श्चितं बहुश्रुतं ब्राह्मणमेव वासय ॥ ब्राह्मणेषूत्तमा वृत्ति-स्तव नित्यं युधिष्ठिर । तेन ते सर्वलोकेषु दीप्यते प्रथितं यशः' इति । चतुर्दशे सर्गे—

अथ संवत्सरे पूर्णे तस्मिन्प्राप्ते तुरंगमे ।
सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥

ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः ।
न चाद्भुतमभूत्तत्र स्खलितं वापि किंचन ।
दृश्यते ब्रह्मवत्सर्वं क्षेमयुक्तं हि चक्रिरे ॥

अनेन यज्ञकर्मणि विहिते काले यथाविध्यनुष्ठानकुश-लैरभिज्ञैरास्तिकैर्ऋत्विग्भिरन्यूनानतिरेकेण अनुष्ठातव्य-मिति सूचितम् ॥

न तेष्वहःसु श्रान्तो वा क्षुधितो वापि दृश्यते ।
अन्नपानैः सुविहितास्तस्मिन्यज्ञे महात्मनः ॥

अन्नं हि विधिवत्स्वादु प्रशंसन्ति द्विजर्षभाः ।
अहो तृप्ताः स्म भद्रं त इति शुश्राव राघवः ॥

अनेनाविशेषेणागताः सर्वे ब्राह्मणा मृष्टान्नदानेन तोषणीया इति सूचितम् ॥

कर्मान्तरे तदा विप्रा हेतुवादान्बहूनपि ।
प्राहुः सुवाग्मिनो धीराः परस्परजिगीषया ॥

अनेन दिदृप्सुभिः सदसो बहिरासीनैः प्रयोगाविरोधेन अन्तरालकाले स्वस्वविद्यातिशयप्रख्यापनाय वादकुशलैर्भवितव्यं न तु कर्मकाले इति सूचितम् । तथा च भारते सभापर्वणि— 'कर्मान्तरसमायत्ता जजल्पुरमितौजसः । इदमेवं न चाप्येवमेवमेव न चान्यथा ॥ प्रत्यूचुर्बहवस्तत्र वितण्डावादिनो द्विजाः । कृशानर्थांस्ततः केचिदकृशांस्तत्र कुर्वते ॥ अकृशांश्च कृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चयैः । अर्थं मेधाविनः केचिदनुमानैः प्रपूरितम् ॥ विचिक्षिपुर्यथा श्येना नभोगतमिवामिषम् ॥ केचिद्धर्मार्थकुशलाः केचित्तत्र महाव्रताः । रेमिरे

कथयन्तश्च सर्वभाष्यविदां वराः' इति ॥

नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः ।
सदस्यस्तस्य वै राज्ञो नावादकुशलो द्विजः ॥

अनेन सदस्यैरपि नियतैः साङ्गवेदविद्भिस्तत्त्वनिर्धारणकुशलैर्बहुभिर्भवितव्यमिति सूचितम् ॥

पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियाः ।
ऋत्विक्परमसंपन्नः श्रपयामास शास्त्रतः ॥

धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः ।
यथाकालं यथान्यायं निर्णुदन्पापमात्मनः ॥

अनेन अश्ववपाधूमगन्धाघ्राणस्य समस्तपापनिवर्तकत्वप्रतिपादनेनाङ्गिनोऽध्वमेधस्य फलातिशयः सूचितः । तथा च महाभारतेऽपि धूमगन्धाघ्राणं पावनमुक्तम्– 'तं वपाधूमगन्धं तु धर्मराजः सहानुजैः । उपाजिघ्रद्यथाशास्त्रं सर्वपापापहं तदा' इति ॥

ऋतुं समाप्य तु तदा न्यायतः पुरुषर्षभः ।
ऋत्विग्भ्योऽपि ददौ राजा धरां तां ऋतुवर्धनः ॥

ऋत्विजस्त्वब्रुवन्सर्वे राजानं गतकल्मषम् ॥
भवानेव महीं कृत्स्नामेको रक्षितुमर्हति ।

न भूम्या कार्यमस्माकं न हि शक्ताः स्म पालने ॥
रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ।

निष्क्रयं किंचिदेवेह प्रयच्छतु भवानिति ॥
मणिरत्नं सुवर्णं वा गावो यद्वा समुद्यतम् ।

तत्प्रयच्छ नरश्रेष्ठ धरण्या न प्रयोजनम् ॥
एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः ।

गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ॥
दश कोटीः सुवर्णस्य रजतस्य चतुर्गुणम् ।

अनेन यजमानेन दक्षिणाकाले विहितमभ्यर्हितमपि पृथ्व्यादिकं ऋत्विग्भ्यो देयमेव । ऋत्विग्भिरपि भोग्य-

मपि । तद्रक्षणाशक्तौ विनिमाय निष्क्रयो ग्राह्य इति धर्मः सूचितः । तथा अविक्रेयमपि गवाश्वादि दक्षिणा-द्रव्यं विनिमयेन ग्राह्यम् इति सूचितम् ॥

ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ।
जाम्बूनदं कोटिसंख्यं ब्राह्मणेभ्यो ददौ तदा ॥

अनेन प्रसर्पकेभ्योऽपि बहु देयमिति सूचितम् ॥

दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् ।
कस्मैचिद्याचमानाय ददौ राघवनन्दनः ॥

अनेन क्रतुसमाप्त्यनन्तरं याचमानेभ्योऽपि तत्तद्-भीष्टं यथाशक्ति देयमिति सूचितम् ॥

तस्याशिषोऽथ विविधा ब्राह्मणैः समुदीरिताः ।
उदारस्य नृवीरस्य धरण्यां प्रणतस्य च ॥

अनेन यज्ञान्ते ब्राह्मणान्नमस्कृत्य तेभ्यो यज्ञसमृद्ध्या-द्याशिषो ग्राह्याः ॥

ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ।
पापापहं स्वर्णयनं दुस्तरं पार्थिवर्षभैः ॥

ततोऽब्रवीदृश्यशृङ्गं राजा दशरथस्तदा ।
कुलस्य वर्धनं तन्तुं कर्तुमर्हसि सुव्रत ॥

तथेति च स राजानमुवाच द्विजसत्तमः ।
भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥

पञ्चदशे सर्गे—

मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरम् ।
लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥

इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् ।
अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥

ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात् ।
जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
भागं प्रतिग्रहार्थं वै समवेता यथाविधि ॥

ताः समेत्य यथान्यायं तस्मिन्सदसि देवताः ।
अब्रुवल्लोककर्तारं ब्रह्माणं वचनं महत् ॥

भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ।
सर्वान्नो बाधते वीर्याच्छासितुं तं न शक्नुमः ॥

त्वया तस्मै वरो दत्तः प्रीतेन भगवन्पुरा ।
मानयन्तश्च तं नित्यं सर्वे तस्य क्षमामहे ॥

उद्वेजयति लोकांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः ।
शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति ॥

ऋषीन्यक्षान्सगन्धर्वानसुरान्ब्राह्मणांस्तथा ।
अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥

नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः ।
चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते ॥

तन्महन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात् ।
वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥

एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् ।
हन्तायं विहितस्तस्य वधोपायो दुरात्मनः ॥

तेन गन्धर्वयक्षाणां देवदानवरक्षसाम् ।
अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च तन्मया ॥

नाकीर्तयदवज्ञानात्तद्रक्षो मानुषं तदा ।
तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योऽस्य विद्यते ॥

एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम् ।
देवा महर्षयः सर्वे प्रहृष्टास्तेऽभवंस्तदा ॥

एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः ।
शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ।
ब्रह्मणा च समागम्य तत्र तस्थौ समाहितः ॥

तमब्रुवन्सुराः सर्वे समभिष्टुत्य संनताः ।
त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया ॥

राज्ञो दशरथस्य त्वमयोध्याधिपतेः प्रभो ।
धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः ॥

तस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च ।
विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम् ॥

तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ।
अवध्यं दैवतैर्विष्णो समरे जहि रावणम् ॥

स हि देवान्सगन्धर्वान्सिद्धांश्च मुनिसत्तमान् ।
राक्षसो रावणो मूर्खो वीर्योत्सेकेन बाधते ॥

ऋषयश्च ततस्तेन गन्धर्वाप्सरसस्तथा ।
क्रीडन्तो नन्दनवने रौद्रेण किल हिंसिताः ॥

वधार्थं वयमायातास्तस्य वै मुनिभिः सह ।
सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः ॥

त्वं गतिः परमा देव सर्वेषां नः परंतप ।
वधाय देव शत्रूणां नृणां लोके मनः कुरु ॥

एवमुक्तस्तु देवेशो विष्णुस्त्रिदशपुंगवः ।
पितामहपुरोगांस्तान्सर्वलोकनमस्कृतः ॥

अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान् ।
भयं त्यजत भद्रं वो हितार्थं युधि रावणम् ॥

सपुत्रपौत्रं सामात्यं समित्रज्ञातिबान्धवम् ।
हत्वा क्रूरं दुरात्मानं देवर्षीणां भयावहम् ॥

दश वर्षसहस्राणि दश वर्षशतानि च ।
वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम् ॥

एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ।
मानुषे चिन्तयामास जन्मभूमिमथात्मनः ॥

ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधम् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥

ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः ।
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम् ॥

त्वमुद्धतं रावणमृद्धतेजसं
प्रवृद्धदर्पं त्रिदशेश्वरद्विषम् ।
विरावणं साधुतपस्विकण्टकं
तपस्विनामुद्धर तं भयावहम् ॥

तमेव हत्वा सबलं सबान्धवं
विरावणं रावणमग्र्यपौरुषम् ।
स्वर्लोकमागच्छ गतज्वराश्चिरं
सुरेन्द्रगुप्तं गतरोषकल्मषम् ॥

इत्यनेन ऋश्यशृङ्गेण पुत्रोत्पत्त्यर्थं पुत्रेष्टिरारब्धा । तस्मिन्काले रावणोपद्रवपरिहारार्थं देवैर्ब्रह्मा याचितः । तेन तु मानुषेण तस्य वधं निश्चित्य भगवान्विष्णुर्नियोजितः । भगवता विष्णुनाप्येवं करिष्यामीति प्रतिज्ञातम् । रावणस्य दुराचारोऽपि प्रतिपादितः । इत्येत-

त्सर्वं कथितम् । अनेन सर्वेश्वरस्य नियोज्यस्य निकृष्ट-मानुषतनुपरिग्रहपूर्वकं सकललोकबाधकरावणवधनियोग-प्रतिपादनेन आपदि गुर्वादेरपि तदेकसाध्यकर्मणि नि-योगो न दोषायेति सूचितम् । षोडशे सर्गे— 'ततो नारायणो देवः' इत्यारभ्य 'सुराणां विष्णुरात्मवान्' इत्यन्तेन देवैरुपायप्रतिपादनपूर्वकं प्रार्थितो विष्णुः ॥

पितरं रोचयामास तदा दशरथं नृपम् ।
स चाप्यपुत्रो नृपतिस्तस्मिन्काले महाद्युतिः ॥

अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ।
स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् ॥

अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः ।
ततो वै यजमानस्य पावकादतुलप्रभम् ॥

प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम् ।
कृष्णं रक्ताम्बरधरं रक्तास्यं दुन्दुभिस्वनम् ॥

स्निग्धहर्यक्षतनुजं श्मश्रुप्रवरमूर्धजम् ।
शुभलक्षणसंपन्नं दिव्याभरणभूषितम् ॥

शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम् ।
दिवाकरसमाकारं दीप्तानलशिखोपमम् ॥

तप्तजाम्बूनदमयीं राजतान्तपरिच्छदाम् ।
दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् ॥

प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ।
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपम् ॥

प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ।
तमद्भुतं तदा राजा प्रत्युवाच कृताञ्जलिः ॥

भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ।
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् ॥

राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया ।
इदं तु नृपशार्दूल पायसं देवनिर्मितम् ॥

प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम् ।
पार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ॥

तासु त्वं प्राप्स्यसे पुत्रान्यदर्थं यजसे नृप ।
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् ॥

पात्रीं दिव्यान्नसंपूर्णां देवदत्तां हिरण्मयीम् ।
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनम् ॥

मुदा परमया युक्तः चकाराभिप्रदक्षिणम् ।
ततो दशरथः प्राप्य पायसं देवनिर्मितम् ॥

बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ।
ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् ॥

निर्वर्तयित्वा तत्कर्म तत्रैवान्तरधीयत ।
हर्षरश्मिभिरुद्द्योतं तस्यान्तःपुरमाबभौ ॥

शारदस्याभिरामस्य चन्द्रस्येव नभोंशुभिः ।
सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ॥

पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ।
कौसल्यायै नरपतिः पायसार्धं ददौ तदा ॥

अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ।
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ॥

प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ।
अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः ॥

एवं तासां ददौ राजा भार्याणां पायसं पृथक् ।
तास्त्वेतत्पायसं प्राज्यं नरेन्द्रस्योत्तमाः स्त्रियः ॥
संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥

ततस्तु ताः प्राश्य तदुत्तमस्त्रियो
महीपतेरुत्तमपायसं पृथक् ।
हुताशनादित्यसमानतेजसो-
ऽचिरेण गर्भान्प्रतिपेदिरे तदा ॥

ततस्तु राजा प्रसमीक्ष्य ताः स्त्रियः
प्ररूढगर्भाः प्रतिलब्धमानसः ।

बभूव हृष्टस्त्रिदिवे यथा हरिः
सुरेन्द्रसिद्धर्षिगणाभिपूजितः ॥

अनेन वेदोक्तपुत्रीयेष्ट्या सद्यस्तत्फलरूपपुत्रप्राप्त्या यथाविध्यनुष्ठितं सर्वं वैदिकं कर्म अवश्यं फलं प्रयच्छतीति ज्ञापितम्। सप्तदशे सर्गे—

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः।
उवाच देवताः सर्वाः स्वयंभूर्भगवानिदम् ॥

सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः।
विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः ॥

मायाविदश्च शूरांश्च वायुवेगसमाञ्जवे।
नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान् ॥

असंहार्यानुपायज्ञान्दिव्यसंहननान्वितान्।
सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव।
सृजध्वं हरिरूपेण पुत्रानतुलविक्रमान् ॥

पूर्वमेव मया सृष्टो जाम्बवानृक्षपुंगवः ।
जृम्भमाणस्य सहसा मम वक्त्रादजायत ॥

ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् ।
जनयामासुरेवं ते पुत्रान्वानररूपिणः ॥

ऋषयश्च महात्मानः सिद्धविद्याधरोरगाः ।
चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥

वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमूर्जितम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥

बृहस्पतिस्त्वजनयत्तारं नाम महाहरिम् ।
सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमम् ॥

धनदस्य सुतः श्रीमान्वानरो गन्धमादनः ।
विश्वकर्मा त्वजनयन्नलं नाम महाहरिम् ॥

पावकस्य सुतः श्रीमान्नीलोऽग्निसदृशप्रभः ।
तेजसा यशसा वीर्यादत्यरिच्यत वानरान् ॥

रूपद्रविणसंपन्नावश्विनौ रूपसंमतौ ।
मैन्दं च द्विविदं चैव जनयामासतुः स्वयम् ॥

वरुणो जनयामास सुषेणं नाम वानरम् ।
शरभं जनयामास पर्जन्यः सुमहाबलम् ॥

मारुतस्यात्मजः श्रीमान्हनूमान्नाम वानरः ।
वज्रसंहननोपेतो वैनतेयसमो जवे ॥

सर्ववानरमुख्येषु बुद्धिमान्बलवानपि ।
ते सृष्टा बहुसाहस्रा दशग्रीववधे रताः ॥

अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः ।
ते गजाचलसंकाशा वपुष्मन्तो महाबलाः ॥

ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ।
यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥

अजायत समस्तेन तस्य तस्य सुतः पृथक् ।
सिंहशार्दूलसदृशा दर्पेण च बलेन च ॥

शिलाप्रहरणाः सर्वे सर्वे पादपयोधिनः ।
नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः ॥

विचालयेयुः शैलेन्द्रान्भेदयेयुः स्थिरान्द्रुमान् ।
क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम् ॥

दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवम् ।
नभःस्थलं विशेयुश्च गृह्णीयुरपि तोयदान् ॥

गृह्णीयुरपि मातङ्गान्मत्तान्प्रव्रजितान्वने ।
नर्दमानाश्च नादेन पातयेयुर्विहंगमान् ॥

ईदृशानां प्रसूतानि हरीणां कामरूपिणाम् ।
शतं शतसहस्राणि यूथपानां महात्मनाम् ॥

ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ।
सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम् ॥

भ्रातराबुपतस्थुस्ते सर्वे एव हरीश्वराः ।
नलं नीलं हनूमन्तमन्यांश्च हरियूथपान् ॥

ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः ।
विचरन्तोऽर्दयन्दर्पात्सिंहव्याघ्रमहोरगान् ॥

तांश्च सर्वान्महाबाहुर्वाली विपुलविक्रमः ।
जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥

तैरियं पृथिवी सर्वा सपर्वतवनार्णवा ।
कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥

तैर्मेघवृन्दाचलकूटकल्पै-
र्महाबलैर्वानरयूथपालैः ।
बभूव भूर्भीमशरीररूपैः
समावृता रामसहायहेतोः ॥

अनेन अवतीर्णस्य श्रीरामस्य साहाय्याय ब्रह्मेन्द्रसूर्य-वाय्वादयो देवाः स्वस्वांशेन जाम्बवद्बालिसुग्रीवहनुमदादिरूपेण ऋक्षवानरादिष्ववतीर्णा इति प्रतिपादनेन न्यायमार्गप्रवृत्तस्य देवा अपि नैकृष्ट्यमङ्गीकृत्य साहाय्याय कल्पन्ते इत्युक्तं भवति । अष्टादशे सर्गे—

निर्वृत्ते तु क्रतौ तस्मिन्हयमेधे महात्मनः ।
प्रतिगृह्य सुरा भागान्प्रतिजग्मुर्यथागतम् ॥

प्रविवेश पुरीं राजा सभृत्यबलवाहनः ।
उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥

ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥

नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥

प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ।
कौसल्याजनयद्रामं दिव्यलक्षणसंयुतम् ॥

विष्णोरर्धं महाभागं पुत्रमिक्ष्वाकुनन्दनम् ।
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ॥

यथा वरेण देवानामदितिर्वज्रपाणिना ।
भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ॥

साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ।
अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत्सुतौ ॥

वीरौ सर्वास्त्रकुशलौ विष्णोरर्धसमन्वितौ ।
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ॥

सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ।
राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ॥

गुणवन्तोऽनुरूपाश्च रुच्याः प्रोष्ठपदोपमाः ।
जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः ॥

देवदुन्दुभयो नेदुः पुष्पवृष्टिस्तु खाच्च्युता ।
उत्सवश्च महानासीदयोध्यायां जनाकुलः ॥

अत्र संवत्सरमुखोत्तरायणवसन्तचैत्रमासशुक्लपक्षदेवनक्षत्रदिवाभिजिल्लग्नपुण्यनक्षत्राद्युत्कृष्टकाले कर्कटकलग्ने उच्चस्थग्रहपञ्चके गुरुचन्द्रयोगे श्रीरामोत्पत्तिः तस्य सर्वोत्कृष्टतां सकलकल्याणगुणाभिरामतां सकलशिष्टादरणीयसंपत्तिं महापराक्रमं च सूचयति । संवत्सरमुखस्य प्रश-

स्तता च— 'चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः' इति श्रुत्वा चित्रापूर्णमासस्य संवत्सरमुखत्वेन प्रशस्तता प्रतिपादनात्सिद्धा । अनयैव श्रुत्वा चैत्रमासस्यापि । तथा 'मुखं वा एतद्दतूनां यद्वसन्तः' इति श्रुत्वा वसन्तस्य 'यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे याजयेत् वसीयानेव भवति' इति श्रुत्वा पूर्वपक्षस्य 'यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी स्यात्' इति श्रुत्या देवनक्षत्रस्य 'समानस्याहुः पञ्च पुण्यानि नक्षत्राणि' इति श्रुत्या पुण्यनक्षत्रस्य प्रशस्तता सिद्धा । तथा 'तृतीये वर्षे चौलम्' 'अष्टमे वर्षे ब्राह्मणमुपनयेत्' एतेन 'गोदानं षोडशे वर्षे' इत्यादिसूत्रैर्नियतसंवत्सरेषु चौलोपनयनगोदानादिषु 'उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः' 'वसन्ते ब्राह्मणमुपनयेत्' इत्यादिसूत्रकारैरुदगयनादिकालनियमं कुर्वद्भिः पुंसवनमनवलोभनं च यदि नाधीया 'तृतीये गर्भमासे चतुर्थे गर्भमासे सीमन्तोन्नयनम्' 'षष्ठेऽष्टमे वा' 'षष्ठे मास्यन्नप्राशनम्' इति

सूत्रैर्नियतमासेषु पुंसवनादिकर्मसु आपूर्यमाणपक्षे 'यदा पुंसा नक्षत्रेण चन्द्रमा युक्तः स्यात्' इति सूत्रेण असंभावितोदगयनादिपरित्यागेन संभावितापूर्यमाणपक्षादिनियमं कुर्वद्भिः आश्वलायनादिसूत्रकारैः तथा 'एकादशे द्वादशे वा पिता नाम कुर्यात्' इति श्रुतिनियतकाले नामकरणे असंभावितकालपरित्यागेनाह 'पुण्याहेषु कार्याणि' इति सूत्रेण संभावितमध्याह्नपुण्यनक्षत्रसंग्रहकृद्भिः आपस्तम्बाचार्यैश्च 'उदगयनपूर्वपक्षपुण्याहसंनिपाते यज्ञकालो नादेशः' इति वदद्भिः द्राह्यायणाचार्यैश्च उक्तानां कालानां सर्वेषु उत्कृष्टकर्मसु नियमनात्प्रशस्तता सिद्धा। जनने तत्कालस्य क्षणादिरूपस्य सूक्ष्मत्वात्। उदगयनादिनियमनासंभवात् सूत्रकारैरुदगयनादिकालानियमनेऽपि अर्थादेतादृशकालप्राप्तेः प्रशस्तता उक्तप्रायैव। अत एव एतद्व्यतिरिक्तकालोत्पन्नस्य दुष्टफलम् उक्तकालोत्पन्नस्य तु प्रशस्तं फलं प्रतिपादयद्भिर्ज्यौतिषिकैरपि उक्तकालानां फलमुखेन प्राशस्त्यमेव प्रतिपाद्यते। ज्यौतिषिके जातकाभरणे 'तत्र निन्दितकालफलानि'—तत्र दक्षिणाय-

नस्य—'अखर्वगर्वः कृषिकर्मकर्ता चतुष्पदाढ्योऽतिकठोरचित्तः । शठोऽप्यसह्यो ननु मानवानां याम्यायने नाजननं प्रपन्नः' । कृष्णपक्षस्य—'प्रलापशीलोऽविचलश्च लोलः कलिप्रियः स्वीयकुलोद्धतश्च । मनोभवाधिक्ययुतो नितान्तं सितेतरे यस्य नरस्य जन्म' । रात्रिजननस्य—'कूटकृद्बहुकामार्तः श्वयरोगी मलीमसः । नर्तकोऽतिशठः कृष्णो रात्रिजातो नरो भवेत्' इति एवमादि निन्दितकालफलानि बहुशः सन्ति । विस्तरभिया दिक्प्रदर्शनमत्र कृतम् । अथ प्रशस्तफलानि—तत्र उत्तरायणस्य—'शश्वत्प्रसन्नो ननु सूनृतकान्तां संतोषयुक्तो नितरां चिरायुः । नरः सदाचारपरोऽत्युदारो धीरश्च सौम्यायनजातजन्मा' । वसन्तस्य—'कंदर्परूपो मतिमान्प्रतापी संगीतशास्त्रे गणिते प्रवीणः । शास्त्रप्रसूनामलचेलचेता वसन्तजन्मा मनुजः प्रसन्नः' । चैत्रमासस्य—'सत्कर्मविद्याविनयोपपन्नो भोगी नरः स्यान्मधुरान्नभोक्ता । सत्पात्रमित्रानुरतश्च मन्त्री चैत्रोद्भवश्चापि विचित्रमन्त्रः' । शुक्लपक्षस्य—'चञ्चच्चिरायुः सुतरां सु-

शीलः श्रीपुत्रवान्कोमलकायकान्तिः। सदा सदानन्द-विनीतकालश्चेज्जन्मकालस्तु वलक्षपक्षे'। नक्षत्रस्य— 'प्रभूतमित्रः कृतशास्त्रयत्नः सद्रत्नचामीकरभूषणाढ्यः। दाता प्रतापी वसुधा वसुश्च पुनर्वसू यस्य भवेत्प्रसूतिः'। दिवाजननस्य— 'तेजस्वी पितृसादृश्यः शुभदृष्टिर्नृपप्रियः। बन्धुपूज्यो धनाढ्यश्च दिवा जातो न संशयः'। कर्कटकलग्नस्य— 'मृष्टान्नभुक्साधुरतो विनीतो विलोलबुद्धिर्जलकेलिशीलः। प्रकृष्टसारोऽतितरामुदारो लग्ने कुलीरे हि नरो भवेत्सः'। उच्चग्रहयोगस्य— 'नभश्चराः पञ्च नीचोच्चसंस्थाः यस्य प्रसूतौ स तु सार्वभौमः'। गुरुचन्द्रयोगस्य— 'सदा विनीतो दृढगूढमन्त्रः स्वधर्मकर्माभिरतो नरः स्यात्। परोपकारादरणैकचित्तः सितद्युतौ वाक्पतिना समेते'। मेषगतसूर्यस्य— 'भवति साहसकर्मकरो नरो रुधिरपित्तविकारकलेबरः। क्षितिपतिः सुहितश्च सदा सुखी सुमहसां महसामधिपे क्रिये॥ बलवतां शुभग्रहाणामाचारशौचशुभसत्ययुताः। सुरूपास्तेजस्विनः कृतविदो द्विजदेवभक्ताः॥ पुष्पाम्बरोत्तम-

विभूषणसादराश्च सौम्यग्रहैर्बलयुतैः पुरुषा भवन्ति' इति । तस्मादेतेषां कालानां जनने प्रशस्तत्वात् साधारणानामस्मिन्काले जननासंभवात् अस्य च श्रीरामस्य एतादृशकाले उत्पन्नत्वात् सर्वोत्कृष्टत्वं सकललोकादरणीयाचारवत्त्वं च सिद्धम् । तदा,

रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः ।
गायकैश्च विराविण्यो वादकैश्च तथापरैः ॥

प्रदेयांश्च ददौ राजा सूतमागधवन्दिनाम् ।
ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥

अन्यत्र पुण्यकालः उत्सवकालो न भवति, उत्सवकालः पुण्यकालो न भवति । पुत्रोत्पत्तिकालस्तु पुण्योत्सवोभयात्मकः । तथा च व्यासः— 'देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् । आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा ॥ तत्र दद्यात्सुवर्णं च भूमिं गां तुरगं रथम् । छत्रं च गन्धमाल्यं च शयनं चासनं गृहम्' इति । अत्र पुण्यपूज्यशब्दाभ्यामहः उभयरूपत्वं स्पष्टम् ।

तस्मिन्काले समागतानां देवानां पितृणां च जातेष्टिवृद्धिश्राद्धादिना तृप्तिः कार्या । तथा च बोधायनः— 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इति । 'जातमेव विदित्वा' इति शालीकिः । विष्णुपुराणे 'सचेलस्य पितुः स्नानं जाते पुत्रे विधीयते । जातकर्म तदा कुर्याच्छ्राद्धमाभ्युदयं चरेत्' । त्रिविधानि च दानानि देयानि— अदृष्टार्थं ब्राह्मणेभ्यो गवादिदानम् । उत्सवप्रयुक्ततया बान्धवानां प्रियशंसिने जनाय च यत्तत्प्रीतिदानम् । कीर्त्यर्थं नटे नर्तके दानम् । तथा च महाभारते— 'धर्मार्थं ब्राह्मणे दानं यशोर्थं नटनर्तके' इति । प्रियशंसिनेऽपि देयम् , महतामाचारात् । तथा च माधवीये देवलः— 'दृष्ट्वा प्रियाणि श्रुत्वा हर्षाद्यत्प्रयच्छति । हर्षदानमिति प्राहुर्दानं धर्मविचिन्तकाः' इति । अयोध्याकाण्डे रामाभिषेकप्रियवाक्यशंसिने जनाय,

सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ।
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ।

तथा सुन्दरकाण्डे सीतादर्शनवृत्तान्तं कथयन्तं हनूमन्तं प्रति रामवचनम्—

अहं च रघुवंशश्च लक्ष्मणश्च महाबलः ।
वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥

इदं तु मम दीनस्य मनो भूयः प्रकर्षति ।
यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥

स एव सर्वं भूतस्तु परिष्वङ्गो हनूमतः ।
मया कालमिमं प्राप्य दत्तश्चास्तु महात्मनः ॥

इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे ।
हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥

तथा युद्धकाण्डेऽपि रावणवधसमनन्तरं श्रीरामविजयं शंसन्तं हनूमन्तं प्रति सीतावचनम्—

प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रुतम् ।
प्रहर्षवशमापन्ना निर्वाक्यास्मि क्षणान्तरम् ॥

न हि पश्यामि सदृशं चिन्तयन्ती प्लवंगम ।
मत्प्रियाख्यानकस्येह तव प्रत्यभिनन्दनम् ॥

न हि पश्यामि तत्सौम्य पृथिव्यामपि वानर ।
सदृशं मत्प्रियाख्याने तव दातुं भवेत्समम् ॥

हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च ।
राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितम् ॥

इति । तत्रैवाग्रे रावणवधसमनन्तरं विजयिनः श्रीरामभद्रस्यागमनं कथयन्तमाञ्जनेयं प्रति भरतवचनम्—

देवो वा मानुषो वा त्वमनुक्रोशादिहागतः ।
प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम् ॥

गवां शतसहस्रं च ग्रामाणां च शतं परम् ।
सकुण्डलाः शुभाचारा भार्याः कन्याश्च षोडश ॥

हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः ।
सर्वाभरणसंपन्नाः संपन्नाः कुलजातिभिः ॥

इति। एवं श्रौतस्मार्तोत्सवयोग्यः पुत्रोत्पत्तिदिनसदृशोऽन्यो दिवसो नास्ति। किं बहुना, 'पुत्रस्ते जातः' इति शब्दोच्चारणमपि प्रियसत्यहितरूपत्वात् वाङ्मयतपोरूपम्। तथा च गीतायाम्— 'अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते' इति। भाष्यकारा अपि सत्यप्रियहितवचनत्वेन 'पुत्रस्ते जातः' इति वाक्यमुदाजह्रुः। एतादृशवाक्यवक्तुरपि सर्वं देयमित्याह कालिदासः— 'जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम्। अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे' इति। अतो दशरथेन दानानि दत्तानि, इतरैरपि पुत्रजन्मन्येवमाचरणीयमित्ययं धर्मः सूचितः॥

अतीत्यैकादशाहं तु नामकर्म तथाकरोत्।
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम्॥

सौमित्रिं लक्ष्मण इति शत्रुघ्नमपरं तथा।
वसिष्ठः परमप्रीतो नामानि कृतवांस्तदा॥

ब्राह्मणान्भोजयामास पौरजानपदानपि ।
अददाद्ब्राह्मणानां च रत्नौघममितं बहु ॥

अनेन नामकर्मण्यपि ब्राह्मणपौरजानपदभोजनानि दानानि च कर्तव्यानि इति सूचितम् ॥

तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् ।
तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ।
बभूव भूयो भूतानां स्वयंभूरिव संमतः ॥

सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ।
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः ॥

तेषामपि महातेजा रामः सत्यपराक्रमः ।
इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः ॥

गजस्कन्धेऽश्वपृष्ठे च रथचर्यासु संमतः ।
धनुर्वेदे च निरतः पितृशुश्रूषणे रतः ॥

बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः ।
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥

सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ।
लक्ष्मणो लक्ष्मिसंपन्नो बहिः प्राण इवापरः ॥

न च तेन विना निद्रां लभते पुरुषोत्तमः ।
मृष्टमन्नमुपानीतमश्नाति न हि तं विना ॥

यदा हि हयमारूढो मृगयां याति राघवः ।
तदैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् ॥

भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥

स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ।
बभूव परमप्रीतो देवैरिव पितामहः ॥

ते यथाज्ञानसंपन्नाः सर्वे समुदिता गुणैः ।
ह्रीमन्तः कीर्त्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः ॥

तेषामेवंप्रभावाणां सर्वेषां दीप्ततेजसाम्।
पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा॥

ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः।
पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः॥

अनेन जातकर्मादिसंस्कारविशिष्टस्यैव वेदाध्ययनादि-सर्वविद्याधिकार इति सूचितम्। राज्ञां तु विशेषतो विद्याधिगमो वृद्धोपसेवनं नीतिमार्गानुसारित्वं विनयोपपन्नत्वं चात्यावश्यिकम्। तथा च कामन्दके— 'शास्त्राय गुरुसंयोगः शास्त्रं विनयवृद्धये। विद्याविनीतो नृपतिर्न कृच्छ्रेष्ववसीदति॥ वृद्धोपसेवी नृपतिः सतां भवति संमतः। प्रेर्यमाणोऽप्यसद्वृत्तैर्नाकार्येषु प्रवर्तते॥ आददानः प्रतिदिनं कलाः सम्यङ्महीपतिः। शुक्लपक्षे प्रविचरञ्शशाङ्क इव वर्धते॥ जितेन्द्रियस्य नृपतेर्नीतिमार्गानुसारतः। भवन्त्युज्ज्वलिता लक्ष्म्यः कीर्त्तयश्च नभःस्पृशः॥ गुरुस्तु विद्याधिगमाय सेव्यते श्रुता च विद्या मतये महात्मनाम्। श्रुतानुवर्तीनि मतानि वेध-

सामसंशयं साधु भवन्ति भूतये ॥ भवति हि विनयोपबृंहितो नृपतिशमाय पदाय च क्षमः । सुनिपुणमुपसेव्य सद्गुरुं चिरमनुवृत्तिपरो विभूतये ॥ अविनयरतमादरादृते वशमवशं च नयन्ति विद्विषः । श्रुतविनयविधिः समाश्रितस्तनुरपि नैति पराभवं क्वचित्' इति ॥

अथ राजा दशरथस्तेषां दारक्रियां प्रति ।
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ॥

अनेन विद्याग्रहणानन्तरं दारक्रियेति सूचितम् । तथा च गौतमः— 'विद्यान्ते गुरुरर्थेन निमन्त्र्य कृतानुज्ञातस्य वा स्नानम्' इति । याज्ञवल्क्योऽपि— 'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्' इति ॥

तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ।
अभ्यागच्छन्महातेजा विश्वामित्रो महामुनिः ॥

प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः ।
स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतः ॥

प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् ।
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ।
कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् ॥

पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च ।
वसिष्ठं च समागम्य कुशलं मुनिपुंगवः ॥

ऋषींश्चान्यान्यथान्यायं महाभागानुवाच ह ।
ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनम् ॥

विविशुः पूजितास्तत्र निषेदुश्च यथार्हतः ।
अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ॥

उवाच परमोदारो हृष्टस्तमभिपूजयन् ।
यथा मृतस्य संप्राप्तिर्यथा वर्षमनूदके ॥

यथा सदृशदारेषु पुत्रजन्म प्रशस्यते ।
प्रनष्टस्य यथा लाभो यथा हर्षो महोदयः ॥

तथैवागमनं मन्ये स्वागतं ते महामुने ।
कं च ते परमं कामं करोमि किमु हर्षितः ॥

पात्रभूतोऽसि मे ब्रह्मन्दिष्टया प्राप्तोऽसि धार्मिक ।
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥

पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ।
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि बहुधा मया ॥

तदद्भुतमिदं विप्र पवित्रं परमं मम ।
शुभक्षेत्रगतश्चाहं तव संदर्शनात्प्रभो ॥

ब्रूहि यत्प्रार्थितं तुभ्यं कार्यमागमनं प्रति ।
इच्छाम्यनुगृहीतोऽहं त्वदर्थपरिवृद्धये ॥

कार्यस्य न विमर्शं च गन्तुमर्हसि कौशिक ।
कर्ता चाहमशेषेण दैवतं हि भवान्मम ॥

मम चायमनुप्राप्तो महानभ्युदयो द्विज ।
तवागमनजः कृत्स्नो धर्मश्चानुत्तमो मम ॥

इति हृदयसुखं निशम्य वाक्यं
श्रुतिसुखमात्मवता विनीतमुक्तम् ।
प्रथितगुणयशा गुणैर्विशिष्टः
परमऋषिः परमं जगाम हर्षम् ॥

अत्र सकलगुणाभिरामस्य रामस्य दारक्रियां चिन्तयन्तं दशरथं प्रति विश्वामित्रागमनम् 'अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्' इति स्मरणात् चिन्तासमये महतामाकस्मिकप्राप्तिः चिन्तितार्थप्रदेति सूचयन्ति । तदागमनसमनन्तरं च तत्कृताभ्युद्गमनासनार्घ्यप्रदानाभीष्टदानं प्रतिज्ञाभिरन्येषामपि महदागमने एवं कर्तव्यता सूचिता । एकोनविंशे—

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥

सदृशं राजशार्दूल तवैतद्भुवि नान्यतः ।
महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः ॥

यत्तु मे हृद्गतं कार्यं तस्य कार्यस्य निश्चयम् ।
कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः ॥

अनेन महत्संनिधौ महापुरुषाधिष्ठितेन महावंशप्रसूतेन उपचारार्थमपि निर्वाह्यमेव वक्तव्यम्, अनिर्वाह्यं यत्किंचिन्न वक्तव्यम्, इति सूचितम्। अनन्तरम् 'अहं नियममातिष्ठे' इत्यादिना सुबाहुमारीचप्रयुक्तस्वयज्ञविघ्नमुपन्यस्य,

न च क्रोधं समुत्स्रष्टुं बुद्धिर्भवति पार्थिव ।
तथाभूता हि सा चर्या न शापस्तत्र मुच्यते ॥

इत्युक्तवान्। अनेन नियमनिष्ठेन स्वकर्मविरोधपरिहारार्थमपि कोपो न कर्तव्य इति सूचितम् ॥

स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ।
काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥

शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ।
राक्षसा विघ्नकर्तारं एतेषामपि नाशने ॥

श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ।
राजंस्त्रिष्वपि लोकेषु येन ख्यातिं गमिष्यति ॥

न च तौ राममासाद्य शक्तौ स्थातुं कथंचन ।
न च तौ राघवादन्यो हन्तुमुत्सहते पुमान् ।
न च पुत्रकृतं स्नेहं कर्तुमर्हसि पार्थिव ॥

अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ।
वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः ॥

यदि त्वं धर्मलाभं च यशश्च परमं भुवि ।
स्थिरमिच्छसि राजेन्द्र रामं मे दातुमर्हसि ॥

इत्यनेन कल्पस्थायियशोलाभाय अतिबालः परमप्रेमास्पदं ज्येष्ठपुत्रोऽपि देय इति विश्वामित्रवचनेन अन्येनापि तादृशफलार्थिना परमप्रेमास्पदमपि वस्तु सत्पात्रे देयम् इति सूचितम् । ततः,

यद्यभ्यनुज्ञां काकुत्स्थ ददते तव मन्त्रिणः ।
वासिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय ॥

अनेन राज्ञा मन्त्रिपुरोहिताभ्यनुज्ञातेनैव कार्यं कर्तव्यम् इति सूचितम् । विंशैकविंशयोः—

षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक ।
दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसि ॥

चतुर्णामात्मजानां हि प्रीतिः परमिका मम ।
ज्येष्ठं धर्मप्रधानं च न रामं नेतुमर्हसि ॥

कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ।
बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् ॥

इति ।

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥

पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि ।
राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ॥

इति । एतद्वंश्यानामर्थिवैमुख्याकरणं धर्म उक्तः ।

अयमर्थः विष्णुपुराणे सौभरिणाख्यातः— 'निर्वेष्टुकामोऽस्मि नरेन्द्र कन्यां प्रयच्छ मे मा प्रणयं विभाङ्क्षीः। न ह्यर्थिनः कार्यवशादुपेताः ककुत्स्थवंशे विमुखाः प्रयान्ति॥ अन्येऽपि सन्त्येव नृपाः पृथिव्यां मान्धातरेषां तनयाः प्रसूताः। किं त्वर्थिनामर्थितदानदीक्षाकृतव्रतं श्लाघ्यमिदं कुलं ते' इति। तथा च कालिदासः— गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम्। गतो वदान्यान्तरमित्यवैमि मा भूत्परीवादनवावतारः' इति।

यदीदं ते क्षमं राजन्गमिष्यामि यथागतम्।
मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सबान्धवः॥

तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः।
चचाल वसुधा कृत्स्ना विवेश च भयं सुरान्॥

त्रस्तरूपं तु विज्ञाय जगत्सर्वं महामुनिः।
नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत्॥

इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः ।
मतिमान्सुव्रतः श्रीमान्न धर्मं हातुमर्हसि ॥

संश्रुत्यैवं करिष्यामीत्युक्त्वा वाक्यमकुर्वतः ।
इष्टापूर्तवधो भूयात्तस्माद्रामं विसर्जय ॥

कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ।
गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥

एष विग्रहवान्धर्म एष वीर्यवतां वरः ।
एष बुद्ध्याधिको लोके तपसश्च परायणम् ॥

सर्वास्त्राणि भृशाश्वस्य पुत्राः परमधार्मिकाः ।
कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ॥

अपूर्वाणां च जनने शक्तो भूयश्च धर्मवित् ।
न रामगमने राजन्संशयं गन्तुमर्हसि ॥

तेषां निग्रहणे शक्तः स्वयं तु कुशिकात्मजः ।
तव पुत्रहितार्थाय त्वामुपेत्य हि याचते ॥

अनेन पुत्रस्नेहेन प्रतिश्रुतार्थविमुखं राजानं तेन च कुपितं विमुखं विश्वामित्रमवेक्ष्य सकलभुवनक्षोभकरं विश्वामित्रक्रोधकृतसर्वनाशपरिजिहीर्षया प्रतिश्रुतार्थपरित्यागजनितेष्टापूर्तवधादिपरिजिहीर्षया च वसिष्ठकृतोपपत्तिप्रतिपादनपूर्वकं प्रतिश्रुतार्थदानप्रतिपादनेन उत्पथं प्रतिपन्नो राजा मन्त्रिभिः शिक्षणीय इति सूचितम् ॥

इति मुनिवचनात्प्रसन्नचित्तो
रघुवृषभश्च मुमोद भास्वराङ्गः ।
गमनमभिरुरोच राघवस्य
प्रथितयशाः कुशिकात्मजाय बुद्ध्या ॥

अनेन मन्त्रिणा समये कृतो हितोपदेशः भूष्णुना राज्ञाङ्गीकर्तव्य इति सूचितम् । तथा च कामन्दकः— 'सज्जमानमकार्येषु निरुन्ध्युर्मन्त्रिणो नृपम् । गुरूणामिव चैतेषां शृणुयाद्वचनं नृपः ॥ नृपस्य ते हि सुहृदस्त एव गुरवो मताः । य एनमुत्पथगतं वारयन्त्यनिवारिताः ॥ सज्जमानमकार्येषु सुहृदो वारयन्ति ये । न केवलं ते सुहृदो गुरवो गुरवो हि ते' इति । द्वाविंशे—

कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च ।
पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥

स्वपुत्रं मूर्ध्न्युपाघ्राय राजा दशरथः प्रियम् ।
ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना ॥

अनेन गुरुजनैः स्वस्त्ययनपूर्वकमेव महाफलकार्याय पुत्रादिः प्रेषणीय इति सूचितम् । तथा च ऐतरेयब्राह्मणम्— 'ते देवा अब्रुवन् गायत्री त्वं न इमं सोमं राजानमाहर इति, सा तथेत्यब्रवीत्, तां वै मा सर्वेण स्वस्त्ययनेनानुमन्त्रयध्वमिति, तथेति सोदपतत्, तां देवाः सर्वेण स्वस्त्ययनेनान्वमन्त्रयन्त प्रेति चेति चेत्येतद्वै सर्वं स्वस्त्ययनं यत्प्रेति चेति, चेति तद्योऽस्य प्रियः स्यात्तमेतेनानुमन्त्रयेत प्रेति चेति चेति, स्वस्त्येव गच्छेति, स्वस्ति पुनरागच्छतीति' । तत्रापि प्रथमं मातृकृतमङ्गलप्रतिपादनेन इतरकृतमङ्गलापेक्षया मातृकृतमङ्गलस्यावश्यिकता व्यतिरेकेणान्वयेन च सूचिता । व्यतिरेकस्तावत् पाण्डवाञ्जेतुकामो दुर्योधनः 'शिवमाशंस मे मातः युध्यमान-

स्य शत्रुभिः' इति अष्टादशाहान्यपि स्वमातरं गान्धारीं प्रार्थितवान्। सा च 'यतो धर्मस्ततो जयः' इति वदन्ती मङ्गलं न कृतवती। स च तदभावादेव विपरीतं फलं प्राप्तवान्। अयमर्थो महाभारते स्त्रीपर्वणि पुत्रशतवधजनितामर्षेण पाण्डवाञ्शमुमुद्युक्तां गांधारीं सान्त्वयता व्यासेन स्पष्टीकृतः। तथा हि— 'न कोपः पाण्डवे कार्यो गांधारि शममाप्नुहि। रजो निगृह्यतामेतच्छृणु चेदं वचो मम॥ उक्तास्यष्टादशाहानि पुत्रेण जयमिच्छता। शिवमाशंस मे मातर्युध्यमानस्य शत्रुभिः॥ सा तथा वाच्यमाना त्वं काले काले जयैषिणा। उक्तवत्यसि गांधारि यतो धर्मस्ततो जयः॥ न चाप्यतीतां गांधारि वाचं ते वितथामहम्। स्मरामि भाषमाणायास्तथा प्राणहिता ह्यसि' इति। अन्वयस्तु अयोध्याकाण्डे,

शापितासि मम प्राणैः कुरु स्वस्त्ययनं मम।

इति मातृमङ्गलमेव रामः प्रार्थितवान्। तस्मै सापि

यं पालयसि धर्मं त्वं धृत्या च नियमेन च ।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥

इत्यादिना ग्रन्थेन, स्वयं मङ्गलं विदधती

यन्मङ्गलं सुपर्णस्य विनताकल्पयत्पुरा ।
अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥

अमृतोत्पादने दैत्यान्हतो वज्रधरस्य च ।
अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥

इति मातृमङ्गलान्येव प्रयुक्तम् ॥

विश्वामित्रो ययावग्रे ततो रामो महायशाः ।
काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ॥

अनेन महान्तमनुसृत्य गन्तव्यमिति सूचितम् ।

अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥

गृहाण वत्स सलिलं मा भूत्कालस्य पर्ययः ।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥

पितामहसुते ह्येते विद्ये तेजःसमन्विते ।
ददामि तव काकुत्स्थ सदृशस्त्वं हि धार्मिक ॥

ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥

गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ।
ऊषुस्तां रजनीं तीरे सरय्वाः सुसुखं त्रयः ॥

अनेनाचार्येण सदृशे शिष्ये नियमोपदेशपूर्वकं मन्त्रोपदेशः शुचौ देशे कर्तव्यः शिष्येणापि कृतस्नानाचमनेन गुरुनियमेन मन्त्रं गृहीत्वा गुरुशुश्रूषणादिकमवश्यं कर्तव्यमिति सूचितम् । त्रयोविंशे—

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ।
अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥

कौसल्यासुप्रजा राम पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

अनेन 'पूर्वोत्था' इति स्मृतिसिद्धं पूर्वोत्थानादिकमध्वश्रमेणाकुर्वन्नपि शिष्यः आचार्येण प्रबोध्य नित्यकर्मसु नियोज्य इति सूचितम् ॥

तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥

कृताह्निकौ महावीर्यौ विश्वामित्रं तपोधनम् ।
अभिवाद्याभिसंहृष्टौ गमनायोपतस्थतुः ॥

अनेन प्रातरुत्थानध्यानवन्दनादि कृत्वा गुर्वभिवादनं कर्तव्यमिति सूचितम् । तथा च मनुः— 'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः । चत्वारि तस्य वर्धन्ते ह्यायुः प्रज्ञा यशो बलम्' । कामन्दकेऽपि— 'वर्धयन्निह धर्मार्थौ सेवितौ साद्विरादरात् । निगृहीतेन्द्रियग्रामः कुर्वीत गुरुसेवनम्' इति । ततो राघवौ गङ्गास-

रयूसंगमे ऋष्याश्रमं दृष्ट्वा विश्वामित्रं पप्रच्छतुः । स च,

तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुंगवः ।
अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥

कंदर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः ।
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥

कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम् ।
धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥

दग्धश्चाभूद्धि रुद्रेण चक्षुषा रघुनन्दन ।
व्यशीर्यन्त शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥

अनङ्ग इति विख्यातस्तदाप्रभृति राघव ।
स चाङ्गविषयः श्रीमान्यत्राङ्गं स मुमोच ह ॥

तस्यायमाश्रमः पुण्यः ।

इत्यनेन महापुरुषद्रोहिणो दुर्बलस्य स्वरूपनाशोऽपि भवति महापुरुषद्रोहः सर्वथा न कर्तव्य इति सूचितम् ॥

तत्रत्यऋषिभिः पूजिताः

न्यवसन्सुसुखं तत्र स्थाण्वाश्रमपदे तदा।

चतुर्विंशे— ततः प्रभाते तदाश्रमवासिमुनिजनाहूत-नावा सरयू तरन्रामः सरिन्मध्ये तुमुलजलघोषं श्रुत्वा किमिदमिति पप्रच्छ। स च,

कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम्।
कैलासशिखरे राम मनसा निर्मितं सरः।
ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः॥

तस्मात्सुस्राव सरसः सायोध्यामुपगूहते।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता॥

तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते।
वारिसंक्षोभजो राम प्रणामं नियतः कुरु॥

ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ।
तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ॥

अनेन पुण्यतीर्थे दर्शनसमनन्तरमेव वन्दनादिपूजा कर्तव्येति सूचितम् ॥

स वनं घोरसंकाशं दृष्ट्वा नरवरात्मजः ।
[illegible]ऽब्रवीदैक्ष्वाकः पप्रच्छ मुनिपुंगवम् ॥

अहो वनमिदं दुर्गं झिल्लिकागणनादितम् ।
धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः ॥

संकीर्णं बदरीभिश्च किं न्वेतद्दारुणं वनम् ।
तमुवाच महातेजा विश्वामित्रो महामुनिः ॥

एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ।
मलदाश्च करूशाश्च देवनिर्माणानीर्मितौ ॥

पुरा वृत्रवधे राम मलेन समभिप्लुतम् ।
क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् ॥

तमिन्द्रं स्नापयन्देवा ऋषयश्च तपोधनाः ।
कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन् ॥

सोऽस्मिन्देशे मलं त्यक्त्वा देवः कारूशमेव च ।
वृत्राभिद्रोहसंभूतं ततो हर्षमवाप्तवान् ।
ददौ देशस्य सुप्रीतो वरं प्रभुरनुत्तमम् ॥

इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः ।
मलदाश्च करूशाश्च मुदितौ धनधान्यतः ॥

कस्यचित्त्वथ कालस्य यक्षी वै कामरूपिणी ।
बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् ॥

ताडका नाम भद्रं ते भार्या सुन्दस्य धीमतः ।
इमौ जनपदौ नित्यं विनाशयति राघव ॥

सेयं पन्थानमावार्य वसत्यध्यर्धयोजने ।
अत एव च गन्तव्यं ताडकाया वनं यतः ॥

स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ।
मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥

पञ्चविंशे— अथ मुनिवाक्यश्रवणसमनन्तरमबलायाः

याक्षिण्याः कथं नागसहस्रबलमिति रामेण पृष्टो विश्वामित्रः सुतार्थं तप्यमानसुकेतुतोषितपितामहवरलब्धमदावलसहस्रबलावलेपात्सुन्दसंजातनिजतनयमारीचेन सह अगस्त्यशापप्राप्त्या राक्षसभावशापजनितक्रोधेन देवब्राह्मणदेशानुत्सादयन्तीं ताडकां जहीति रामभद्रमवादीत्। यत्तु स्त्रीवधे पापं गौतमधर्मे 'अनात्रेय्यां चैवम्' इति। अनात्रेयीस्त्रीवधे 'शूद्रे संवत्सरमृषभैकादशाश्च गा दद्यात्' इति शूद्रवधोक्तप्रायश्चित्तातिदेशात्। युद्धकाण्डेऽपि मायासीतावधोद्युक्तमिन्द्रजितं प्रति हनूमद्वाक्यम्—

ये च स्त्रीघातिनां लोका वीरलोकेषु कुत्सिताः।
इह जीवितमुत्सृज्य प्रेत्य तान्प्रतिपत्स्यसे॥

इति। भारते महाप्रस्थानेऽपि— 'प्रतिप्रदानं शरणागतस्य स्त्रियो वधो ब्राह्मणस्यापहारः। मित्रद्रोहस्तानि चत्वारि शक्र मृत्युत्यागश्चैव समं मतो मे' इति यत्तद्दुष्टस्त्रीवधविषयमिति स्पष्टीकुर्वन्विश्वामित्रो राममाह—

एनां राघव दुर्वृत्तां यक्षीं परमदारुणाम् ।
गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥

न ह्येनां शापसंदुष्टां कश्चिदुत्सहते पुमान् ।
निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ॥

न हि ते स्त्रीवधकृते घृणा कार्या नरोत्तम ।
चातुर्वर्ण्यहितार्थाय कर्तव्यं राजसूनुना ॥

नृशंसमनृशंसं वा प्रजारक्षणकारणात् ।
पातकं वा सदोषं वा कर्तव्यं रक्षता सताम् ॥

राज्यभारनियुक्तानामेष धर्मः सनातनः ।
अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्यां न विद्यते ॥

इति दुष्टस्त्रीवधे दोषो नास्तीति शास्त्रेण न्यायेन चोक्त्वा स्वोक्तार्थे महतां संमतिमप्याह—

श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ।
पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥

विष्णुना च पुरा राम भृगुपत्नी दृढव्रता ।
अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥

एतैरन्यैश्च बहुभी राजपुत्र महात्मभिः ।
अधर्मनिरता नार्यो हताः पुरुषसत्तमैः ॥

एवमधर्मिष्ठाया लोकोपद्रवकारिण्याः स्त्रिया वधे दोषो नास्तीति विश्वामित्रेण प्रतिपादितम् । विष्णुपुराणे तु एतादृश्या वधस्य पुण्यप्रदत्वमप्युक्तम् । तथा हि पृथोरननुकूला पृथ्वी वधार्थमुद्युक्तं पृथुं प्राह— 'स्त्रीवधे त्वं महापापं किं नरेन्द्र न पश्यसि । येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥ पृथुरुवाच— एकस्मिन्यत्र निधनं प्रापिते दुष्टचारिणि । बहूनां भवति क्षेमस्तस्य पुण्यप्रदो वधः' इति । अनेन धर्मविचारपूर्वकं ताडकावधे दोषो नास्ति, पुण्यमेव भविष्यतीति तात्पर्येण महर्षिविश्वामित्रेणोक्तम् । इदानींतनैरपि बहूनां क्षेमार्थमेकस्य हनने दोषो नास्तीति ज्ञेयम् । विशेषतो राज्ञा जनपदरक्षणदीक्षितेन अवध्यवधोऽपि कर्तव्य इत्यपि सूचितम् । षष्ठेऽङ्के—

तेनैवंवचनमक्लीबं श्रुत्वा नरवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्यूचे दृढव्रतः ॥

पितुर्वचननिर्देशात्पितुर्वचनगौरवात् ।
वचनं कौशिकस्येति कर्तव्यमविशङ्कया ॥

अनुशिष्टोऽस्म्ययोध्यार्यो गुरुमध्ये महात्मना ।
पित्रा दशरथेनाहं नावज्ञेयं च तद्वचः ॥

सोऽहं पितृवचः श्रुत्वा शासनाद्ब्रह्मवादिनः ।
करिष्यामि न संदेहस्ताडकावधमुत्तमम् ॥

एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिंदमः ।
ज्याघोषमकरोत्तीव्रं दिशः शब्देन नादयन् ॥

अनेन विश्वामित्रो गुरुस्तस्य वचनमविचारेण कर्तव्यम्, एवं सति दशरथेनापि 'कौशिको यद्वदति तत्कर्तव्यम्' इत्यनुशिष्टो रामः एकस्य गुरोर्वचनमनुल्लङ्घनीयम्, गुरुद्वयानुशिष्टं वचः कथं परिहर्तुं शक्यत इति स्त्रीवध-

निषेधे सत्यपि ताडकावधमङ्गीकृतवान्। इतरैरपि गुरु-शासने सति अविशङ्क्याधर्म्यमपि तदुक्तमवश्यं कर्तव्यम् इति सूचितम्। तथा अयोध्याकाण्डे कौसल्यां प्रति रामवचनम्—

ऋषिणा च पितुर्वाक्यं कुर्वता व्रतचारिणा।
गौर्हता जानता धर्मं कण्डुनापि विपश्चिता॥

जामदग्न्येन रामेण रेणुका जननी स्वयम्।
कृत्ता परशुनारण्ये पितुर्वचनकारणात्॥

इति गुरुवचनपरिपालनमेव गरीयान्धर्म इति रामेणा-ङ्गीकृतम्। ततो ज्याशब्दश्रवणप्रकुपितामभिद्रवन्तीं ताड-कामभिलक्ष्य रामो लक्ष्मणमब्रवीत्—

एनां पश्य दुराधर्षां मायाबलसमन्विताम्।
विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम्॥

न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन लक्षिताम्।
वीर्यं चास्या गतिं चैव हनिष्यामीति मे मतिः॥

गुरुवचनगौरवात्ताडकावधं प्रतिश्रुत्य स्त्रीस्वभावेन लक्षितामेनां न हनिष्यामीति रामेण कथमुक्तमिति चेत्, स्त्रीवधः सहसा न कर्तव्यः विरूपकरणादिस्त्रीदण्डनमेव प्रथमतः क्रियते; तेन चातिक्रुद्धा स्वयमेवाततायिन्यागमिष्यतीति अनन्तरं तां हनिष्यामि, एवं च 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति शास्त्रमप्यनुगृहीतं भवति; अनेन लोकापवादोऽपि परिहृतो भविष्यति; गुर्वाज्ञापि च पालिता भवतीत्येतदभिप्रायेण उक्तमिति न विरोधः। तद्बधोऽनभिमतश्चेन्मारीचवन्मानवास्त्रेण दूरे प्रक्षिपेत्। तथा अकृत्वा हस्तकर्णनासाच्छेदनादिमुखेनैव ताडका रामेण निषूदितेति उत्तरत्र प्रतिपादयिष्यते। एवं ब्रुवाणं रामं कोपेन पुनरभिद्रवन्तीं राघवाय जयमाशंसमानो विश्वामित्रः निर्भर्त्सयामास ताम्। मायाबलेनाश्मरजोवर्षं वर्षन्तीं निजशरनिकृत्तकरां सौमित्रिर्व्यनासिकां स्वघृणावशेषितप्राणां निशाचरबलवृद्धिकरसंध्याकालागमनभीतेन घृणां निषेधता विश्वामित्रेण संचोदितो रामः

शरेणोरसि विव्याध सा पपात ममार च ।

ततस्तत्कर्मसंतुष्टमानसैः करिष्यमाणनिशाचरवधोपयोगिभृशाश्वतनयाख्यगणोपदेशं प्रार्थयमानैस्त्रिदशैः पूज्यमानेन विश्वामित्रेण आलिङ्गनादिपूर्वकमुपलाल्यमानौ सिद्धगणसंस्तूयमानौ तत्रैव सुखमूषतुः। सप्तविंशाष्टाविंशयोः—ततः प्रभाते ताडकावधसंतुष्टगाधिसुतोपदिष्टं सोपसंहारं मन्त्रग्रामं गृहीत्वा गच्छन्दर्शनीयमृगाकीर्णं वृक्षषण्डं वीक्षमाणो रामः कस्यायमाश्रमः यज्ञविघ्नकरमारीचसुबाहुनिरसनपूर्वकं यज्ञक्रिया क्व रक्षणीयेत्यपृच्छत्। एकोनत्रिंशे—अथ विश्वामित्रोऽकथयत्— इह हि देववरे विष्णौ तपश्चरणाय बहुकालं वसति सति वैरोचनिरिन्द्रादीन्निर्जित्याक्रान्तत्रिभुवनो महान्तं यज्ञमारब्धवान्। तदा देवैरस्य याचकेभ्यः सर्वकामदातुरसमाप्ते क्रतौ मायायोगेन वामनत्वं गतोऽस्मत्कार्यं कुर्विति प्रार्थितो विष्णुरनेकवर्षतपश्चर्यापूर्वकमदित्या सह काश्यपकृतस्तुत्या संतुष्टः उपेन्द्राक्तारेण देवसाहाय्याचरणरूपं वरं प्रदाय वामनरूपेणाऽदित्यामवतीर्णो बलिं त्रीन्क्रमान्भिक्षित्वा मानेन त्रीँल्लो-

कानाक्रम्येन्द्राय ददौ, अस्य वामनस्यायमाश्रमः, अत्रैव यज्ञविघ्नकरा राक्षसा निहन्तव्याः इति वदन्रामेण सह सिद्धाश्रमं प्रविश्य तत्र निवासिभिरर्घ्यादिभिः पूजितः रामलक्ष्मणाभ्यामद्यैव दीक्षां प्रविशेति प्रार्थितो विश्वामित्रो दीक्षां प्राविशत्। त्रिंशे— आरब्धयज्ञविघ्नकरमारीचसुबाहुमुखनिशाचरागमने समयाकाङ्क्षया षडहोरात्राजागरूकावास्ताम्। तत्र रामः सुत्यादिनसमागतान्सुबाहुमारीचप्रमुखान्रुधिरौघेण वेदिमभिवर्षतो निशाचरान्मानवाग्नेयवायव्यास्त्रैस्ताडयामास। ततः मारीचनिरसनसुबाहुप्रमुखवधपूर्वकयज्ञसंरक्षणसंतोषितसकलमुनिगणपरिवृतेन गाधिसुतेन प्रीतेन संस्तूयमानः सलक्ष्मणो राम उवास। अनेन क्षत्रियेण जागरूकतया यज्ञादिधर्मानुष्ठातृसंरक्षणं कर्तव्यमिति सूचितम्। तथा च भारते राजधर्मे वसुमनोबृहस्पतिसंवादे— 'धर्मागमान्धर्मपरान्ये न रक्षन्ति मानवान्। पार्थिवाः पुरुषव्याघ्र तेषां पापं हरन्ति ते' इति। एकत्रिंशे— ततः प्रभाते महर्षयः

विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन्।

मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ।

यज्ञः परमधर्मिष्ठो यत्र यास्यामहे वयम् ।

त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि ॥

इति । अत्रानाहूतानामपि समीपे धर्मिष्ठयज्ञानुष्ठाने तद्दर्शनाय गमनं धर्म इति सूचितम्, अनाहूतगमननिषेधस्य आर्त्विज्येच्छुविषयत्वात् । तथा च गौतमः— 'न यज्ञमवृतो गच्छेद्दर्शनाय तु कामम्' इति । स्मृत्यन्तरमपि— 'अनाहूतोऽध्वरं गच्छेत्' इति । ततः

अद्भुतं च धनूरत्नं तत्र तद्द्रष्टुमर्हसि ।

इति मुनिगणनिवेदितमाहेश्वरधनुःसंदर्शनसंजातकुतूहलेन दाशरथिना सह प्रस्थितो गाधिसुतः शोणाकूलमवाप । तं च रामः पप्रच्छ 'को न्वयं देशः' इति । द्वात्रिंशे—

ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः ।

अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥

वैदर्भ्यां जनयामास चतुरः सदृशान्सुतान्।
कुशाम्बं कुशनाभं च आधूर्तरजसं वसुम्॥

तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यवादिनः।
क्रियतां पालनं पुत्रा धर्मं प्राप्स्यथ पुष्कलम्॥

कुशस्य वचनं श्रुत्वा चत्वारो लोकसंमताः।
निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा॥

कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीम्।
कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयम्॥

आधूर्तरजसो राम धर्मारण्यं महीपतिः।
चक्रे पुरवरं राजा वसुश्चक्रे गिरिव्रजम्॥

एतेन कुशाम्बादयः पितुरनुज्ञया तत्र तत्रावस्थाय पृथग्धर्ममाचरितवन्त इति गम्यते। ननु भ्रातॄणां मध्ये ज्येष्ठेन कर्मणि कृते सर्वैः कृतं भवति; तथा च मरीचिः—'बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः। सर्वेषां तु मतं

कृत्वा ज्येष्ठेनैव तु यत्कृतम् ॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्' । तथा आश्वमेधिके पर्वणि युधिष्ठिरं प्रति कृष्णवचनम्— 'भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ । इष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिव' इति । एवमादिषु बहुवचनेषु सत्सु रामयुधिष्ठिरादीनां महतामाचारे च सति कथं पृथगनुष्ठानमिति चेत्, एतेषां वचनानामविभक्तविषयत्वात् विभक्तानां तु पृथगेव धर्माचरणम् । तथा च बृहस्पतिः— 'एकपाकेन वसतां पितृदेवद्विजार्चनम् । एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे' । नारदोऽपि— 'भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथक्' इति । गौतमोऽपि– 'विभागे तु धर्मवृद्धिः' इति । मनुरपि– 'पितेव पालयेत्पुत्राञ्ज्येष्ठो भ्राता यवीयसः । पुत्रवच्चापि वर्तेरञ्ज्येष्ठे भ्रातरि धर्मतः । एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया । पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया' इति । नन्वेवं विभक्तानां भ्रातृणां पृथग्धर्मानुष्ठानसंभवेऽपि जीवति पितरि कथं पुत्राणां पृथग्धर्माचरणम्, अनधिका-

रात्? तथा च मनुः— 'इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥ सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः। अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्। तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥ तेषामनुपरोधेन पारक्यं यद्यदाचरेत्। तत्तन्निवेदयेत्तेभ्यो मनोवाक्कायकर्मभिः ॥ त्रिष्वेतेष्विति कृत्यं हि पुरुषस्य समाप्यते। एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते' इति चेत् सत्यं पितुरनुज्ञाभावे नाधिकारः, अभ्यनुज्ञायां तु पितुराज्ञाकरणमेव मुख्यो धर्मः। तथा च मनुः— 'एषां त्रयाणां शुश्रूषा परमं तप उच्यते। न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत्' इति।

जीवतो वाक्यकरणात्प्रत्यब्दं भूरिभोजनात्।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥

इति पितृवाक्यस्य गौरवम् अयोध्याकाण्डे रामवाक्येनानुष्ठानेन च स्फुटम्। ननु 'ऊर्ध्वं पितुः पुत्रा रिक्थं भजेर-

न्मातुः' इति गौतमवचनेन 'ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः सह । भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ त्रय एवाधना राजन्भार्या दासस्तथा सुतः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्' इति मनुवचनेन च पितुरूर्ध्वमेव विभागधनावगमात्, तत्पूर्वं विभागद्रव्याभावादनधिकार इति चेत्, जीवति पितरि पुष्कलधर्माचरणाय तेनैव विभागकरणे तदनुज्ञया धर्मानुष्ठानसंभवात् । अत एव श्रुतिः— 'मनुः पुत्रेभ्यो दायं व्यभजत' इति । आपस्तम्बोऽपि— 'जीवन्पुत्रेभ्यो दायं विभजेत्सममं' इति । गौतमोऽपि— 'जीवति चेच्छति पितरि' इति । तस्मात्पितुः कुशस्याज्ञया चतुर्भिः पुत्रैः पृथक्धर्माचरणं यत्कृतं तद्युक्तमेव । रामेणापि स्वयमेव स्वपुत्राणां भ्रातृपुत्राणां च राज्यानि विभज्य दत्तानि । तदुत्तरकाण्डे स्पष्टम् । अयं तु विभागः अधर्मिष्ठानां न भवति । तथा च मनुः— 'सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम्' इति । अत एव 'धर्मिष्ठान्सत्ववादिनः' इति तेषां विशेषणमुक्तम् । तेषु कौशाम्ब्यादिषु,

एषा वसुमती राम वसोस्तस्य महात्मनः ।
एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥

सुमागधी नदी रम्या मगधान्विश्रुता यया ।
कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम् ॥

जनयामास धर्मात्मा घृताच्यां रघुनन्दन ।
ताः सर्वगुणसंपन्ना रूपयौवनसंयुताः ॥

दृष्ट्वा सर्वगतो वायुरिदं वचनमब्रवीत् ।
अहं वः कामये सर्वा भार्या मम भविष्यथ ॥

तस्य तद्वचनं श्रुत्वा कन्याशतमथाब्रवीत् ।
प्रभावज्ञाः स्म ते सर्वाः किमस्मानवमन्यसे ॥

कुशनाभसुताः सर्वाः समर्थास्त्वां सुरोत्तम ।
स्वानाच्यावयितुं देवं रक्षामस्तु तपो वयम् ॥

पिता हि प्रभुरस्माकं दैवतं परमं च सः ।
यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥

अनेन कन्यायाः पितृदानपूर्वको विवाहः प्रशस्त इति सूचितम्। तथा च बोधायनः— 'त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम्। ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्'। याज्ञवल्क्योऽपि— 'पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः' इति।

तासां तद्वचनं श्रुत्वा वायुः परमकोपनः।
प्रविश्य सर्वगात्राणि बभञ्ज भगवान्प्रभुः॥

ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम्।
स च ता दर्पिताः कन्या दीनाः परमशोभनाः॥

दृष्ट्वा भुग्नास्तदा राजा संभ्रान्त इदमब्रवीत्।
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते।
कुब्जाः केन कृताः सर्वा वेष्टन्त्यो नाभिभाषथ॥

तयस्त्रिंशे—

तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः।
शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत॥

वायुः सर्वात्मको राजन्प्रधर्षयितुमिच्छति ।
पितृमत्यः स्म भद्रं ते स्वच्छन्देन वयं स्थिताः ॥
पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ।
तेन पापानुबन्धेन वचनं न प्रतीच्छता ।
एवं ब्रुवन्त्यः सर्वाः स्म वायुना निहता भृशम् ॥
तासां तद्वचनं श्रुत्वा राजा परमधार्मिकः ।
प्रत्युवाच महातेजाः कन्याशतमनुत्तमम् ॥
क्षान्तं क्षमावतां पुत्र्यः कर्तव्यं सुमहत्कृतम् ।
ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥
अलंकारो हि नारीणां क्षमा तु पुरुषस्य वा ।
दुष्करं तच्च वः क्षान्तं त्रिदशेषु विशेषतः ॥
क्षमा दानं क्षमा यज्ञः क्षमा सत्यं हि पुत्रिकाः ।
क्षमा यज्ञः क्षमा धर्मः क्षमायां हि स्थितं जगत् ॥

इति कुशनाभस्य कन्याः प्रशस्य सदृशवरे प्रदानाय मन्त्रिभिः संमन्त्र्य सोमदानामकगन्धर्वोपरिचर्यासंतुष्टचू-

लिनामकमहर्षिदत्तं मानसं पुत्रं ब्रह्मदत्तनामकं काम्पिली-नामकनगरवासिनं राजानमाहूय तस्मै समीरणविगुणीकृतं कन्याशतकं दत्त्वा तत्करसंस्पर्शसमनन्तरमेव संप्राप्तपूर्व-रूपाः भर्त्रा ब्रह्मदत्तेन सह संतुष्टः काम्पिल्यां प्रेषयामास। सोमदापि स्वपुत्रसदृशस्नुषाशतदर्शनजनितसंतोषभरिता बभूव। चतुस्त्रिंशे— ततः कुशनाभः पुत्रलाभाय पुत्रीया-मिष्टिं कुर्वाणः ब्रह्मसुतकुशनामकस्वपित्रनुग्रहलब्धं गाधि-नामानं पुत्रमवाप। तेन गाधिना मम पित्रा ऋची-के प्रतिपादितां सत्यवतीं सशरीरं भर्त्रा सह स्वर्गं गतामंशान्तरेण कौशिकीति प्रसिद्धां सकललोकहित-चिकीर्षया हिमवत्पार्श्वे प्रवहन्तीं नदीमवेक्ष्य तत्स्नेहव-शलब्धतत्तीरनिवासः अध्वरानुष्ठानकाङ्क्षया प्राप्तसिद्धाश्रमः त्वत्तेजसा च समाप्तनियमोऽहमिति स्ववंशदेशस्योत्पत्तिं राघवाय कथयन् महर्षिभिः संस्तूयमानः सराघवो विश्वा-मित्रो निद्रामवाप। पञ्चत्रिंशे— ततः प्रातरुत्थाय कृत-पूर्वाह्णिका विश्वामित्रपुरोगमाः शोणं नदं संतीर्य मध्यं गते सवितरि महर्षिवृन्दारकवृन्दसंसेवितां पुण्यसलिलां

जाह्नवीं दृष्ट्वा

तस्यास्तीरे ततश्चक्रुस्त आवासपरिग्रहम् ।
ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ॥

हुत्वा चैवाग्निहोत्राणि प्राश्य [illegible] हविः ॥
विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ।

अनेन प्रसङ्गात्पुण्यतीर्थादिगमनेऽपि तीर्थं उषित्वा पित्रादितृप्त्यै दानश्राद्धादिकमितरैरपि कर्तव्यमिति सूचितम् । तथा च शङ्खः— 'तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरन् । स्नानजं फलमाप्नोति तीर्थयात्राकृतां न तु' इति । 'हुत्वा चैवाग्निहोत्राणि' इत्यादिना आहिताग्नीनां यज्ञदर्शनादिधर्मार्थं गच्छतामग्निभिः सहैव प्रवासः नार्थार्थम् । अर्थार्थप्रवासे तु यथेच्छमिति सूचितम् । तथा च त्रिकाण्डमण्डनः— 'धनान्यार्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः । धनैर्हि संभवेदिज्या तीर्थार्थं तु न व्रजेत् ॥ ब्रह्मा विष्णुः शिवः सूर्यो गोविप्राः पितृदेवताः । अग्निहोत्रगृहे सन्ति व्रततीर्थतपांसि

च ॥ त्रिस्थलीसेतौ ब्रह्मपुराणे— 'यस्येष्टिधर्मेष्वधिकारितास्ति वरं गृहं गृहधर्माश्च सर्वे। एवं गृहस्थाश्रमसंस्थितस्य तीर्थे गतिः पूर्वतरैर्निषिद्धा ॥ सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैवेति वयं वदामः। यज्ञाधिकारेऽप्यथ वा निवृत्ते विप्रस्तु तीर्थानि परिभ्रमेत्तु ॥ तीर्थेष्वलं यज्ञफलं हि यस्मात्प्रोक्तं मुनीन्द्रैरमलस्वभावैः ॥ सहाग्निर्वा सपत्नीको गच्छंस्तीर्थानि संयतः। सर्वपापविनिर्मुक्तो यथोक्तां गतिमाप्नुयात्। तथा च भारते— तीर्थे गच्छंश्चरेत्संध्यास्तिस्र एकत्र मानवः। नास्नातो नाशुचिर्गच्छेद्धुक्त्वा वा न च सूतकी' इति। तथा मध्याह्ने अवसाय पुनः प्रातः कृतपौर्वाह्णिकस्य प्रयाणप्रतिपादनात् माध्याह्निकसायंप्रातरग्निहोत्राणामेकत्र कर्तव्यता सूचिता ॥

तां दृष्ट्वा पुण्यसलिलां हंससारसशोभिताम्।
संप्रहृष्टमना रामो विश्वामित्रमथाब्रवीत् ॥

भगवञ्श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम्।
त्रैलोक्यं कथमाक्रम्य गङ्गा नदनदीपतिम् ॥

एवं पृष्टो विश्वामित्रो हिमवतः मेनायामुत्पन्नं कन्याद्वयं गङ्गोमा च, लोकपावनार्थं गङ्गानदी देवेभ्यः गार्हस्थ्यार्थं रुद्रायोमा च हिमवता दत्तेत्युक्तवान् । षट्त्रिंशे—

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ ।
प्रतिनन्द्य कथां वीरावूचतुर्मुनिपुंगवम् ॥
दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि ।
विस्तरं विस्तरज्ञोऽसि दिव्यमानुषसंभवम् ॥
त्रीन्पथो हेतुना केन प्लावयेल्लोकपावनी ॥
कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा ॥

तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ।
निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत् ॥

पुरा राम कृतोद्वाहः शितिकण्ठो महातपाः ।
दृष्ट्वा च स्पृहया देवीं मैथुनायोपचक्रमे ॥

शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ।
न चापि तनयो राम तस्यामासीत्परंतप ॥

ततो देवाः समुद्विग्नाः पितामहपुरोगमाः ।
यदिहोत्पद्यते भूतं कस्तत्प्रतिसहिष्यते ।
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥

न लोका धारयिष्यन्ति तव तेजः सुरोत्तम ।
ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥

त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय ।
रक्ष सर्वानिमाँल्लोकान्नालोकं कर्तुमर्हसि ॥

देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ।
बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाच ह ॥

धारयिष्याम्यहं तेजस्तेजस्येव सहोमया ।
त्रिदशाः पृथिवी सर्वा निर्वाणमधिगच्छतु ॥

यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् ।
धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ॥

एवमुक्ताः सुराः सर्वे प्रत्यूचुर्वृषभध्वजम् ।
यत्तेजः क्षुभितं ह्येतत्तद्धरा धारयिष्यति ॥

एवमुक्तः सुरपतिः प्रमुमोच महीतले ।
तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥

ततो देवाः पुनरिदमूचुश्चाथ हुताशनम् ॥
आविश त्वं महातेजो रौद्रं वायुसमन्वितः ।

तदग्निना पुनर्व्याप्तं संजातः श्वेतपर्वतः ॥
दिव्यं शरवणं चैव [illegible]निभम् ॥

यत्र जातो महातेजाः कार्त्तिकेयोऽग्निसंभवः ।
अथोमां च शिवं चैव देवाः सर्षिगणास्तदा ॥

पूजयामासुरत्यर्थं सुप्रीतमनसस्तथा ।
अथ शैलसुता राम त्रिदशानिदमब्रवीत् ॥

समन्युरशपत्सर्वान्क्रोधसंरक्तलोचना ।
यस्मान्निवारिता चाहं संगता पुत्रकाम्यया ॥

अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हथ ।
अद्यप्रभृति [illegible]कमप्रजाः सन्तु पत्नयः ॥

एवं कृत्वा सुरान्सर्वाञ्शशाप पृथिवीमपि ।
अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥

न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता ।
प्राप्स्यसि त्वं सुदुर्मेधे मम पुत्रमनिच्छती ॥

तान्सर्वान्व्रीडितान्दृष्ट्वा सुरान्सुरपतिस्तदा ।
गमनायोपचक्राम दिशं वरुणपालिताम् ॥

स गत्वा तप आतिष्ठत्पार्श्वे तस्योत्तरे गिरेः ।
हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥

एष ते विस्तरो राम शैलपुत्र्या निवेदितः ।
गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मणः ॥

सप्तत्रिंशे—

तप्यमाने तपो देवे देवाः सर्षिगणाः पुरा ।
सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥

ततोऽब्रुवन्सुराः सर्वे भगवन्तं पितामहम् ।
यो नः सेनापतिर्देव दत्तो भगवता पुरा ॥

स तपः परमास्थाय तप्यते स्म सहोमया ।
यदत्रानन्तरं कार्यं लोकानां हितकाम्यया ॥

संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ।
देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥

शैलपुत्र्या यदुक्तं तदप्रजाः स्थ स्वपत्निषु ।
तस्या वचनमक्लीबं सत्यमेव न संशयः ॥

इयमाकाशगा गङ्गा यस्यां पुत्रं हुताशनः ।
जनयिष्यति देवानां सेनापतिमरिंदमम् ॥

ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तं सुतम् ।
उमायास्तद्वहुमतं भविष्यति न संशयः ॥

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनन्दन ।
प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥

ते गत्वा पर्वतं राम कैलासं धातुमण्डितम् ।
अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥

देवकार्यमिदं देव समाधत्स्व हुताशन ।
शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥

देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः ।
गर्भं धारय वै देवि देवतानामिदं प्रियम् ॥

इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् ।
स अस्या महिमां दृष्ट्वा समन्तादवकीर्यत ॥

समन्ततस्तु तां देवीमभ्यषिञ्चत पावकः ।
सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन ॥

तमुवाच ततो गङ्गा सर्वदेवपुरोगमम् ।
अशक्ता धारणे देव तव तेजःसमुद्धतम् ॥

दहनात्मजेन तेन संप्रव्यथितचेतना ।
अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ॥

शुभे हैमवते पार्श्वे गर्भोऽयं संनिवेश्यताम् ।
श्रुत्वाग्निवचनं गङ्गा तं गर्भमतिभास्वरम् ।
उत्ससर्ज महातेजाः स्रोतोभ्योऽपि तदानघ ॥

यदास्या निर्गतं तस्मात्तप्तजाम्बूनदप्रभम् ।
काञ्चनं धरणीं प्राप्तं हिरण्यमतुलप्रभम् ॥

ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभ्यजायत ।
मलं तस्याभवत्तत्र त्रपुसीसकमेव च ॥

तदेतद्धरणीं प्राप्य नाना धातुरवर्धत ।
निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् ॥

सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनम् ।
जातरूपमिति ख्यातं तदाप्रभृति राघव ॥

सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभम् ।
तं कुमारं ततो जातं देवाः सहमरुद्गणाः ॥

क्षीरसंभावनार्थाय कृत्तिकाः समयोजय ।
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमम् ॥

जातः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः
ततस्तु देवताः सर्वाः कार्त्तिकेय इति ब्रुवन् ॥

पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ।
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ॥

स्कन्द इत्यब्रुवन्देवाः स्कन्नं गर्भपरिस्रवात् ।
कार्त्तिकेयं महाभागं काकुत्स्थ ज्वलनोपमम् ॥

प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमम् ।
षण्णां षडानना भूत्वा जग्राह स्तनजं पयः ॥

गृहीत्वा क्षीरमेकाहात्सुकुमारवपुस्तदा ।
अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥

सुरसेनागणपतिं ततस्तमनलद्युतिम् ।
अभ्यषिञ्चन्सुरगणाः समेत्याग्निपुरोगमाः ॥

एष ते राम गङ्गाया विस्तरोऽभिहितो मया ।
कुमारसंभवस्त्वेष धन्यः पुण्यस्तथैव च ॥

भक्तश्च यः कार्त्तिकेये काकुत्स्थ भुवि मानवः ।
आयुष्मान्पुत्रपौत्रैश्च स्कन्दसालोक्यमाप्नुयात् ॥

अष्टत्रिंशे—

तां कथां कौशिको रामे निवेद्य मधुराक्षरम् ।
पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥

अयोध्याधिपतिः शूरः पूर्वमासीन्नराधिपः ।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥

विदर्भदुहिता राम केशिनी नाम नामतः ।
ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥

अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।
द्वितीया सगरस्यासीत्पत्नी सुमतिसंज्ञिता ॥

ताभ्यां सह तदा राजा पत्नीभ्यां तप्तवांस्तपः ।
हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥

अथ वर्षशते पूर्णे तपसा तोषितो मुनिः ।
सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥

अपत्यलाभः सुमहान्भविष्यति तवानघ ।
कीर्त्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥

एका जनयिता तात पुत्रं वंशकरं तव ।
षष्टिं पुत्रसहस्राणि ह्यपरा जनयिष्यति ॥

अथ काले गते तस्मिञ्ज्येष्ठा पुत्रं व्यजायत ।
असमञ्ज इति ख्यातं केशिनी सगरात्मजम् ॥

सुमतेस्तु नरव्याघ्र गर्भतुम्बं व्यजायत ।
षष्टिः पुत्रसहस्राणि तुम्बभेदाद्विनिःसृताः ॥

अथ दीर्घेण कालेन रूपयौवनशालिनः ।
षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥

स च ज्येष्ठो नरश्रेष्ठः सगरस्यात्मसंभवः ।
बालान्गृहीत्वा सलिले सरय्वा रघुनन्दन ॥

प्रक्षिप्य प्रहसन्नित्यं मज्जतस्तान्समीक्ष्य वै ।
एवं पापसमाचारः सज्जनप्रतिबाधकः ॥
पौराणामहिते युक्तः पित्रा निर्वासितः पुरात् ।

अनेन बहुतपःक्लेशलब्धः ज्येष्ठपुत्रोऽपि पापसमाचारः सज्जनबाधकः पौरजनाहितयुक्तः अविचारेण निरस्य इति सूचितम् । ननु 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः । पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ यस्मिन्नृणं संनयति येन चामृतमश्नुते । स एव धर्मजः पुत्रः कामजानितरान्विदुः' इति मनुवचनपर्यालोचनया ज्येष्ठपुत्रस्य ऋणत्रयनिवर्तकत्वात् उत्तमलोकप्रापकत्वात् वंशाभिवृद्धिकरत्वात् धर्मजत्वाच्च तत्परित्यागः कथमिति चेन्न, अहितकारिपतितदुष्टपुत्रपरित्यागस्य युक्तत्वात् । तथा च रामायणे सीतां प्रति रामवचनम्—

औरसानपि पुत्रान्हि त्यजन्त्यहितकारिणः ।
समर्थाः संप्रगृह्णन्ति जनानां हितकारिणः ॥

पतितलक्षणमाह गौतमः— 'द्विजातिकर्मभ्यो हानिः पतनम्' इति । मनुरपि— 'अकुर्वन्विहितं कर्म निन्दितं च समाचरन् । प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' इति । किं बहुना, दुष्टस्य गुरोरपि परित्यागः कथितो मनुस्मृतौ— 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते' इति । न चैवं दोषे सति मातुरपि परित्यागः प्रसज्येतेति वाच्यम्, पतिताया अपि तस्याः संग्राह्यत्वात् । तथा च गौतमः— 'पतितायामपि तस्यां शुश्रूषे' इति । स्मृतिरपि— 'पतिता गुरवस्त्याज्या न तु माता कथंचन । गर्भधारणपोषाभ्यां तेन माता गरीयसी' इति । तथा च पतितानां मातृव्यतिरिक्तगुरुपुत्रभ्रातृसखिसंबन्धिबान्धवाशिष्यसेवकानां परित्यागः सिद्धः । एतेषां च पतितानामपरित्यागे अपतितानां च परित्यागे च दोषः स्मर्यते । तथा च गौतमः— 'निन्दितकर्माभ्यासिपतितात्यागयपतितत्यागिनः पतिताः पातसंयोजकाश्च तैश्चाब्दं

समाचरन्' इति। छान्दोग्ये पञ्चाग्निविद्यायाम्— 'एते पतन्ति चत्वारः पञ्चमश्चाचरंस्तैः' इति। रामायणेऽपि—

अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च।
निर्दहेदपि शक्रस्य द्युतिं धर्मनिरोधनात्॥

नं चैवं मानववचनानां का गतिरिति वाच्यम्, तेषामदुष्टज्येष्ठपुत्रविषयत्वात्। राज्ञां तु प्रजापरिपालनस्य मुख्यधर्मतया तत्परिपन्थिनो ज्येष्ठपुत्रस्यापि परित्यागेन तासां हितमवश्यं कर्तव्यमेव। तथा च गौतमः— 'हितं चासां कुर्वीत' इति। याज्ञवल्क्योऽपि— 'प्रधानं क्षत्रियेकर्म प्रजानां परिपालनम्' इति। मनुरपि— प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशेत्' इति। आपस्तम्बोऽपि— 'अभिषिक्तस्य च राज्ञः प्रजापालनं परमो धर्मः' इति। शान्तिपर्वण्यपि— 'नृपाणां प्रथमो धर्मः प्रजानामेव पालनम्। निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥ पालनेनैव भूतानां कृतकृत्यो महीपतिः। सम्यक् पालयिता भागं धर्मस्याप्नोति पुष्कलम्' इति। मार्कण्डेयपुराणेऽपि—

'पालनेनैव भूतानां कृतकृत्यो महीपतिः। सम्यक्पालयिता भागं धर्मस्याप्नोति पुष्कलम्' इति। ब्रह्माण्डपुराणे—'यदहा कुरुते धर्मं प्रजा धर्मेण पालयन्। दश वर्षसहस्राणि तस्य भुङ्क्ते महाफलम्' इति। मनुः— 'रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन्। यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः' इति। तादृशस्वकर्मपरिभ्रष्टस्य भवत्येव पातित्यम्। अतः निन्दितकर्माभ्यासेन पतितपुत्रसहवासप्रयुक्तस्वपातित्यनिवृत्तये बहुतपःक्लेशलब्धं ज्येष्ठमपि पुत्रं परित्यक्तवान्।

तस्य पुत्रोंशुमान्नाम असमञ्जस्य वीर्यवान्।
संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः।
ततः स सगरो राजा यष्टुं समुपचक्रमे॥

एकोनचत्वारिंशे—

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम्॥

श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् ।
पूर्वको मे कथं ब्रह्मन्यज्ञं वै समुपाहरत् ॥

एवं रामेण पृष्टो विश्वामित्र उवाच— सगरो हिमवद्विन्ध्यान्तरालप्रदेशे अश्वमेधमारब्धवान् । तत्र यज्ञियोऽश्वो राक्षसीं तनुमास्थाय वासवेनापहृतः । तस्मिन्नपहृते ऋत्विजो यजमानमब्रुवन्— अश्वः शीघ्रमानीयतामश्वहर्तारं च जहि ।

यज्ञच्छिद्रं भवत्येतत्सर्वेषामशिवाय नः ।
तत्तथा क्रियतां राजन्यथाच्छिद्रः क्रतुर्भवेत् ॥

अनेन यज्ञियाश्वहरणमृत्विग्यजमानाशुभकरमित्युक्तम् । तथा च तैत्तिरीयश्रुतिः— 'यो बलोऽश्वमेधेन यजते यदमित्रा अश्वं विन्देरन् हन्येतास्य यज्ञः' इति । तथा चात्रैवोक्तम्—

विहतस्य च यज्ञस्य सद्यः कर्ता विनश्यति ।
अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥

इति च। सोऽपि राजा पुत्रसहस्राणां षष्टिमवेक्ष्य सर्वतो मेदिनीं विचित्याश्वो मन्त्रपूत आनेय इत्युक्तवान्। ते पुत्राः सर्वतो मेदिनीमवेक्ष्य न दृश्यतेऽश्व इत्युक्तवन्तः। पुनरपि राजा समुद्रमालिनी मेदिनी खन्यतां यावदश्वानयनमत्रैव ऋत्विगादिसहितः स्थास्यामीत्याह। ततः

ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः।
जगुर्महीतलं राम पितुर्वचनयन्त्रिताः॥

योजनायामविस्तारमेकैको धरणीतलम्।
बिभिदुः पुरुषव्याघ्र वज्रस्पर्शसमैर्भुजैः॥

अनेन प्राणानपि तृणीकृत्यात्यन्ताशक्यमपि पितृवचनात्कर्तव्यमिति सूचितम्। तथा चायोध्याकाण्डे कौसल्यां प्रति रामवाक्यम्—

अस्माकं च कुले पूर्वं सगरस्याज्ञया पितुः।
खनद्भिः सागरैः पूर्वमवाप्तः सुमहानघः॥

इति। भिद्यमानां वसुमतीं वध्यमानराक्षसनागादियुक्तां देवादयो दृष्ट्वा संभ्रान्तमनसः पितामहमुपागम्य सगरपुत्रकृतलोकोपद्रवं शशंसुः। चत्वारिंशे— ततः पितामहोऽपि सगरपुत्रा अप्रमेयप्रभावकपिलहुंकारदग्धा भस्मीकृता भविष्यन्तीति देवानाश्वासयामास। अनेन बहुप्राण्युपद्रवकारिणां देवा अपि वधोपायमभीप्सन्ति, दैवहतानां च तेषामचिरेण नाशो भवत्येवेति सूचितम्। तेऽपि पुत्राः कृत्स्नां महीं प्रादक्षिण्येन च खन्यमानाः पूर्वादिदिक्षु विरूपाक्षमहापद्मसौमनसभद्रनामकान्भूमिं बिभ्राणान्गजान्दृष्ट्वा प्रदक्षिणानामयप्रभादिपूर्वकमुत्तरपूर्वस्यां दिशि पुनरपि खननं कुर्वाणाः अविदूरे चरन्तमश्वं वासुदेवं कपिलं च दृष्ट्वा अयमश्वहर्तेति क्रोधादभ्यद्रवन्। ततः कोपसंरक्तनयनकपिलहुंकृतिदग्धा भस्मीकृता बभूवुः। अनेनाविचारितकर्मकर्तृणां महाब्राह्मणावमन्तृणां च एतादृशी गतिरिति सूचितम्। एकचत्वारिंशे— चिरप्रोषितान्पुत्राननागतान्विचिन्त्य अंशुमान्नामानमसमञ्जस्य पुत्रं पुत्रान्वेषणाय यज्ञियाश्वानयनार्थतया प्रेषयामास। स चाप्यं-

शुमान्पितृव्यमार्गानुसारेण गच्छन्दिशागजान्पृष्ट्वा भस्मराशी ...तान्पितृव्यांस्तत्र चरन्तमश्वं च दृष्ट्वापि दुःखितः पितृणां जलदानाय जलं गवेषमाणं तदलाभेन क्लिश्यमानमंशुमन्तं मातुलो वैनतेय आगत्यावादीत्—

...पिलेनाप्रमेयेन दग्धा हीमे महाबलाः।
सलिलं नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् ॥

गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ।
तस्यां कुरु म ...वांहो पितॄणां तु जलक्रियाम् ॥

भस्मराशी ...तानेतान्पावयेल्लोकपावनी।
तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया ॥
षष्टिः ...सहस्राणि स्वर्गलोकं नयिष्यति।

इति। अनेन महाब्राह्मणापराधजनितपापवतां तच्छापमृतानामकृतप्रायश्चित्तानां ...थायामनधिकारः दुर्मरणात्। तथा च बृहदारण्यके ...कल्यथाज्ञवल्क्यसंवादे याज्ञवल्क्यः— 'तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न

विवक्ष्यसि मूर्धा ते विपतिष्यतीति । तं ह न मेने शाकल्यः तस्य ह मूर्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यजह्रुरमन्यमानाः' इति । अस्य भाष्यम्— तमौपनिषदं पुरुषं शाकल्यो न मेने न विज्ञातवान्किल । तस्य ह मूर्धा विपपात विस्पष्टं पतितः समाप्ताख्यायिका । श्रुतेर्वचनं तं ह न मेने इत्यादि । किं चापि हास्य परिमोषिणस्तस्कराः अस्थीन्यपि संस्कारार्थं शिष्यैर्नीयमानानि गृहान्प्रति अपजह्रुः अपहृतवन्तः । किंनिमित्तम्, अन्यद्धनं नीयमानं मन्यमानाः इति । यथा याज्ञवल्क्यापराधेन शाकल्यस्य सद्यः शरीरपतनं संस्काराभावश्च, तथा ब्रह्मिष्ठस्य ब्रह्ममार्गप्रवर्तकस्य भगवतो नारायणांशभूतकपिलमहामुनेरपराधेन सागराणां सद्यो भस्मीभावः संस्कारानर्हत्वं च युक्तमेव । तथा च गौतमः— 'गोब्राह्मणहतानामन्वक्षम्' इति । अन्वक्षम् आशौचाभाव इत्यर्थः । मिताक्षरायाम्— क्रोधं प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् । गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः ॥ ब्रह्मदण्डहता ये च ये चपि ब्राह्मणैर्हताः । महापातकिनो ये च पतितास्ते

प्रकीर्तिताः ॥ पतितानां न दाहः स्यान्नान्तेष्टिर्नास्थिसंचयः। न चाश्रुपातः पिण्डो वा कार्या श्राद्धक्रिया न च' इति । याज्ञवल्क्योऽपि— 'हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम्' इति ॥

दुर्पणवचनं श्रुत्वा सौशुमानतिवीर्यवान्।
त्वरितं हयमादाय पुनरायान्महायशाः ॥

ततः सगरोऽपि यज्ञं समाप्य गङ्गावतरणेऽदृष्टोपाय एव कालधर्मं गतवान्। द्विचत्वारिंशे— ततः प्रकृतयः धार्मिकमंशुमन्तं राज्येऽभिषिक्तवन्तः। सोऽपि स्वपुत्रं दिलीपं राज्येऽभिषिच्य बहुकालं तपस्तप्त्वा पितृव्याणां महागतिप्रदं स्वर्गङ्गावतारणमलब्ध्वा स्वर्गं गतः। दिलीपोऽपि बहुक्रतूननुष्ठाय राज्ये च स्वपुत्रं भगीरथं स्थापयित्वा गङ्गावतारणमलब्ध्वा इन्द्रलोकं जगाम। भगीरथोऽप्यनपत्यः प्रपितामहवधं श्रुत्वा दुःखितः सन् गोकर्णे पुण्यक्षेत्रे नियतेन्द्रियो मासाहारो वर्षसहस्रं तपस्तप्तवान् ॥

सुप्रीतो भगवान्ब्रह्मा प्रजानां पतिरीश्वरः ।
ततः सुरगणैः सार्धमुपागम्य पितामहः ॥

भगीरथं महात्मानं तप्यमानमथाब्रवीत् ।
भगीरथ महाभाग प्रीतस्तेऽहं जनेश्वर ।
तपसा च सुतप्तेन वरं वरय सुव्रत ॥

तमुवाच महातेजाः सर्वलोकपितामहम् ।
भगीरथो महाराजः कृताञ्जलिरुपस्थितः ॥

यदि मे भगवन्प्रीतो यद्यस्ति तपसः फलम् ।
सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥

गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गच्छेयुरत्यन्तं सर्वे मे प्रपितामहाः ॥

देया च संततिर्देव नावसीदेत्कुलं च नः ।
इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥

उक्तवाक्यं तु राजानं सर्वलोकपितामहः ।
प्रत्युवाच शुभां वाणीं मधुरां मुधुराक्षराम् ॥

मनोरथो महानेष भगीरथ महारथ ।
एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥

इयं हैमवती गङ्गा ज्येष्ठा हिमवतः सुता ।
तां वै धारयितुं शक्तो हरस्तत्र नियुज्यताम् ॥

गङ्गायाः पतनं राजन्पृथिवी न सहिष्यते ।
तां वै धारयितुं वीर नान्यं पश्यामि शूलिनः ॥

तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् ।
जगाम त्रिदिवं देवः सह सर्वैर्गणैः ॥

त्रिचत्वारिंशे—

देवदेवे गते तस्मिन्सोऽकुष्ठाग्रनिपीडितात् ।
कृत्वा वसुमतीं राम संवत्सरमुपासत ॥

अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपती राजानमिदमब्रवीत् ॥

प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥

ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ।
तदा सातिमहद्रूपं कृत्वा वेगं च दुःसहम् ॥

आकाशादपतद्राम शिवे शिवशिरस्युत ।
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥

विशाम्यहं हि पातालं स्रोतसागृह्य शंकरम् ।
त मावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान्हरः ॥

तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा ।
सा तस्मिन्पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि ॥

हिमवत्प्रतिमे राम जटामण्डलगह्वरे ।
सा कथंचिन्महीं गन्तुं नाशक्नोद्बलमास्थिता ॥

नैव सा निर्गमं लेभे जटामण्डलमोहिता ।
तत्रैवाबभ्रमद्देवी संवत्सरगणान्बहून् ॥

तामपश्यं ततस्तत्र तपः परममास्थितः ।
अनेन तोषितश्चासीदत्यर्थं [illegible] ॥

विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ।
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥

ह्लादिनी पावनी चैव नलिनी च तथापरा ।
तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः ॥

सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी ।
तिस्रस्त्वेता दिशं जग्मुः प्रतीचीं च शुभोदकाः ।
सप्तमी चान्वगात्तासां भगीरथमथो नृपम् ॥

भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ।
प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत् ॥

गगनाच्छंकरशिरस्ततो धरणिमागता ।
व्यसर्पत जलं तत्र तीव्रवेगपुरस्कृतम् ॥

मत्स्यकच्छपसंघैश्च शिशुमारगणैस्तथा ।
पतद्भिः पतितैश्चान्यैर्व्यरोचत वसुंधरा ॥

ततो देवर्षिगन्धर्वा यक्षाः सिद्धगणास्तथा ।
व्यलोकयन्त ते तत्र गगनाद्गां गतां तदा ॥

तच्छंकरशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ।
व्यरोचत तदा तोयं निर्मलं गतकल्मषम् ॥

तत्र देवर्षिगन्धर्वा वसुधातलवासिनः ।
भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ॥

अनेनानवरतं स्वर्धुनीमवगाहमानानामपि देवादीनां भूमिष्ठभागीरथीस्नानप्रतिपादनेन स्वर्गङ्गापेक्षया 'पुण्ये रुद्रस्य मूर्धनि' 'शिवे शिवशिरस्युत' इत्यादिवचनागत-पुण्यभवाङ्गसंबन्धेन 'भूमिगतास्वप्स्वाचम्य प्रयतो भ-

वति' इत्यापस्तम्बवचनात् गतप्रायत्नहेतुना भ्रष्टं भूमितले भूसंबन्धेन भागीरथ्या अतिपावनत्वमुक्तं भवति। अभिमन्योकैरपि पावनत्वमुच्यते—

पापात्प्रपतिता ये च गगनाद्धरणीतलम्।
कृत्वा तत्राभिषेकं ते बभूवुर्गतकिल्बिषाः॥

धूतपापाः पुनस्तेन तोयेनाथ सुभास्वता।
पुनराकाशमाविश्य स्वाल्लोकान्प्रतिपेदिरे॥

मुमुदे मुदितो लोकस्तेन तोयेन भास्वता।
कृताभिषेको गङ्गायां बभूव विगतक्लमः॥

भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः।
प्रायादग्रे महातेजास्तं गङ्गा पृष्ठतोऽन्वगात्॥

यतो भगीरथो राजा ततो गङ्गा यशस्विनी।
जगाम सरितां श्रेष्ठा सर्वपापविनाशनी॥

ततो हि यजमानस्य जह्नोरद्भुतकर्मणः ।
गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ॥

तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुस्तु राघव ।
अपिबच्च जलं सर्वं गङ्गायाः परमाद्भुतम् ॥

ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः ।
पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् ॥

गङ्गां तामानयन्ति स्म दुहितृत्वे महात्मनः ।
ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत्पुनः ॥

तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ।
जगाम च पुनर्गङ्गा भगीरथरथानुगा ॥

सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ।
रसातलमुपागच्छत्सिद्ध्यर्थं तस्य कर्मणः ॥

भगीरथोऽपि राजर्षिर्गङ्गामादाय यत्नतः ।
पितामहान्भस्मकृतानपश्यद्दीनचेतनः ॥

अथ तं भस्मनां राशिं गङ्गासलिलमुत्तमम् ।
प्लावयद्धतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ॥

चतुश्चत्वारिंशे—

स गत्वा सागरं राजा गङ्गयानुगतस्तदा ।
प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥

भस्मन्यथाप्लुते राम गङ्गायाः सलिलेन वै ।
सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥

तारिता नरशार्दूल दिवं याता हि देववत् ।
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥

सागरस्य जलं लोके यावत्स्थास्यति पार्थिव ।
सगरस्यात्मजास्तावत्स्वर्गे स्थास्यन्ति देववत् ॥

इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति ।
त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता ॥

गङ्गा त्रिपथगा राजन्दिव्या भागीरथीति च।
त्रीन्पथो भावयन्तीति ततस्त्रिपथगा स्मृता॥

पितामहानां सर्वेषां त्वमत्र मनुजाधिप।
कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय॥

पूर्वकेणापि ते राजंस्तेनातियशसा तदा।
धर्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः॥

तथैवांशुमता वत्स लोकेऽप्रतिमतेजसा।
गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता॥

राजर्षिणा गुणवता महर्षिसमतेजसा।
मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च॥

दिलीपेन महाभाग तव पित्रातितेजसा।
पुनर्न शङ्किता नेतुं गङ्गां प्रार्थयतानघ॥

सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ।
प्राप्तोऽसि परमं लोके यशः परमसंमतम्॥

यच्च गङ्गावतरणं त्वया कृतमरिंदम ।
अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् ॥

प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते ।
सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो भव ॥

पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम् ।
स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप ॥

इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः ।
यथागतं तथागच्छद्देवलोकं महायशाः ॥

भगीरथोऽपि राजर्षिः कृत्वा सलिलमुत्तमम् ।
यथाक्रमं यथान्यायं सागराणां महायशाः ॥

कृतोदकः शुची राजा स्वपुरं प्रविवेश ह ।
समृद्धार्थो रघुश्रेष्ठ स्वराज्यं प्रशशास च ॥

प्रमुमोद च लोकस्तं नृपमासाद्य राघव ।
नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥

अनेन स्ववंश्येन केनापि गङ्गास्नानतर्पणादि कृतं चेत्तद्वंश्यानां सर्वेषामुत्तमलोकप्राप्तिः इति सूचितम् । एतन्माहात्म्यं महाभारते विष्णुपुराणे च विस्तरेण श्रूयते । तथा चानुशासनिके युधिष्ठिरवाक्यं भीष्मं प्रति— 'के देशाः के जनपदाः केऽश्रमाः के च पर्वताः । प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यस्तदुच्यताम् ॥ भीष्मः— ते देशास्ते जनपदास्तेऽश्रमास्ते च पर्वताः । येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥ स्पृष्टानि येषां गाङ्गेयैस्तोयैर्गात्राणि देहिनाम् । न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते ॥ पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः । पश्चाद्गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम् ॥ यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति । तावद्वर्षसहस्राणि स्वर्गे लोके महीयते ॥ यस्तु सूर्येण निष्टप्तं गाङ्गेयं पिबते जलम् । गवां निर्हारनिर्मुक्ताद्यावकादतिरिच्यते ॥ अग्नौ प्रास्तं प्रदूयेत यथा तूलं द्विजोत्तम । तथा गङ्गावगाढस्य सर्वं पापं प्रदूयते ॥ प्रकृष्टैरशुभैर्भस्ताननेकैः पुरुषाधमान् । पततो नरके गङ्गा संश्रितान्प्रेत्य तारयेत् ॥ विनयाचार-

हीनाश्चाप्यशिवाश्च नराधमाः। ते भवन्ति शिवा विप्रा ये वै गङ्गामुपाश्रिताः॥ उपासते यथा बाला मातरं क्षुधयार्दिताः। श्रेयस्कामास्तथा गङ्गामुपासन्तीह देहिनः॥ जाह्नवीपुलिनोत्थाभिः सिकताभिः समुक्षितम्। आत्मानं मन्यते लोको दिविष्ठमिव शोभितम्॥ जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः। बिभर्ति रूपं सोऽर्कस्य तमोनाशाय निर्मलम्॥ गङ्गोर्मिभिरथो दिग्धः पुरुषं पवनो यदा। स्पृशते सोऽस्य पाप्मानं सद्य एवापकर्षति॥ वाङ्मनःकर्मजैर्ग्रस्तः पापैरपि पुमानिह। वीक्ष्य गङ्गां भवेत्पूतः अत्र मे नास्ति संशयः॥ सप्तावरान्सप्त परान्पितॄंस्तेभ्यश्च ये परे। पुमांस्तारयते गङ्गां वीक्ष्य स्पृष्ट्वावगाह्य च॥ श्रुताभिलषिता पीता स्पृष्टा दृष्टावगाहिता। गङ्गा तारयते नृणामुभौ वंशौ विशेषतः॥ दर्शनात्स्पर्शनात्पानात्तथा गङ्गेति कीर्तनात्। पुनात्यपुण्यान्पुरुषाञ्शतशोऽथ सहस्रशः॥ य इच्छेत्सफलं जन्म जीवितं श्रुतमेव च। स पितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा॥ न सुतैर्न च वित्तेन कर्मणा न च

तत्फलम् । प्राप्नुयात्पुरुषोऽत्यन्तं गङ्गां प्राप्य यदाप्नुयात् ॥ वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः । विद्याबद्धिः श्रितां गङ्गां पुमान्को नाम नाश्रयेत् ॥ उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः । चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥ महापुण्यां च गगनात्पतन्तीं वै महेश्वरः । दधार शिरसा गङ्गां तामेव दिवि सेवते ॥ भूस्थैः स्वस्थैर्दिविस्थैश्च भूतैरुच्चावचैरपि । गङ्गा विगाह्या सततमेतत्कार्यतमं सताम् ॥ विश्वलोकेषु पुण्यत्वाद्गङ्गायाः प्रथितं यशः । यत्पुत्रान्सगरस्येतो भस्माख्याननयद्दिवम् ॥ पयस्विनीं घृतिनीमत्युदारां समृद्धिनीं वेगिनीं दुर्विगाह्याम् । गङ्गां गत्वा यैः शरीरं विसृष्टं गता धीरास्ते विबुधैः समत्वम् ॥ यो वत्स्यति द्रक्ष्यति वापि मर्त्यस्तस्मै प्रयच्छन्ति सुखानि देवाः । तद्भाविताः स्पर्शनदर्शनेन इष्टां गतिं तस्य सुरा दिशन्ति ॥ इयं गङ्गेति नियतं प्रतिष्ठा गुहस्य रुक्मस्य च भर्गयोषा । प्रातस्त्रिवर्गा धृतवाहा विपाप्मा गङ्गावतीर्णा वियतो विश्वतोया ॥ मधुस्रवा घृतधारा घृतार्चिर्महोर्मिभिः शोभिता ब्राह्मणैश्च । दिव्यच्युता शिरसाप्ता

शिवेन गङ्गावनीध्रा त्रिदिवस्य माता ॥ ऋषिष्टुतां विष्णुपदीं पुराणां सुपुण्यतोयां मनसापि लोके । सर्वात्मना जाह्नवीं ये प्रपन्नास्ते ब्रह्मणः सदनं संप्रयाताः ॥ प्रसाद्य देवान्स विभून्समस्तान्भगीरथस्तपसोग्रेण गङ्गाम् । गामानयत्तामभिगम्य शश्वत्पुंसां भयं नेह वामुत्र विद्यात् ॥ उदाहृतः सर्वथा ते गुणानां मयैकदेशः प्रसमीक्ष्य बुद्ध्या । शक्तिर्न मे काचिदिहास्ति वक्तुं गुणान्सर्वान्परिमातुं तथैव ॥ मेरोः समुद्रस्य च सर्वयत्नैः संख्योपलानामुदकस्य चापि । शक्यं वक्तुं नेह गङ्गाजलानां गुणाः ख्यातुं परिमातुं तथैव' इति । विष्णुपुराणेऽपि— 'एवमेतत्परं विष्णोस्तृतीयममलात्मकम् । आधारभूतं लोकानां त्रयाणां सृष्टिकारणम् ॥ ततः प्रभवति ब्रह्मन्सर्वपापहरा सरित् । गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा ॥ वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता । विष्णोर्बिभर्ति यां भक्त्या शिरसाहर्निशं ध्रुवम् ॥ ततः सप्तर्षयो यस्याः प्राणायामपरायणाः । तिष्ठन्ति वीचीमालाभिरुह्यमाना जटाजले ॥ वार्योघैः सततं यस्याप्लावितं शशिमण्डलम् । भूयोऽधिकतरां

कान्ति वहत्येतदहःक्षयम् ॥ मेरुपृष्ठे पतित्वोच्चैर्निष्क्रान्ता शशिमण्डलात् । जगतः पावनार्थाय या प्रयाति चतुर्दिशम् ॥ सीता चालकनन्दा च चक्षुर्भद्रा तथैव च । एकैव सा चतुर्भेदा दिग्भेदगतिलक्षणा ॥ भेदं चालकनन्दाख्यं यस्याः शर्वोऽपि लक्षणम् । दधार शिरसा प्रीत्या वर्षाणामधिकं शतम् ॥ शंभोर्जटाकलापाच्च विनिष्क्रान्तास्थिशर्करात् । प्लावयित्वा दिवं निन्ये या पापान्सगरात्मजान् ॥ स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति । अपूर्वपुण्यप्राप्तिश्च सद्यो मैत्रेय जायते ॥ दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः । समात्रयं प्रयच्छन्ति तृप्तिं मैत्रेय दुर्लभाम् ॥ यस्यामिष्ट्वा महायज्ञैर्यज्ञेशं पुरुषोत्तमम् । द्विजभूताः परामृद्धिमवापुर्दिवि चेह च ॥ स्नाननिर्धूतपापाश्च जायन्ते यतयस्तथा । केशवासक्तमनसः प्राप्ता निर्वाणमुत्तमम् ॥ श्रुताभिलषिता दृष्टा स्पृष्टापीतावगाहिता । सा पावयति भूतानि कीर्तिता च दिने दिने ॥ गङ्गा गङ्गेति यन्नाम योजनानां शतेष्वपि । स्थितैरुच्चारितं हन्ति पापं जन्मत्रयार्जितम् ॥ यतः सा

पावनी मूलं त्रयाणां जगतामपि । समुद्भूता परं तत्तु तृतीयं भगवत्पदम्' इति ।

एष ते राम गङ्गाया विस्तरोऽभिहितो मया ।
स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते ॥

धन्यं यशस्यमायुष्यं स्वर्ग्यं पुण्यमथापि च ।
यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च ॥

प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च ।
इदमाख्यानमग्र्यं गङ्गावतरणं शुभम् ॥

यः शृणोति च काकुत्स्थ सर्वान्कामानवाप्नुयात् ।
सर्वे पापाः प्रणश्यन्ति आयुः कीर्त्तिश्च वर्धते ॥

पञ्चचत्वारिंशे— ततः श्रुतगङ्गावतरणो रामः प्रभाते तामेव गङ्गां तीर्त्वा उत्तरकूलनिविष्टां विशालां पुरीमवेक्ष्य कस्येयमिति विश्वामित्रमपृच्छत् । ततः अमरत्वलिप्सुदेवासुरादिकृतक्षीरोदमथनाद्भ्रन्वन्तर्यप्सरोवारुण्युच्चैश्रवःकौ-

स्तुभक्रमेण संभूतेऽमृते तदर्थं विवदमानेषु देवासुरेषु देवजयाय गृहीतमोहिनीवेषेण भगवता नारायणेन लब्धामृतो वृद्धश्रवा निगृहीतासुरवर्गो राज्यमवाप । षट्चत्वारिंशे— ततः समन्युशतमन्युनिषूदितपुत्रक्लेशासहिष्णुदितिप्रार्थनया सहस्रसंवत्सरनियमलभ्यस्तनय इति स्वभर्तृकाश्यपानुग्रहेण पाकशासनपरिपाटनपटुपुत्रलाभाय कुशाप्लवने तपश्चरन्तीं गर्भहननायान्तरलिप्सया शाठ्येन शक्रो मातरं परिचचार । ततश्च

.....प्राप्ते मध्यं दिवाकरे ।
निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥

दृष्ट्वा तामशुचिं शक्रः पादतः कृतमूर्धजाम् ।
शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥

अनेन व्रतस्थानां दिवा स्वापः, पादस्थाने शिरःस्थापनं चाशुचिकरम् इति सूचितम् । ततस्तस्या जठरं प्रविश्य गर्भं सप्तधा च्छित्त्वा प्रबुद्धया मात्रा न हन्तव्य इति प्रार्थितः कुलिशपाणिर्निर्जगाम । दितिरप्याखण्ड-

लखण्डितखण्डांस्तदीयवरेण मारुताभिधानान्देवान्कारयित्वा दिवं प्रविष्टा। तदेतस्मिन्देशे इक्ष्वाकुनन्दनविशालनिर्मितां तद्वंशोद्भवसुमत्यध्युषितां विशालाभिधानां पुरीमद्याधिवसाम इति निश्चित्य संप्राप्तः राक्षसक्षयकरणदक्षयोर्दशरथकुमारयो रामलक्ष्मणयोर्विदितवृत्तान्तेन सुमतिना प्रत्युद्गमनादिना सम्यगभ्यर्चितः सराजपुत्रो विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रतस्थे। ततः मिथिलोपकण्ठे जनवर्जितमाश्रमं पश्यन्विश्वामित्रः—'अहल्याभिलाषिणमनार्यवृत्तं वृत्रहणं दृष्ट्वा, गौतमः

मम रूपं समास्थाय कृतवानसि दुर्मते।
अकर्तव्यमिदं यस्माद्विफलस्त्वं भविष्यसि॥

इति इन्द्रं शप्त्वा,

इह वर्षसहस्राणि बहूनि त्वं निवत्स्यसि।
वायुभक्षा निराहारा तप्यन्ती भस्मशायिनी।
अदृश्या सर्वभूतानामाश्रमे त्वं भविष्यसि॥

इति भार्यामपि शप्त्वा तपश्चरणाय हिमाद्रिं गतः' इति पूर्वकथावृत्तान्तं रामायाचचक्षे । अनेन परदाराभिमर्शनं कृतवतः प्राणात्ययो महान्क्लेशो वा भवति इति सूचितम् । तथा च युद्धकाण्डे सीतावाक्यम्—

न हीदृशमनायुष्यं लोके किंचन विद्यते ।
यादृशं पुरुषस्येह परदाराभिमर्शनम् ॥

इति । तथा स्वरूपनाशमकृत्वा वायुभक्षेत्यादिवयोनुरूपशापप्रदानेन चापल्यात्सकृत्परपुरुषप्रवृत्ता स्त्री नियमेन शोचयित्वा पुनः संग्राह्येति सूचितम् । अभ्यासे तु पातित्यम् । तथा च गौतमः— 'निन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः' इति । एकोनपञ्चाशे— गौतममहर्षिकोपादफलमिन्द्रं पितृप्रार्थनालब्धेन मेषवृषणेन देवाः सफलं चक्रुः । तमिममाश्रमं प्रविश्य

तारयैनां महाभागामहल्यां देवरूपिणीम् ।

इति विश्वामित्राज्ञयाश्रमं प्रविश्य रामः स्वपदविन्या-

ससमसमयमेव दृक्पथमारूढां तपोबलविशुद्धाङ्गीं तत्स-
मयसंप्राप्तगौतमसंगतामहल्यां संपूज्य ताभ्यां च प्रतिन-
न्दितो विश्वामित्रपुरःसरो मिथिलामुपाजगाम । पश्चाच्चे-
नानादिगन्तरागतऋषिगणसंपूर्णयज्ञवाटसंदर्शनसंजातकुतू-
हलेन रामेण कतमो देशोऽस्माकं निवासायेति पृष्टो
विश्वामित्रः

निवासमकरोद्देशे विविक्ते सलिलान्विते ।

अनेन द्विजावासः विविक्तसलिलान्वित एव कर्तव्य
इति सूचितम् । तथा च गौतमः— 'एधोदकयवसकु-
शमाल्योपनिष्क्रमणमार्यजनभूयिष्ठमनलससमृद्धं धार्मिका-
धिष्ठितं निकेतमावसितुं यतेत' इति । आपस्तम्बोऽपि—
'प्रभूतैधोदके ग्रामे यत्रात्माधीनं प्रयमणं तत्र वासो धर्म्यो
ब्राह्मणस्य' इति । जनकोऽपि यज्ञवाटसमागतं विश्वा-
मित्रमुपश्रुत्य शतानन्दादिऋत्विग्ब्राह्मणपुरस्कृतोऽर्घ्यादिना
तपोधनं संपूज्य परमासनोपविष्टं विश्वामित्रमनु स्वयमपि
सर्षिसंघ उपविश्य देवोपमाविमौ कुमारौ कस्येति पृष्ट-

वान् । विश्वामित्रोऽपि दशरथसकाशात्सिद्धाश्रमे यज्ञरक्षणाय समानीतौ निगृहीतसुबाहुमारीचौ स्वसंदर्शनमात्रेण निवृत्तशापामहल्यां गौतममहर्षिणा संयोजितवन्तौ माहेश्वरधनुरारोपणं कर्तुकामौ दाशरथी रामलक्ष्मणावित्यवादीत् । एकपञ्चाशे— ततः जनककुलपुरोधाः शतानन्दः श्रुतजननीवृत्तान्तः गाधिनन्दनं दशरथनन्दनौ च प्रशस्य रामाय कौशिकप्रभावमकथयत्— पुरा खलु कुशिकवंशसंभूतोऽयं बहुवर्षसहस्रं धर्मतो राज्यं परिपालयन्सकलदेशदिदृक्षया स्वसैन्यपरिवृतो गाधिसूनुराश्रमान्बहुतपस्विसंसेवितान्विचरञ्श्रमविषण्णो भगवन्तं वसिष्ठं ददर्श । द्विपञ्चाशत्त्रिपञ्चाशयोः— वसिष्ठोऽपि स्वाश्रममभ्यागतं प्रणतं विश्वामित्रं स्वागतवचनादिभिरभिपूज्याग्निहोत्रादिषु कुशलं पृष्टवन्तं ससैन्यं राजानमातिथ्येन निमन्त्र्य कामधेनुकल्पितषड्रसोपेतभक्ष्यभोज्यादिसंतृप्तेन शबलामाहात्म्यसंदर्शनसंजातलोभेन विश्वामित्रेण

हैरण्यकक्ष्यान्ग्रैवेयान्सुवर्णाङ्कुशभूषितान् ।
ददामि कुञ्जराणां ते सहस्राणि चतुर्दश ॥

हैरण्यानां रथानां च श्वेतानां च चतुर्युजाम् ।
ददामि ते शतान्यष्टौ किंकिणीकविभूषितान् ॥

हयानां देशजातानां कुलजानां महौजसाम् ।
सहस्रमेकं दश च ददामि तव सुव्रत ॥

नानावर्णाभियुक्तानां वयःस्थानां तथैव च ।
ददाम्येकां गवां कोटिं शबला दीयतां मम ॥

यावदिच्छसि रत्नं वा हिरण्यं वा द्विजोत्तम ।
तावद्ददामि तत्सर्वं शबला दीयतां मम ॥

एवं गवाश्वादिसहस्रै रत्नभूता शबला रत्नहारिणे मह्यं देयेति संप्रार्थितो वसिष्ठः

नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ।
राजन्दास्यामि शबलां राशिभी रजतस्य वा ॥

अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च ॥

स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।
एतदेव हि मे रत्नमेतदेव हि मे धनम् ॥

एतदेव हि सर्वस्वमेतदेव हि जीवितम् ।
दर्शश्च पूर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ॥

एतदेव हि मे राजन्विविधाश्च क्रियास्तथा ।
अदोमूलाः क्रियाः सर्वा मम राजन्न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥

इति प्रत्याचख्यौ । अनेन सकलवैदिककर्मविद्याजीवनादिकरत्वेनातिपवित्रत्वेन च गवामतिमाहात्म्यं गवामविक्रयतो पर्याप्तवृत्तिकानामप्याशानिषेधश्चेति त्रितयमपि सूचितम् । तथा महाभारते आनुशासनिके पर्वणि युधिष्ठिरं प्रति भीष्मवचनम्— अचरेभ्यश्च भूतेभ्यश्चरा श्रेष्ठा नराः सदा । ब्राह्मणाश्च ततः श्रेष्ठास्तेषु यज्ञाः प्रतिष्ठिताः ॥ यज्ञैरवाप्यते सोमः स च गोषु प्रतिष्ठितः । गोषु सोमः प्रतिष्ठित इति च तैत्तिरीयश्रुत्यावगम्यते । श्रुतिश्च— 'यो वै सोमं भक्षयित्वा संवत्सरं सोमं न वि-

पिबति पुनर्भक्ष्योऽस्य सोमपीथो भवति, सोमः खलु वै सांनाय्यं य एवं विद्वान्सांनाय्यं पिबति अपुनर्भक्ष्योऽस्य सोमपीथो भवति' इति। एवं सोमात्मकसांनाय्यस्य गोषु प्रतिष्ठितत्वात् 'सोमो गोषु प्रतिष्ठितः' इति। 'हव्यं कव्यं तर्पणं शान्तिकर्म यानं वासो वृद्धबालस्य तुष्टिः। एतान्सर्वान्गोप्रदाने गुणान्वै दाता राजन्नाप्नुयाद्वै सदैव। अन्नं हि परमं गावो देवानां परमं हविः। स्वाहाकारवषट्-कारौ गोषु नित्यं प्रतिष्ठितौ। गावो यज्ञस्य हि फलं गोषु यज्ञाः प्रतिष्ठिताः। नाकीर्तयित्वा गाः सुप्यात्ताः संस्मृत्यैव चोत्पतेत्। गवां मूत्रपुरीषस्य नोद्विजेत कथंचन। न चासां मांसमश्नीयाद्गवां पुष्टिं तथाप्नुयात्॥ समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वत्सवंतीतां ब्रह्मलोके महीयते॥ यावन्ति रोमाणि भवन्ति धेन्वास्तावन्ति वर्षाणि महीयते सः। स्वर्गाच्च्युतश्चापि ततो नृलोके प्रसूयते वै विपुले गृहे सः॥ गावो ममाग्रतो नित्यं गावः पृष्ठत एव च। गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम्॥ इत्याचम्य जपेत्सायं प्रातश्च पुरुषः सदा।

यदहा कुरुते पापं तस्मात्स परिमुच्यते ॥ नातः परतरं दानं नातः पुण्यतरं फलम् । नातो विशिष्टं लोकेषु भूतं भवितुमर्हति ॥ त्वचा लोम्नाथ शृङ्गैर्वा वालैः क्षीरेण मेदसा । यज्ञं वहति संभूय किमस्त्यभ्यधिकं ततः ॥ गावो महार्थाः पुण्याश्च तारयन्ति च मानवान् । धारयन्ति प्रजाश्चेमा हविषा पयसा तथा ॥ न हि पुण्यतमं किंचिद्गोभ्यो भरतसत्तम । एताः पुण्याः पवित्राश्च त्रिषु लोकेषु सत्तमाः ॥ देवानामुपरिष्टाच्च गावः प्रतिवसन्ति वै । दत्त्वा चैतास्तारयते यान्ति स्वर्गं मनीषिणः ॥ गाश्च शुश्रूषते यश्च समन्वेति च सर्वशः । तस्मै तुष्टाः प्रयच्छन्ति वरानपि सुदुर्लभान् ॥ निर्हृतैश्च यवैर्गोभिर्मासं प्रसृतयावकः । ब्रह्महत्यासमं पापं सर्वमेतेन शुध्यति ॥ श्रीः कृत्वेह वपुः कान्तं गोमध्येषु विवेश ह । अप्येकाङ्गेप्यधो वस्तुमिच्छामि च सुकुत्सिते ॥ न वोऽस्ति कुत्सितं किंचिदङ्गेष्वालक्ष्यतेऽनघाः । पुण्याः पवित्राः सुभगा मम वासं प्रयच्छथ ॥ वसेयं यत्र वो देहे तन्मे वक्तुमिहार्हथ । गावः— 'अवश्यं मानना कार्या तवास्माभिर्यशस्विनि ।

शकृन्मूत्रे वस त्वं हि पुण्यमेतद्धि नः शुभे'। श्रीः— 'दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुपहात्मकः॥ एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदाः। एवं गोशकृतः पुत्र माहात्म्यं तेऽनुवर्णितम्॥ ये च गां संप्रयच्छन्ति हुताशिष्टाशिनश्च ये। तेषां सन्नाणि यज्ञाश्च नित्यमेव युधिष्ठर॥ ऋते दधिघृतेनेह न यज्ञः संप्रवर्तते। तेन यज्ञस्य यज्ञत्वमदोमूलं च कथ्यते॥ यज्ञाङ्गं कथिता गावो यज्ञ एव च वासव। एताभिश्च विना यज्ञो न वर्तेत कथंचन। धारयन्ति प्रजाश्चैव पयसा हविषा तथा। एतासां तनयाश्चापि कृषियोगमुपासते॥ जनयन्ति च धान्यानि बीजानि विविधानि च। ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः॥ तथा च बोधायनः— 'अपि वा द्यूतमोदनं पक्त्वा तस्योपरिष्टात्प्रभूतमाज्यं पयो वानीय तस्मादेतत्सर्वं करोति यद्वा कार्यं विज्ञायते च धेन्वै वा एतद्रेतो यदाज्यं पयो वा अनड्वहस्तण्डुला' इति। एतत्ते सर्वमाख्यातं पावनं च महाद्युते। पवित्रं परमं वापि गवां माहा-

त्म्यमुत्तमम् ॥ कीर्तितं पुरुषव्याघ्र सर्वपापप्रमोचनम् । य इदं कीर्तयेन्नित्यं ब्राह्मणेभ्यः समाहितः ॥ हव्यक-व्येषु यज्ञेषु पितृकार्येषु चैव ह । सार्वकामिकमक्षय्यं पितॄंस्तस्योपतिष्ठते ॥ गोषु भक्तश्च लभते यद्यदिच्छति मानवः । स्त्रियोऽपि भक्ता या गोषु ताश्च काममवाप्नुयुः । न किंचिदुर्लभं चैव गवां भक्तस्य भारत ॥ गुण-वचनसमुच्चयैकदेशो नृवर मयैष गवां प्रकीर्तितस्ते । न च परमिह दानमस्ति गोभ्यो भवति न चापि परायणं तथान्यत् ' इति । एवं स्थलान्तरेऽपि युधिष्ठिरः— दर्शने कीदृशः स्नेहः संवासे च पितामह । महाभाग्यं गवां चैव तन्मे व्याख्यातुमर्हसि । भीष्मः— 'पुरा खलु परित्यक्तकामक्रोधं गङ्गायमुनासंगमे जलमध्ये तपश्चरन्तं धीवरैर्जालप्रक्षेपेण यादोभिः सह कूले समानीतं च्यवन-महर्षिमवलोक्य कृतनमस्कारेण नहुषेण किं कुर्याम् इति प्रार्थितो महर्षिर्मम मूल्यं मत्स्यमूल्यैः सह एभ्यो धीवरे-भ्यः प्रयच्छेत्यवोचत् । ततः सहस्रलक्षकोटिधनेनार्धरा-ज्यकृत्स्नराज्याभ्यां च क्रमेण निष्क्रये कृतेऽपि अननु-

रूपनिष्क्रयं मन्वानं च्यवनं विचिन्त्य अनुरूपनिष्क्रयालाभ-चिन्तया खिद्यमानो नहुषः गवि जातेन केनचिन्मुनिना प्रदर्शितानुरूपनिष्क्रयगवा निष्क्रयं कृत्वा उत्तिष्ठेत्युक्तवान्। च्यवनः— 'उत्तिष्ठाम्येष राजेन्द्र सम्यक्क्रीतोऽस्मि ते-ऽनघ ॥ गोभिस्तुल्यं न पश्यामि धनं किंचिदिहाच्युत। कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ॥ गवां प्रश-स्यते वीर सर्वपापहरं शिवम्। गावो लक्ष्म्याः सदा मूलं गोषु पाप्मा न विद्यते ॥ अन्नमेव सदा गावो देवानां परमं हविः। स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ॥ गावो यज्ञस्य नेत्र्यो वै तथा यज्ञस्य ता मुखम्। अमृतं ह्यव्ययं दिव्यं क्षरन्ति च वहन्ति च ॥ अमृतायतनं चैताः सर्वलोकनमस्कृताः। तेजसा वपुषा चैव गावो वह्निसमा भुवि ॥ गावो हि सुमहत्तेजः प्राणिनां च सुखप्रदाः। निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ॥ विराजयति तं देशं पापं चास्या-पकर्षति। गावः स्वर्गस्य सोपानं गावः स्वर्गे प्रपूजि-ताः ॥ गावः कामदुहो देव्यो नान्यत्किंचित्परं स्मृतम्।

इत्येतद्वोषु मे प्रोक्तं माहात्म्यं भरतर्षभ ॥ गुणैकदेशवचनं शक्यं पारायणं न तु । ततो निषादा मुनिं प्रति ऊचुः— दर्शनं कथनं चैव सहास्माभिः कृतं मुने ॥ सतां सप्तपदं मैत्रं प्रसादं नः कुरु प्रभो । हवींषि सर्वाणि यथा ह्युपभुङ्क्ते हुताशनः ॥ एवं त्वमपि धर्मात्मन्पुरुषोऽग्निः प्रतापवान् । प्रसादयामहे विद्वन्भवन्तं प्रणता वयम् ॥ अनुग्रहार्थमस्माकमियं गौः प्रतिगृह्यताम्' । च्यवनः— 'कृपणस्य च यच्चक्षुर्मुनेराशीविषस्य च । नरं समूलं दहति कक्षमग्निरिव ज्वलन् । प्रतिगृह्णामि वो धेनुं कैवर्ता मुक्तकिल्बिषाः ॥ दिवं गच्छत वै क्षिप्रं मत्स्यैः सह जलोद्भवैः' इति । एवं श्रुतिस्मृतीतिहासपुराणादिषु बहुप्रकारेण प्रतिपाद्यमानं गोमाहात्म्यं वाचामगोचरम् इति दिक्प्रदर्शनमात्रं कृत्वा विरम्यते । एवं सर्वसाधारण्येन गोजातिमात्रस्यैतादृशं माहात्म्यं चेत्किमु वक्तव्यं सर्वकामदोहिन्या वसिष्ठधेनोर्माहात्म्ये ? प्रपञ्चितं च वसिष्ठकामधेनुमाहात्म्यं व्यासवाल्मीकिकालिदासादिभिरित्यलं विस्तरेण । इति गोमाहात्म्यम् ॥ अथ विक्रेयतायाम्—

यावदिच्छसि रत्नं वा हिरण्यं वा द्विजोत्तम ।
तावद्दामि तत्सर्वं शबला दीयतां मम ॥

इत्युक्ते सर्वाभीष्टग्रहणपूर्वकं गोप्रदाने विक्रयो भवेदिति 'न दास्ये कामदोहिनीम्' इति परिहृतम्। अनेन गोविक्रयो न कर्तव्य इति व्यङ्ग्यमर्यादया उक्तं भवति। यज्ञे तु दक्षिणात्वेन विहितगोभूम्यादीनां स्वानुपयुक्तानां यजमानसकाशात् विनिमये न दोष इति दशरथाश्वमेधे रामायणं स्फुटम्। विक्रयस्तु निषिद्धः। तथा च भारते आनुशासनिके— 'ये दोषा यादृशाश्चैव द्विज यज्ञोपघातके। विक्रये चापहारे च ते दोषा ये श्रिता गवाम्। अपहृत्य तु यो गां वै ब्राह्मणाय प्रयच्छति। यावद्दाने फलं तस्यात्तावन्नरकमृच्छति' इति। तत्रैव वनपर्वणि— 'एका एकस्य दातव्या न बहूनां कदाचन। सा चेद्विक्रयमापन्ना हन्ति चासप्तमं कुलम्' इति गोरविक्रेयता ॥ 'अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च' इति हव्यकव्यप्राणयात्रानिर्वाहे सति अधिकाशा न कर्तव्येत्यपि व्य-

ङ्क्यमर्यादया उक्तं भवति । तथा चापस्तम्बः— 'वृत्तिं प्राप्य विरमेत्' इति । चतुःपञ्चाशपञ्चपञ्चाशयोः— अथ बलावलेपेन विश्वामित्रो वसिष्ठवाक्यमनादृत्य ब्रह्मस्वहरणे महादोषं जानन्नपि बलादेव शबलामाचकर्ष । अस्ति च ब्रह्मस्वहरणे दोषः । तथा च बोधायनः— 'न त्वेव कदाचित्स्वयं राजा ब्राह्मणस्वमाददीत, अथाप्युदाहरन्ति 'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । ब्रह्मस्वं पुत्रपौत्रघ्नं विषमेकाकिनं हरेत् । तस्माद्राजा ब्राह्मणस्वं नाददीत परं ह्येतद्विषं यद्ब्राह्मणस्वम्' इति श्लोकमुदाजहार । तथा चानुशासनिके धर्मपुत्रं प्रति भीष्मवचनम्— 'शुभे पात्रे ये गुणा गोप्रदाने तावान्दोषो ब्राह्मणस्वापहारे ॥ सर्वावस्थं ब्राह्मणस्वापहारो दाराश्चैषां दूरतो वर्जनीयाः । तत्रैव गोप्रदाने भ्रान्त्या अन्यब्राह्मणगवीप्रदानेन नृगस्य ब्राह्मणशापेन कृकलासभावमापन्नस्य कृष्णदर्शनेन शापविमोक्षानन्तरं वासुदेव इमं श्लोकमुदाजहार— 'ब्राह्मणस्वं हृतं हन्ति नृगं ब्राह्मणगौरिव' । महाप्रस्थाने इन्द्रं प्रति युधिष्ठिरवाक्यम्— 'प्रतिप्रदानं

शरणागतस्य स्त्रियो वधो ब्राह्मणस्वापहारः । मित्रद्रोहस्तानि चत्वारि शक्र भक्त्यागश्चैव समं मतो मे' । उद्योगपर्वणि प्रजागरे धृतराष्ट्रं प्रति विदुरवाक्यम्— 'अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः । ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति । रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ नैतान्स्मरति कृत्येषु याचतश्चाभ्यसूयति । एतान्दोषान्नरः प्राज्ञो बुद्ध्या बुद्ध्वा विवर्जयेत्' इति । सर्वधर्मज्ञस्यापि विश्वामित्रस्य एतादृशी बुद्धिरभूत् । यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् । बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥ बुद्धौ कलुषभूतायां विनाशे समुपस्थिते । अनयो नयसंकाशो हृदयान्नापसर्पति' इति । भवितव्यस्यापरिहार्यत्वात्कामक्रोधादिभिर्व्याप्तः सन्सर्वं विस्मृत्य वसिष्ठधेनुमाकर्षयामास । सापि असहमाना कामदोहिनी शान्त्या क्षमया युक्तं वसिष्ठमवोचत्—

न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः ।
ब्रह्मन्ब्रह्मबलं दिव्यं क्षत्रात्तु बलवत्तरम् ॥

नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मबलसंवृतः ।
तस्य दर्पबलं यत्तन्नाशयामि दुरात्मनः ॥

इति । तदनु वसिष्ठाभ्यनुज्ञातशबलानिर्मितपह्लवादिनिकृष्टजातिनिषूदितं स्वं बलं वसिष्ठहुंकारनिर्दग्धं पुत्रशतं चावलोक्य व्रीडितो विश्वामित्रः तपश्चरणसंतुष्टमहादेवप्रसादलब्धसर्वास्त्रगणः वसिष्ठाश्रमं पुनरागत्य नाशयामास । चिरसंवर्धिताश्रमविनाशसंजातकोपो वसिष्ठो भगवान्क्रोधादिदं वचनमब्रवीत् —

क्षत्रबन्धो स्थितोऽस्म्येष यद्बलं तद्विदर्शय ।
नाशयाम्यद्य ते दर्पं क्षत्रस्य तव गाधिज ॥

क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् ।
पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ॥

इत्यभिधाय ब्रह्मदण्डमुद्यम्य तस्थौ । ततो विश्वामित्रप्रयुक्ताग्नेयादिब्रह्मास्त्रावधिसर्वास्त्रजातं स्वहस्तस्थितब्रह्मदण्डेन ग्रसमानस्य

त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणम् ।
रोमकूपेषु सर्वेषु वसिष्ठस्य महात्मनः ॥

मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ।
प्राज्वलद्ब्रह्मदण्डश्च वसिष्ठस्य करोद्यतः ॥

विधूम इव कालाग्निर्यमदण्ड इवापरः ।
ततोऽस्तुवन्मुनिगणा वसिष्ठं जपतां वरम् ॥

अमेयं ते बलं ब्रह्मंस्तेजो धारय तेजसा ।
निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महातपाः ॥

प्रसीद जपतां श्रेष्ठ लोकाः सन्तु गतव्यथाः ।
एवमुक्तो महातेजाः शमं चक्रे महातपाः ॥

अनेन स्वस्य परैरुपद्रवसहस्रे सत्यपि लोकानुग्रहाय क्रोधं निगृह्य क्षमैव कार्या, अयमेव ब्राह्मणस्य मुख्यो धर्म इति द्योत्यते । तथा च गीतायाम्— 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानविज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्' इति । आदिपर्वणि शृङ्गिणं प्रति

शमीकवाक्यम्— 'क्रोधो हि धर्मं हरति यतीनां दुःख-संचितम्। ततो धर्मविहीनानां गतिरिष्टा न विद्यते॥ शम एव यतीनां हि क्षमिणां सिद्धिकारकः। क्षमावता-मयं लोकः परश्चैव क्षमावताम्॥ तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः। क्षमया प्राप्स्यते लोका-न्ब्राह्मणः समनन्तरान्' इति। आरण्यके पर्वणि द्रौपदीं प्रति धर्मपुत्रवाक्यम्— 'तस्माद्बलवता चैव दुर्बलेन च नित्यदा। क्षन्तव्यं पुरुषेणाहुरापत्सु च विजा-नता॥ मन्योर्हि विजयं कृष्णे प्रशंसन्तीह साधवः। क्षमावतो जयो नित्यं साधोरिह सतां मतम्। सत्यं चानृततः श्रेयो नृशंसाच्चानृशंसता। तमेवं बहुदोषं तु क्रोधं साधुविवर्जितम्॥ यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते। तेजस्विनं तं विद्वांसो मन्यन्ते तत्त्वद-र्शिनः॥ हन्त्यवध्यानपि क्रुद्धो गुरून्क्रुद्धस्तुदत्यपि। तस्मात्तेजसि कर्तव्यः क्रोधो दूरे प्रतिष्ठितः॥ तस्माच्छ-क्त्यजेत्क्रोधं पुरुषः सम्यगाचरन्। हन्युर्हि पितरः पुत्रान्पुत्राश्चापि तथा पितॄन्॥ हन्युश्च पतयो भार्यां

भार्याश्चापि तथा पतीन्। तस्मान्मन्युर्विनाशाय प्रजानामभवाय च ॥ यस्मात्तु लोके दृश्यन्ते क्षमया पृथिवीसमाः। तस्माज्जन्म च भूतानां भवश्च प्रतिपद्यते॥ क्षन्तव्यं पुरुषेणेह सर्वापत्सु सुशोभने। क्षमावतो हि भूतानां जन्म चैव प्रकीर्तितम् ॥ अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम्। गीताः क्षमावतां कृष्णे काश्यपेन महात्मना ॥ क्षमा धर्मः क्षमा यज्ञः क्षमा वेदः क्षमा श्रुतम्। य एतदेवं जानाति स सर्वं क्षन्तुमर्हति ॥ क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतं च भावि च। क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥ अतियज्ञविदां लोकान्क्षमिणः प्राप्नुवन्ति च। क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम्॥ अतिब्रह्मविदां लोकानति चापि तपस्विनाम्। अन्ये वै जपिनां लोकाः कर्मिणामपरे तथा। क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥ क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम्। क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा यशः ॥ तां क्षमां तादृशीं कृष्णे कथमस्माद्विधस्त्यजेत्। यस्यां ब्रह्म च सत्यं च यज्ञा

लोकाश्च धिष्ठिताः ॥ क्षन्तव्यमेव सततं पुरुषेण विजानता । यदा हि क्षमते सर्वं ब्रह्म संपद्यते तदा । क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ इह संमानमर्हन्ति परत्र च शुभां गतिम् । येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ॥ तेषां परतरे लोकास्तस्मात्क्षान्तिः परा मता । इति गीता काश्यपेन गाथा नित्यं क्षमावताम् ॥ श्रुत्वा गाथाः क्षमायास्त्वं तुष्य द्रौपदि मा क्रुधः । एतदात्मवतां वृत्तमेष धर्मः सनातनः ॥ क्षमा चैवानृशंस्यं च तत्कर्तास्म्यहमञ्जसा' इति । विष्णुपुराणेऽपि पराशरं प्रति वसिष्ठवाक्यम्— 'संचितस्यापि महता वत्स क्लेशेन मानवैः । यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥ स्वर्गापवर्गव्यासेधकारणं परमर्षयः । अलं निशाचरैर्दग्धैर्दीनैरनपराधिभिः ॥ सत्रं ते विरमत्वेतत्क्षमासारा हि साधवः' इति ।

विश्वामित्रो विनिकृतो विनिश्वस्येदमब्रवीत् ।
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ।
एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥

अत्र क्षत्रियग्रहणं प्रकृताभिप्रायम्, सर्वापेक्षयापि ब्राह्मणानामधिकत्वात्। तथा च मनुः— 'ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः। तस्मान्मेध्यतरं चास्य मुखमुक्तं स्वयंभुवा॥ उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात्। सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः॥ तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत्। हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये॥ यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किं भूतमधिकं ततः॥ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः। बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणास्तथा॥ उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती। स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते॥ ब्राह्मणो जायमानो हि पृथिव्यामधिजायते। ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये॥ सर्वं स्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम्॥ श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति। स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च। आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः'। तथा अत्रैव गौतमकृत

इन्द्रनिग्रहः अहल्योपाख्याने उक्तः । आरण्यकाण्डेऽपि गृहीतब्राह्मणवेष इल्वलः संस्कृतेन मेषभूतस्यामिषेण श्राद्धं व्यपदिश्य निमन्त्रितान्ब्राह्मणान्भोजयित्वा 'वातापे निष्क्रमस्व' इत्यनुजमवदत्; वातापिरपि मेषवन्नदन्

भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत्।

एवमनेकब्राह्मणवधसंजातखेदकलुषितान्तःकरणैस्तन्निग्रहासमर्थैः देवैः प्रार्थितो महर्षिरगस्त्यः तेन च श्राद्धे निमन्त्रितः तदनुजं मेषरूपिणं वातापिं भक्षयित्वा 'वातापे निष्क्रमस्व' इति वदन्तमिल्वलम्,

कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः।
भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम्॥

इत्यब्रवीत्। इल्वलोऽपि भ्रातृवधजनितामर्षः सक्रोधं मुनिमभिद्रवन्

चक्षुषानलकल्पेन निर्दग्धो निधनं गतः।

इत्यगस्त्यकृतवातापील्वलनिग्रहो लक्ष्मणं प्रति रामेणोक्तः।

एवं सुमेरुमिव मामपि प्रदक्षिणीकुर्विति विन्ध्यमहीधरसमुदीरितं वचनमाकर्ण्य दिनमणिः

नाहमात्मेच्छया शैलं करोम्येनं प्रदक्षिणम् ।
एष मार्गः प्रदिष्टो मे यैरिदं निर्मितं जगत् ॥

इत्यवादीत् ।

एवमुक्तस्ततः क्रोधात्प्रवृद्धः सहसाचलः ।
सूर्याचन्द्रमसोर्मार्गं रोद्धुमेवाब्रवीत्परंतप ॥

ततः समाक्रान्ततारापथं विन्ध्यभूधरमशक्यनिरोधमवलोक्य देवैः संप्रार्थितो महाप्रभावो महर्षिः विन्ध्यमहीधरमभिगम्य

दक्षिणामभिगन्तास्मि दिशं कार्येण केनचित् ।
यावदागमनं मह्यं तावत्त्वं प्रतिपालय ।
निवृत्ते मयि शैलेन्द्र ततो वर्धस्व कामतः ॥

इति समाज्ञाप्य दक्षिणाशाभूषणमभूत् । इत्यगस्त्य-

कृतविन्ध्यनिग्रह उक्तः। उत्तरकाण्डे एवं मानवो दण्ड-नृपतिर्मृगयव्याजेन वनं प्रविष्टो भार्गवाश्रमसमीपे संचर-न्तीमनवद्यसर्वावयवां मुनिकन्यकामवलोक्य

कुतस्त्वमसि सुश्रोणि कस्य वासि सुता शुभे।

इति पृष्ट्या ऋषिकन्यया

भार्गवस्य सुतां विद्धि देवस्याक्लिष्टकर्मणः।
अरजां नाम राजेन्द्र ज्येष्ठामाश्रमवासिनीं॥

इति प्रत्युक्तस्तद्रूपसंदर्शनसंदीप्तकामानलः कन्यामवा-दीत्—

प्रसादं कुरु सुश्रोणि न कालं क्षेप्तुमर्हसि।
त्वद्गते हि मम प्राणा विशीर्यन्ते शुभानने॥

तथा चातिक्रुद्धस्वपितृशापेमाशंसमानया बहुशः निरा-कृतोऽपि मदान्धः बलात्कारेण कन्यकां धर्षयामास। स च महर्षिर्भार्गवः तत्प्रधर्षितां रुदतीं कन्यकामवलोक्य

सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः ।

समन्ताद्योजनशतं विषयं चास्य दुर्मतेः ।
धक्ष्यते पांसुवर्षेण महता पाकशासनः ।

दण्डस्य विषयो यावत्तावत्सर्वं समुच्छ्रयम् ॥
पांसुवर्षमिवालक्ष्यं सप्तरात्रं भविष्यति ।

इति शशाप ॥

तच्च राज्यं नरेन्द्रस्य सभृत्यबलवाहनम् ।
सप्ताहाद्भस्मसंभूतं यथोक्तं ब्रह्मवादिना ॥

ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते ।
तपस्विनः क्षिता यत्र जनस्थानमथोऽभवत् ॥

अत्रैव अथ भार्गवकृतदण्डनिग्रह उक्तो नृगोपाख्याने— एवं नृगनामको राजा अजस्रगोदानमाचरन्कस्यचिद्दरिद्रस्य गां स्वगवीभिः संसृष्टमन्यस्मै दत्तवान् ; ततः

क्षुधार्तेन दरिद्रेण स्वां गामन्वेषमाणेन कनखले कस्यचिद्ब्राह्मणस्य गृहे संचरन्तीं धेनुमवलोक्य मदीयेयं गौरिति अभिहितो ब्राह्मणः नृगराजेन मह्यमेव गौरियं प्रत्तेत्युक्तवान् ।

विवदन्तौ स्वतोऽन्योन्यं राजानमभिजग्मतुः ।
तौ राजभवनद्वारि अप्राप्य नृपशासनम् ॥

अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः ।
ऊचतुश्च महात्मानौ तावुभौ द्विजसत्तमौ ॥

क्रुद्धौ परमसंतप्तौ वाक्यं घोराभिसंहितम् ।
अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वं नैषि दर्शनम् ॥

बहुवर्षसहस्राणि कृकलासो भविष्यसि ।
एवं तौ शापमुत्सृज्य ब्राह्मणौ विगतज्वरौ ॥

तौ गां हि दुर्बलां वृद्धां ददतुर्ब्राह्मणाय वै ।
एवं स राजा तं शापमुपभुङ्क्ते सुदारुणम् ॥

इति ब्राह्मणाभ्यां नृगनिग्रह उक्तः। विष्णुपुराणेऽपि—दुर्वासाः स्वेन दत्तां पुष्पमालां पुरंदरेणानादरेण ऐरावतस्कन्धदेशे निक्षिप्तामवलोक्य 'ऐश्वर्यमत्त दुष्टात्मन्नवलिप्तोऽसि वासव। श्रियो धाम स्रजं दिव्यां महत्तां नाभिनन्दसि ॥ अतोऽवमानमस्मासु मानिना भवता कृतम्। तस्मात्प्रणष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति' इति शशाप; 'ततःप्रभृति निश्रीकं सशक्रं भुवनत्रयम्। मैत्रेयासीदपध्वस्तं संक्षीणौषधिवीरुधम् ॥ न यज्ञाः संप्रवर्तन्ते न तपस्यन्ति तापसाः। न च दानादिधर्मेषु मनश्चक्रे तदा जनः ॥ लोभाभिभूता निश्रीका दैत्याः सत्त्वविवर्जिताः। श्रिया विहीनैर्निःसत्त्वैर्देवैश्चक्रुस्ततो रणम् ॥ निर्जितास्त्रिदशा दैत्यैरिन्द्राद्याः शरणं ययुः। पितामहं महाभागं हुताशनपुरोगमाः' इति दुर्वाससा इन्द्रनिग्रह उक्तः। तत्रैव राजा दम्भोद्भवो नाम स्वभुजबलावलेपेन 'अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेद्भुवि। शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वापि शस्त्रभृत्' इति स्वसंदर्शनाय समागतान्ब्राह्मणक्षत्रियविशः पर्यपृच्छत्।

मन्त्रिपुरोहितादिभिरनुचितमिति बहुशः निवारितोऽपि तानविगणय्य सर्वोत्कृष्टमात्मानं मन्यमानः पुनरपि तथैव ब्राह्मणान्पर्यपृच्छत् । ततः 'उदीर्यमाणं राजानं क्रोधादीप्ता द्विजातयः । अनेकजयिनौ संख्ये यौ वै पुरुषसत्तमौ ॥ तयोस्त्वं न समो राजन्भवितासि कदाचन' इत्यभिहितो राजा चतुरङ्गबलपरिवृतो युद्धाय नरनारायणाश्रमसमीपमागम्य ताभ्यां च अर्घ्यपाद्यादिभिरभ्यर्चितोऽभूत् । किमागमनमिति पृष्टो राजा 'भवद्भ्यां युद्धमाकाङ्क्षन्नुपयातोऽस्मि पर्वतम् । आतिथ्यं दीयतामेतत्काङ्क्षितं मे चिरं प्रति' इति पृष्टवान् । ततः शमप्रधाने तपोवने कुतो युद्धकथेति निवारयन् तत्कृतबहुप्रार्थनयाङ्गीकृतसंग्रामः नरः शस्त्रास्त्रवर्षेणानवकाशमाकाशं कुर्वाणं सबलवाहनं राजानं प्रति ऐषीकमस्त्रं प्रायुङ्क्त । ततः 'तेषामक्षीणि कर्णांश्च नासिकाश्चैव मायया । निमित्तवेधी स मुनिः ऐषीकाभिः समार्पयत् । स दृष्ट्वा श्वेतमाकाशमिषीकाभिः समाचितम् । पादयोर्न्यपतद्राजा स्वस्ति मेऽस्त्विति चाब्रवीत्' इति नरेण दम्भोद्भवनि-

ग्रह उक्तः। एवमन्यत्रापि महर्षिप्रसादेन प्राप्तसमस्तराज्यो वेनोऽवलेपेन 'न यष्टव्यं न दातव्यं न होतव्यं कथंचन। भोक्ता यज्ञस्य कस्त्वन्यो ह्यहं यज्ञपतिः प्रभुः' इति जनपदेषु समुद्घोषयन् 'सकलजनहितकरदीर्घसत्रेण यज्ञेश्वरं भगवन्तं विष्णुमाराधयामः, तवापि तत्र भागो भविता' इति महर्षिप्रार्थनामनादृत्य 'कोऽयं हरिरिति ख्यातो यो वो यज्ञेश्वरो मतः। ब्रह्मा जनार्दनः शंभुरिन्द्रो वायुर्यमो रविः॥ हुतभुग्वरुणो धाता पूषा भूमिर्निशाकरः। नृपस्य ते शरीरस्थाः सर्वदेवमयो नृपः॥ भर्तृशुश्रूषणं धर्मो यथा स्त्रीणां परो मतः। ममाज्ञापालनं धर्मो भवतां च तथा द्विजाः' इत्याज्ञापयामास। तद्वचनश्रवणसंजातकोपा महर्षयः 'यो यज्ञपुरुषं विष्णुमनादिनिधनं प्रभुम्। विनिन्दत्यधमाचारो न स योग्यो भुवः पतिः॥ इत्युक्त्वा मन्त्रपूतैस्ते कुशैर्मुनिगणा नृपम्। निर्जघ्नुर्निहतं पूर्वं भगवन्निन्दनादिना' इति ब्राह्मणैर्वेननिग्रह उक्तः। आनुशासनिके पवनार्जुनसंवादे—'सहस्रभुजभृच्छ्रीमान्कार्तवीर्योऽभवत्प्रभुः। अस्य लोकस्य स-

र्वस्य माहिष्मत्यां महाबलः ॥ स्वविक्तं तेन दत्तं तु दत्तात्रेयाय कारणे । आराधयामास च तं कृतवीर्यात्मजो मुनिम्' । एवमाराधितादत्तात्रेयात् कार्तवीर्यार्जुनः संग्रामे सहस्रबाहुत्वशत्रुजनाजेयतादिबहुवरान्लब्ध्वा, 'अन्नवीद्वीर्यसंमोहात्को न्वस्ति सदृशो मम । धैर्यवीर्ययशःशौर्यैर्विक्रमेणौजसापि वा' इति । एवं बलावलेपसमुदीरितार्जुनवचनश्रवणसंजातकोपेन मातरिश्वना 'न त्वं मूढ विजानीषे ब्राह्मणं क्षत्रियाद्वरम् । सहितो ब्राह्मणेनेह क्षत्रियः शास्ति वै प्रजाः ॥ त्यजेमं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु । एतेषां कुर्वतः पापं राज्यक्षोभो भविष्यति ॥ अथ वा त्वां महीपाल शमयिष्यन्ति वै द्विजाः' इति प्रत्युक्तेनार्जुनेन 'कुर्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथानये । कर्मणा मनसा वाचा न मत्तोऽस्ति वरो द्विजः ॥ ब्राह्मणाः संश्रिताः क्षत्रं न क्षत्रं ब्राह्मणाश्रितम् । अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम् ॥ यादृशं पृथिवीभूतं तादृशं ब्रूहि मे द्विजम् । वायोर्वा सदृशं किंचिद्ब्रूहि त्वं ब्राह्मणोत्तमम् ॥ अपां वा सदृशं वह्नेर्ब्रूहि

त्वं नभसोऽपि वा ' इत्यधिक्षिप्तो वायुरकथयत् । अङ्ग-नृपतिप्रापितमात्मनो यज्ञदक्षिणाभावमवगत्य सकोपं भू-मिभावं विहाय ब्रह्मणः सदनं प्रविष्टां पृथिवीमवलोक्य परित्यक्तस्वदेहः परिगृहीतभूमिभावः काश्यपः सकल-प्रजाधारणाङ्कुरौदनप्रमुखपृथिवीकृत्यं त्रिंशद्वर्षसहस्रमक-रोत् । 'ब्रवीम्यन्यं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति । एवमुतथ्योऽपि भगवान्सोमदत्तां भद्राभिधां कन्यां कामपाशबद्धवरुणापहृतामवलोक्य 'अपिबत्तेजसा वारि विष्टभ्य सुमहातपाः । पीयमाने तु सर्वस्मिंस्तोये तु सलि-लेश्वरः ॥ अददाच्छरणं गत्वा भार्यामाङ्गिरसाय वै । ब्रवीम्यन्यं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति । एवं दानवकृतादितेयपरिभवमसहमानो भगवानगस्त्यः— 'प्रजज्वाल च तेजस्वी कालाग्निरिव संक्षये । तेन दीप्तां-शुजालेन निर्दग्धा दानवास्तथा । ब्रवीम्यहं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति । तथा देवदानवसंग्रामे स्वर्भानुकृतपराभवेन क्षीणतेजसि सचन्द्रमसि सवितरि च गाढान्धकारावृतासु दशसु दिक्षु दैतेयैर्हन्यमानान्देवा-

नवलोक्य 'प्रकाशमकरोदत्रिस्तपसा स्वेन संयुगे। जगद्वितिमरं चापि प्रदीप्तमकरोत्तदा । व्यजयच्छत्रुसंघांश्च देवानां स्वेन तेजसा ॥ ब्रवीम्यन्यं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति । तथैव च्यवनो महर्षिरश्विनोर्मघवता सह सोमभागकल्पनाय समारब्धयज्ञस्तद्विघटनाय समुद्यतवज्रहस्तं पाकशासनमभिमन्त्रिताभिरद्भिः संस्तभ्य स्वतेजसा मदनामानं मञ्जाहुतिमयमसुरमसृजत् । 'तस्य दन्तसहस्रं तु बभूव शतयोजनम् । द्वियोजनशतास्तस्य दंष्ट्राः परमदारुणाः ॥ हनुस्तस्याभवद्भूमावास्यं चास्यास्पृशद्दिवम् । जिह्वामूले स्थितास्तस्य सर्वे देवाः सवासवाः' । तदनु तद्दर्शनसंजातसाध्वसं सुरपतिमश्विभ्यां सहाङ्गीकृतसोमपानं विधायासुरमपि मदनामानं चतुर्धा विभज्याक्षमृगयापानस्त्रीनिष्ठमकरोत् 'ब्रवीम्यन्यं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति । तथा च्यवननिर्मितमञ्जाहुतिमयमदनामकासुरमुखं प्रविष्टेषु देवेषु कपनामकदैत्यैराक्रान्तां द्यां भूमिं चावलोक्य 'गच्छ त्वं शरणं विप्रानाशु सैन्द्रा दिवौकसः' इति ब्रह्मणा

समादिष्टैर्देवैः सम्यगर्थिता ब्राह्मणाः कपनाशनमाभिचारिकं कर्म समारेभिरे। 'तच्छ्रुत्वा प्रेषितो दूतो ब्राह्मणेभ्यो धनी कपैः। स च तान्ब्राह्मणानाह धनीकपवचो यथा॥ भवद्भिः सदृशाः सर्वे कपाः किमिह वर्तते। न जेष्यथ निवर्तध्वं निवृत्तानां सुखं हि वः' इति। तद्धनिवचनश्रवणजनितकोपाक्रान्तहृदयैर्ब्राह्मणैः प्रत्याख्यातेन धनिना श्रावितब्राह्मणवृत्तान्ताः 'गृहीत्वास्त्राण्यथो विप्रान्कपाः सर्वे समाद्रवन्'। ततः 'ब्रह्मसृष्टा हव्यभुजः कपान्हत्वा सनातनाः। नभसीव यथाभ्राणि व्यराजन्त नराधिप। ब्रवीम्यन्यं ब्रूहि वा त्वं ब्राह्मणात्क्षत्रियं वरम्' इति। एवं आदित्यान्समारब्धसत्रदीक्षानुकर्शितानवलोक्य खलिनो दानवा हन्तुकामास्तैरेव दैवैर्हन्यमाना ब्रह्मदत्तं सरोऽवगाह्य जीवन्तः पर्वतपरिघादिनानाविधायुधैर्देवान्विक्षोभयामासुः; 'ततस्तैरर्दिता देवाः शरणं वासवं ययुः। स च तैः प्रार्थितः शक्रो वसिष्ठं शरणं ययौ'। ततः खलिबलार्दितानतिदुःखितान्सेन्द्रान्देवानवलोक्य परमकारुणिको वसिष्ठः 'अयत्नेनादहत्सर्वान्खलिनः स्वेन तेजसा। कैला-

सं प्रस्थितांश्चैव नदीं गङ्गां महातपाः ॥ अनयत्तत्सरो दिव्यं तया भिन्नं च तत्सरः । ब्रवीम्यन्यं ब्रूहि वा त्वं वसिष्ठात्क्षत्रियं वरम्' इति । एवम् 'यथा समुद्रो नृपते पूर्णो मृष्टश्च वारिणा । ब्राह्मणैरभिशप्तः सन्बभूव लवणोदकः ॥ सुवर्णवर्णो निर्धूमः संगतोर्ध्वशिखः कविः । क्रुद्धेनाङ्गिरसा शप्तो गुणैरेतैर्विवर्जितः ॥ महतश्चूर्णितान्पश्य येऽध्यासत महोदधिम् । समो न त्वं द्विजातिभ्यः श्रेयो विद्धि नराधिप ॥ गर्भस्थान्ब्राह्मणान्सम्यङ्नमस्यति किल प्रभुः । दण्डकानां महद्राज्यं ब्राह्मणेन विनाशितम् ॥ तालजङ्घं महाजङ्घमौर्वेणैकेन नाशितम् । त्वया च विपुलं राज्यं बलं धर्मश्रुतं तथा । दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् । अथ वा ब्राह्मणं श्रेष्ठं सर्वभूतानुपालकम् ॥ कर्तारं जीवलोकस्य कस्माज्जीवन्न मुह्यसे । ब्राह्मणान्क्षत्रधर्मेण पालयस्वेन्द्रियाणि च ॥ भृगुभ्यस्ते भयं घोरं तत्तु कालाद्भविष्यति' इत्येवमर्जुनं प्रति वायुना ब्राह्मणमाहात्म्यं बहुधा प्रतिपादितम् । एवमादिपर्वणि 'भृगोः सुदयिता भार्या पुलोमेत्यभिविश्रुता । तस्यां समभवद्भर्भो भृगुवीर्यसमु-

द्भवः ॥ अभिषेकाय निष्क्रान्ते भृगौ धर्मभृतां वरे। आश्रमं तस्य रक्षोऽथ पुलोमाभ्यां जगाम ह ॥ इदमन्तरमित्येव हर्तुं चक्रे मनस्तदा। अथाग्निशरणे पश्यञ्ज्वलन्तं जातवेदसम्॥ तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा। मत्पूर्वापहृता भार्या भृगुणानृतकारिणा ॥ सेयं यदि तथा मे त्वं सत्यमाख्यातुमर्हसि। तस्य तद्वचनं श्रुत्वा सप्तार्चिर्दुःखितो भृशम् ॥ भीतोऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः। अग्निरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम्। ततः स गर्भो निवसन्कुक्षौ भृगुकुलोद्वहः ॥ रोषान्मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोऽभवत्। तं दृष्ट्वा मातुरुदराच्युतमादित्यवर्चसम् ॥ तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य ताम्। तं ददर्श पिता तत्र च्यवनं तां च भामिनीम् ॥ स पुलोमां ततो भार्यां पप्रच्छ कुपितो भृगुः। केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते' । पुलोमा उवाच— 'अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता। ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥ साहं तव सुतस्यास्य तेजसा परिमोक्षिता। भस्मीभूतं च तद्रक्षो मामुत्सृज्य

पपात वै' । सौतिरुवाच—'इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् । शशापाग्निमपि क्रुद्धः सर्वभक्षो भविष्यसि' इति । एतेन च्यवनकृतपुलोमाख्यराक्षसनिग्रहः भृगुकृताग्निशापश्चोक्तः । एवमुद्योगपर्वणि धर्मराजं प्रति शल्यवचनम्— देवर्षिगणप्रसादसमासादितदेवराज्योऽपि नहुषः प्राज्यं देवराज्यं स्वभुजबलसमार्जितं मन्वानोऽवलेपेन तपःप्रधानानगस्त्यप्रमुखान्सप्तर्षीनपि स्ववि मानधुर्यान्संविधायात्यल्पप्रमाणतया लब्धान्दोलिकादण्डं स्खलितगमनं दक्षिणाशाभूषणमगस्त्यमहर्षिं पुरतोऽवलोक्य मूर्ध्नि पदास्पृशत् । तत्प्रधर्षणजनितकोपः परमर्षिः 'अदुष्टं दूषयसि मां यच्च मूर्ध्न्यस्पृशः पदा । यद्यपि त्वमृषीन्मूढ ब्रह्मकल्पान्दुरासदान् । वाहान्कृत्वा वाहयसि तेन स्वर्गाद्भ्रतप्रभः । ध्वंस पाप परिभ्रष्टः क्षीणपुण्यो महीतलम् । दश वर्षसहस्राणि सर्परूपधरो महान् । एवं भ्रष्टो दुरात्मा स देवराज्यादरिंदम' । अनेनागस्त्यकृतो नहुषनिग्रह उक्तः । मुसलपर्वणि—एवं सारणप्रमुखाः वृष्ण्यन्धका अपि धृतस्त्रीवेषं साम्बं विधाय कल्पानलकल्पकोपान्नारदविश्वामित्रक-

ण्वान्यदृच्छया समागतान्किमियं जनयिष्यतीति पप्रच्छुः। तद्वचनश्रवणमात्रेण प्राज्याज्यसिक्ता दीप्ताग्नय इव तत्कृतविप्रलम्भप्रधर्षणामसहमाना महर्षयः 'वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम्। वासुदेवस्य दायादः साम्बोऽयं जनयिष्यति॥ येन यूयं सुदुर्वृत्ताः नृशंसा जातमन्यवः। उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्दनौ। समुद्रे यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः॥ जरः कृष्णं महात्मानं शयानं भुवि भेत्स्यति' इत्यब्रुवन्। एतेन नारदादिकृतो वृष्ण्यन्धकनिग्रह उक्तः। वनपर्वणि— एवं वृत्रवधजनितामर्षेण त्रिलोकनाशाय त्रिजगन्मूलभूततपस्विजनवधाय समुद्युक्तैर्दैवभयेन समुद्रं प्रविष्टै रात्रावागत्याश्रमनिवासिमुनिजनकदनमाचरद्भिः कालेयैः कृतं निःस्वाध्यायवषट्कारं नष्टोत्सवं च जगदवलोक्य तत्कृतोपद्रवपरिहाराय त्रिदशैः समभ्यर्थितो विष्णुः 'समुद्रस्य क्षये बुद्धिर्भवद्भिः संप्रधार्यताम्। अगस्त्येन विना को हि शक्तोऽन्योऽर्णवशोषणे' इत्यवादीत्। ततो देवास्तद्वचनश्रवणसमनन्तरमगस्त्यमहर्षिसमीपमागत्य 'एवं त्वयेच्छाम कृतं हि

कार्यं महार्णवं पीयमानं महात्मन् । ततो वधिष्याम सहानुबन्धान्कालेयसंज्ञान्हि सुरद्विषस्तान्' इति प्रार्थयामासुः । सोऽपि महर्षिः 'उवाच सहितान्देवानृषींश्चैव समागतान् । एष लोकहितार्थं वै पिबामि वरुणालयम् । भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम्' इत्यभिधाय 'समुद्रमपिबत्क्रुद्धः सर्वलोकस्य पश्यतः' । ततस्त्रिदशाः संदर्शनपथमवतीर्णान्कालेयान्निषूदयामासुः इति । एतेन अगस्त्यकृतकालेयावकाशदातृसमुद्रनिग्रह उक्तः आनुशासनिके । एवं रौक्मिणेयेन ब्राह्मणपूजायां किं फलं कुतो वा तेषामीश्वरत्वम् इति पृष्टो जगन्नायकः श्रीकृष्णः, मामकोपयित्वा को वा गृहे वासयेदिति वदन्तमकालापेक्षितविविधान्नपानरसम् अतिकोपनं दुराराध्यतरं दुर्वाससं गृहमानीय अपेक्षितपायसाद्यन्नकल्पनेन संतर्प्य तदाज्ञया रुक्मिण्या सह तदुच्छिष्टोपलिप्तसर्वाङ्गोऽभवम्; तदनु 'मुनिः पायसादिग्धाङ्गीं रथे तूर्णमयोजयत् । तमारुह्य रथं चैव निर्ययौ च गृहान्मम । प्रतोदेनातुदद्बालां रुक्मिणीं मम पश्यतः ॥ न च मे

स्तोकमप्यासीद्दुःखमीर्ष्याकृतं तदा'। एवं ब्राह्मणकृतपरिभवमङ्गीकृत्य सह व्रजन्तं मां रथधुर्यभूतां प्रतोदेनासकृत्तुद्यमानामबलां मत्प्रियां रथस्थं तपस्विनं ब्राह्मणं चावलोक्य 'ब्राह्मणा एव जायेरन्नान्यो वर्णः कथंचन। को ह्येनं रथमास्थाप्य जीवेदन्यः पुमानिह। आशीविषविषं तीक्ष्णं ततस्तीक्ष्णतरो द्विजः। ब्रह्माशीविषदिग्धस्य नास्ति कश्चिच्चिकित्सकः' इति पौरजानपदाः परस्परमकथयन्। 'ततः परमसंक्रुद्धो रथादास्कन्द्य स द्विजः। पदातिरपथेनैव प्राधावद्दक्षिणामुखः॥ एवमनल्पकल्पानलकल्पकोपः अकारणादेव रथादवप्लुत्य धावन् प्रणिपातपुरःसरमभ्यर्थितो महर्षिः सर्वलोकोत्कृष्टत्वसकलजनमान्यत्वसर्वशत्रुजनाजेयतादिवरप्रदानपूर्वकं स्वोच्छिष्टानुपलिप्तपादतलस्थमृत्युं मामकथयत्। एवमननुकरणीयचरिता द्विजाः। 'एते हि सोमं राजान ईश्वराः सुखदुःखयोः। लोकलोकेश्वराश्चैव सर्वब्राह्मणपूर्वकाः। भस्म कुर्युर्जगदिदं क्रुद्धाः प्रत्यक्षदर्शिनः। अन्यानपि सृजेयुस्ते लोकाँल्लोकेश्वरांस्तथा॥ कथं तेषु न वर्तेरन्सम्यग्जनाः

सुतेजसः' इति । एतेन दुर्वाससो माहात्म्यपूर्वकं ब्राह्मण-सामान्यमाहात्म्यं कृष्णेन प्रतिपादितम् । वनपर्वणि— हैहयानां कुलकरो राजकुमारो मृगयामटन्कृष्णाजिनोत्त-रासङ्गं मुनिपुत्रमविदूरे दृष्ट्वा मृगबुद्ध्या शरेणाविध्यावगत-मुनिपुत्रभावः स्वभवनमागम्य हैहयान्स्वकृत्यमकथयत् । तद्वचनश्रवणसंजातखेदकलुषितस्वान्ता हैहयाः 'कस्यायं मुनिकुमारकः' इति इतस्ततो मार्गमाणास्ताक्ष्यर्श्रममासाद्य, आसनपाद्यार्घ्यादिभिरप्यभिपूजयितुमुद्युक्तं मुनि-मवलोक्य ब्राह्मणहिंसका वयं न त्वया पूजितुमर्हा इत्य-वदन् । तदनु स्वतपोमहिम्ना समुज्जीविततनयो महर्षिः कासौ युष्माभिर्घातितो मुनिकुमारकः गवेष्यतामित्या-दिदेश । तदाज्ञया तं मुनिकुमारकं गवेषयमाणैस्तमदृष्ट्वा सव्रीलैः नासाद्यते मुनिकुमारक इत्यभिहितो मुनिः म-दीय एव पुत्रः घातितो युष्माभिः संजीवितश्च मयेत्य-वदत् । ततो विस्मयाविष्टहृदयैः केनोपायेन संजीवितो-ऽयं बालक इत्यभिहितो मुनिः 'सत्यमेवाभिजानीत नाऽनृते कुर्महे मनः । स्वधर्ममनुतिष्ठामः तस्मान्मृत्युभयं न

नः। अतिथीनन्नपानेन भृत्यानप्यशनेन च॥ संभोज्य शेषमश्नीमस्तस्मान्मृत्युभयं न नः। एतेन स्वधर्मनिरतानां ब्राह्मणानां मृत्युभयमपि नास्तीत्युक्तं भवति। आनुशासनिके युधिष्ठिरः— 'के पूज्याः के नमस्कार्याः कथं वर्तेत केषु च। किमाचारः कीदृशेषु पितामह न रिष्यते॥ भीष्म उवाच— ब्राह्मणानां परिभवः सादयेदपि देवताः। ब्राह्मणांस्तु नमस्कृत्य युधिष्ठिर न रिष्यते॥ ते पूज्यास्ते नमस्कार्या वर्तेथास्तेषु पुत्रवत्॥ ते हि लोकानिमान्सर्वांस्तारयन्ति मनीषिणः। ब्राह्मणाः सर्वलोकानां महान्तो धर्मसेतवः॥ धनत्यागाभिरामाश्च वाक्संयमरताश्च ये। रमणीयाश्च भूतानां निधानं च धृतव्रताः॥ प्रणेतारश्च लोकानां शास्त्राणां च यशस्विनः। तपो येषां धनं नित्यं वाक्चैव विपुलं बलम्॥ प्रभवश्चैव धर्माणां धर्मज्ञाः सूक्ष्मदर्शिनः। धर्मकामाः स्थिता धर्मे सुकृतैर्धर्मसेतवः॥ यान्समाश्रित्य जीवन्ति प्रजाः सर्वाश्चतुर्विधाः। पन्थानः सर्वनेतारो यज्ञवाहाः सनातनाः। पितृपैतामहीं गुर्वीमुद्वहन्ति धुरं सदा॥ धुरि ये नावसीदन्ति विषमे सदृवा

इव । पितृदेवातिथिमुखा हव्यकव्याग्रभोजिनः ॥ भोजनादेव लोकांस्त्रींस्त्रायन्ते महतो भयात् । दीपाः सर्वस्य लोकस्य चक्षुश्चक्षुष्मतामपि ॥ सर्वशिल्पादिनिधयो निपुणाः सूक्ष्मदर्शिनः । गतिज्ञाः सर्वभूतानामध्यात्मगतिचिन्तकाः ॥ आदिमध्यावसानानां ज्ञातारश्छिन्नसंशयाः । परावरविशेषज्ञा गन्तारः परमां गतिम् ॥ विमुक्ता धूतपाप्मानो निर्द्वन्द्वा निष्परिग्रहाः । मानार्हा मानिता नित्यं ज्ञानवद्भिर्महात्मभिः ॥ चन्दने मलपङ्के च भोजनेऽभोजने समाः । समं येषां दुकूलं च तथा क्षौमाजिनानि च ॥ तिष्ठेयुरप्यभुञ्जाना बहूनि दिवसान्यपि । शोषयेयुश्च गात्राणि स्वाध्यायैः संयतेन्द्रियाः ॥ अदैवं दैवतं कुर्युर्दैवतं वाप्यदैवतम् । लोकानन्यान्सृजेयुस्ते लोकपालांश्च कोपिताः ॥ अपेयः सागरो येषामासीच्छापान्महात्मनाम् । येषां कोपाग्निरद्यापि दण्डकेनोपशाम्यति ॥ देवानामपि ये देवाः कारणं कारणस्य च । प्रमाणस्य प्रमाणं च कस्तानभिभवेद्बुधः ॥ येषां वृद्धश्च बालश्च सर्वः संमानमर्हति । तपो विद्याविशेषात्तु मानयन्ति परस्परम् ॥ अविद्वान्ब्राह्मणो

देवः पात्रं वै पावनं महत् ॥ विद्वान्भूयस्तरां देवः पूर्णसागरसंनिभः । अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् । प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् । श्मशाने ह्यग्निस्तेजस्वी पावको नैव दुष्यति ॥ हविर्यज्ञे च विधिवद्धुत एवाभिशोभते । एवं यद्यप्यनिष्टेषु वर्तते सर्वकामसु ॥ सर्वथा ब्राह्मणो मान्यो दैवतं विद्धि तत्परम्' इति । आनुशासनिके पर्वणि युधिष्ठिरः— 'के पूज्याः के नमस्कार्याः कान्नमस्यसि भारत । एतन्मे सर्वमाचक्ष्व येभ्यः स्पृहयसे नृप ॥ उत्तमापद्गतस्यापि यत्र ते वर्तते मनः । मनुष्यलोके सर्वस्मिन्यदमुत्रेह चाप्युत ॥ भीष्म उवाच— स्पृहयामि द्विजातिभ्यो येषां ब्रह्म परं धनम् । येषां स्वप्रत्ययः स्वर्गस्तपः स्वाध्यायसाधनम् । येषां बालाश्च वृद्धाश्च पितृपैतामहीं धुरम् । उद्वहन्ति न सीदन्ति तेभ्यो वै स्पृहयाम्यहम् । विद्यास्वभिविनीतानां दान्तानां मृदुभाषिणाम् ॥ श्रुतवृत्तोपपन्नानां सर्ववेदविदां सताम् । संसत्सु वदतां तात हंसानामिव संघशः ॥ मङ्गल्यरूपा रुचिरा दिव्या जीमूतनिस्वनाः । सम्यगुच्चारिता वाचः श्रूय-

न्ते हि युधिष्ठिर ॥ शुश्रूषमाणे नृपतौ प्रेत्य चेह सुखावहाः । ये चापि तेषां श्रोतारः सदा सदसि संमताः । विज्ञानगुणसंपन्नास्तेभ्यश्च स्पृहयाम्यहम् ॥ सुसंस्कृतानि प्रयताः शुचीनि गुणवन्ति च । ददत्यन्नानि तृप्त्यर्थं ब्राह्मणेभ्यो युधिष्ठिर ॥ ये चापि सततं राजंस्तेभ्यश्च स्पृहयाम्यहम् । शक्यं ह्येवाहवे योद्धुं न दातुमनसूयितुम् ॥ शूरा वीराश्च शतशः सन्ति लोके युधिष्ठिर । तेषां संख्यायमानानां दानशूरो विशिष्यते ॥ धन्यः स्यां यद्यहं भूयः सौम्य ब्राह्मणकोऽपि वा । कुले जातो धर्मगतिस्तपोविद्यापरायणः ॥ न मे त्वत्तः प्रियतरो लोकेऽस्मिन्पाण्डुनन्दन । त्वत्तश्चापि प्रियतरा ब्राह्मणा भरतर्षभ ॥ यथा मम प्रियतमास्त्वत्तो विप्राः कुरूत्तम । तेन सत्येन गच्छेयं लोकान्यत्र स शंतनुः ॥ न मे पिता प्रियतरो ब्राह्मणेभ्यस्तथा भवेत् । न मे पितुः पिता वापि ये चान्येऽपि सुहृज्जनाः ॥ न हि मे वृजिनं किंचिद्विद्यते ब्राह्मणेष्विह । अणु वा यदि वा स्थूलं विद्यते साधु कर्मसु ॥ कर्मणा मनसा वापि वाचा वापि परंतप । यन्मे कृतं ब्राह्मणेभ्य-

स्तेनाद्य न तपाम्यहम् ॥ ब्रह्मण्य इति मामाहुस्तया वाचा-स्मि तोषितः । एतदेव पवित्रेभ्यः सर्वेभ्यः परमं स्मृतम् ॥ पश्यामि लोकानमलाञ्शुचीन्ब्राह्मणयायिनः । तेषु मे तात गन्तव्यमह्नाय च चिराय च ॥ यथा भर्त्राश्रियो धर्मः स्त्रीणां लोके युधिष्ठिर । स देवः सा गतिर्नान्या क्षत्रि-यस्य तथा द्विजाः ॥ क्षत्रियः शतवर्षी च दशवर्षी द्विजो-त्तमः । पितापुत्रौ च विज्ञेयौ तयोर्हि ब्राह्मणो गुरुः ॥ नारी तु पत्यभावे वै देवरं कुरुते पतिम् । पृथिवी ब्राह्म-णालाभे क्षत्रियं कुरुते पतिम् । पुत्रवच्च ततो रक्ष्या उपास्या गुरुवच्च ते । अग्निवच्चोपचर्या वै ब्राह्मणाः कुरुसत्तम ॥ ऋजून्सतः सत्यशीलान्सर्वभूतहिते रतान् । आशीविषा-निव क्रुद्धान्द्विजान्परिचरेत्सदा ॥ तेजसस्तपसश्चैव नित्यं बिभ्ये युधिष्ठिर । उभे चैते परित्याज्ये तेजश्चैव तपस्तथा ॥ व्यवसायस्तयोः शीघ्रमुभयोरेव विद्यते । हन्युः क्रुद्धा महाराज ब्राह्मणा ये तपस्विनः ॥ भूयः स्यादुभयं दत्तं ब्राह्मणाद्यदकोपनात् । कुर्यादुभयतः शेषं दत्तशेषं न शेषयेत् ॥ दण्डपाणिर्यथा गोषु पालो नित्यं हि रक्षयेत् ।

ब्राह्मणान्ब्रह्म च तथा क्षत्रियः परिपालयेत् ॥ पितेव पुत्रान्रक्षेथा ब्राह्मणान्धर्मचेतसः । गृहे चैषामवेक्षेथाः किंस्विदस्तीति जीवनम्' इति दानधर्मे भीष्मनिश्चयः ॥

तदेतत्प्रसमीक्ष्याहं प्रसन्नेन्द्रियमानसः ।
तपो महत्समास्थास्ये यद्वै ब्रह्मत्वकारकम् ॥

इति षट्पञ्चाशः सर्गः । ननु कामक्रोधादिकलुषितान्तःकरणस्य ब्रह्मस्वापहरणप्रवृत्तस्य गोब्राह्मणद्रोहिणः विश्वामित्रस्य क्षत्रियस्य चित्तशुद्धिः तत्पूर्वकं ब्रह्मत्वकारकतपश्चरणे प्रवृत्तिः तया च वक्ष्यमाणब्राह्मण्यावाप्तिश्चानुपपन्ना, ब्राह्मक्षेत्रे उत्पन्नेन मतङ्गेन चित्तशुद्धिपूर्वकं केवलतपश्चर्यायां बहुशः कृतायामपि ब्राह्मण्यानाप्तेः । तथा हि भारते आनुशासनिके मतङ्गो नाम तपस्वितनयः स्वपितृसमारब्धयज्ञोपकरणसंपादनाय रथमारुह्य गच्छन्द्रुततरगमनविधुरं गर्दभीतनयं प्रतोदतोदनेन संजातव्रणमकरोत् । सा च तद्व्रणसंजातदुःखजातमसहमानं निजतनयमवलोक्य 'उवाच मा शुचः पुत्र चण्डालस्त्वधितिष्ठति। ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण

उच्यते। स्वयोनिं मानयत्येष भावो भावं नियच्छति' इति। तद्वाक्यश्रवणसंजातखेदाविष्टहृदयेन तूर्णं रथादवतीर्णेन मतङ्गेन 'ब्रूहि रासभि कल्याणि माता मे येन दूषिता' इति पृष्टा रासभी 'ब्राह्मण्यां वृषलेन त्वं मत्तायां नापितेन ह। जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनशत्' इत्येवमवादीत्। तद्वचनश्रवणसमनन्तरमेव संजातसंभ्रमं दुरवापब्राह्मण्यसंपादने कृतनिश्चयमुग्रे तपसि वर्तमानं मघवानेवमवादीत्— 'मतङ्ग दुर्लभमिदं विप्रत्वं प्रार्थ्यते त्वया। यस्मात्तु संवसन्योनीर्जायमानः पुनः पुनः॥ पर्याये तात कस्मिंश्चिद्ब्राह्मण्यमिह विन्दति। तिर्यग्योनिगतः सर्वो मानुष्यं यदि गच्छति॥ स जायते पुल्कसो वा चण्डालो वाप्यसंशयः। स तस्यामेव तु चिरं मतङ्ग परिवर्तते॥ ततो दशशते काले लभते शूद्रतामपि। शूद्रयोनावपि ततो बहुशः परिवर्तते॥ ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्तते॥ ततः षष्टिगुणे काले राजन्यो नाम जायते। राजन्यत्वे चिरं कालं तत्रैव परिवर्तते। ततः षष्टिगुणे काले

लभते ब्रह्मबन्धुताम् ॥ ब्रह्मबन्धुश्चिरं कालं ततस्तु परिवर्तते । ततस्तु द्विशते काले लभते काण्डपृष्ठताम् ॥ काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्तते । ततस्तु त्रिशते काले लभते जपतामपि ॥ तं च प्राप्य चिरं कालं तत्रैव परिवर्तते । ततश्चतुःशते काले श्रोत्रियो नाम जायते ॥ श्रोत्रियत्वे चिरं कालं तत्रैव परिवर्तते । तदैनं शोकहर्षौ तु कामद्वेषौ च पुत्रक ॥ अतिमानातिवादौ च प्रविशेते द्विजाधमम् । तांश्चेज्जयति शत्रून्स तदा प्राप्नोति सद्गतिम् ॥ अथ ते वैजयन्त्येनं तालाग्रादिव पात्यते । मतङ्ग संप्रधार्यैवं यदहं त्वामचूचुदम् ॥ वृणीष्व काममन्यं त्वं ब्राह्मण्यं हि सुदुर्लभम् । एवमुक्तो मतङ्गस्तु भृशं शोकपरायणः ॥ अध्यतिष्ठद्दृयां गत्वा सोऽकृष्टेन शतं समाः । सुदुर्वहं वहन्योगं कृशो धमनिसंततः ॥ त्वगस्थिभूतो धर्मात्मा स पपातेति नः श्रुतम् । तं पतन्तमभिद्रुत्य प्रतिजग्राह वासवः ॥ वराणामीश्वरो दाता सर्वभूतहिते रतः । शक्रः— मतङ्ग ब्राह्मणत्वं ते विरुद्धमिह दृश्यते ॥ ब्राह्मण्यं दुर्लभतरं संवृतं

परिपन्थिभिः । ब्राह्मणः सर्वभूतानां मतङ्ग पर उच्यते ॥ ब्राह्मणः कुरुते यद्धि यथा यद्यच्च वाञ्छति । बह्वीश्च संवसन्योनीर्जायमानः पुनः पुनः । पर्याये तात कस्मिंश्चिद्ब्राह्मण्यमिह विन्दति । तदुत्सृज्येह दुष्प्रापं ब्राह्मण्यमकृतात्मभिः ॥ अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः । चोदितस्तु महेन्द्रेण मतङ्गः प्राब्रवीदिदम् ॥ यथाकामविहारी स्यां कामरूपी विहंगमः । ब्रह्मक्षत्राविरोधेन पूजां च प्राप्नुयामहम् ॥ यथा ममाक्षया कीर्त्तिर्भवेच्चापि पुरंदर । कर्तुमर्हसि तद्देव शिरसा त्वां प्रसादये ॥ शक्रः— छन्दोदेव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि । कीर्त्तिश्च तेऽतुला वत्स त्रिषु लोकेषु यास्यति ॥ एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत । प्राणांस्त्यक्त्वा मतङ्गोऽपि संप्राप्तः स्थानमुत्तमम् ॥ एवमेतत्परं स्थानं ब्राह्मण्यं नाम भारत । तच्च दुष्प्रापमिह वै महेन्द्रवचनं यथा' । एवं ब्राह्मण्यस्य दुरवापतया तदुद्देशेन जातिक्षत्रियस्य वसिष्ठद्रोहिणो विश्वामित्रस्य कथं चित्तशुद्ध्यादिना वक्ष्यमाणब्राह्मण्यप्राप्तिरिति चेन्न ; ब्राह्मणप्रसादादेव ।

तथा हि आनुशासनिके पर्वाणि— कुशिककुले आगामिनं वर्णसंकरदोषं विनिश्चित्य तन्निरसनाय निरपराधिनमपि कुशिकमपराधेन संयोज्य तदीयं कुलं निःशेषयितुकामश्च्यवनमुनिः समासादितकुशिकभवनः अभ्युत्थानासनार्घ्यपाद्यादिभिरभ्यर्चितः 'यदि राज्यं यदि धनं यदि गाः संशितव्रत । यज्ञदानानि च तथा ब्रूहि सर्वं ददामि ते' इति राज्ञानुनाथितः 'न राज्यं कामये राजन्न धनं न च योषितः । परिचर्योऽस्मि यत्ताभ्यां युवाभ्याम् विशङ्कया' इति समाज्ञप्तवान् । स राजापि तद्वचनश्रवणसंजातसंतोषः सभार्यः सादरं परिचरन्निद्रामुद्रितलोचनं तमृषिमवलोक्य सुखसंस्पर्शसोपधानपर्यङ्कास्तरणाद्युपेतशयनं गृहं प्रवेश्य 'इयं शय्या भगवतो यथा काममिहोष्यताम्' इति संप्रार्थितो भार्गवः अप्रबोधनेन पादसंवाहनपरिशीलनाभ्यां युवाभ्यामाप्रबोधं भवितव्यमित्यादिश्यैकेनैव पार्श्वेनैकविंशतिं दिनानि सुखं सुप्तः अकस्मादुत्थायान्तर्हितोऽभूत् । ततस्तदन्तर्धानजनितवेदनाकलुषितस्वान्तस्तेन विना सकलमपि जीवलोकं निरालोकं

मन्वानः कुशिकः स्वभवनमागत्य तथैव शयनगृहे सुखसुप्तं तमृषिमवलोक्यामन्दानन्दहृदयोऽभूत् । सोऽपि महर्षिः पुनरपि तावन्तमनेहसं पार्श्वान्तरेण तथैव सुखसुप्तस्तेन च राज्ञा सभार्येण कृतपादसंवाहनः सहसैवोत्थाय कुशिकेन कृततैलाभ्यङ्गस्नानस्तदानीतं भक्ष्यभोज्यलेह्यचोष्याभ्यवहारजातमासनं शयनीयं च वस्त्रेणोपवेष्ट्यादीपयामास । तदवलोक्य, 'न च तौ चक्रतुः क्रोधं दंपती सुमहामती । तयोः संप्रेक्षतोरेव पुनरन्तर्हितोऽभवत्' । अथ तेन महर्षिणा पुरसंदर्शनाय सज्जीकृतसांग्रामिकरथेन सभार्यो मां वहस्वेत्याज्ञप्तो नरपतिः तत्कृतप्रतोदतोदनाजनितवेदनामविगणय्य मुनिकृतसर्वस्वदानमप्यनाकलय्य निर्विकारं सादरः परिचरन्ननुग्रहबुद्ध्या सुखसंस्पर्शपरमर्षिपाणितलपरिमर्शनेन निरस्तसमस्तश्रमः 'गम्यतां पुरं विश्रान्तः श्वो मां द्रष्टासि' इति परमर्षिणा समादिष्टः स्वपुरमाजगाम । भार्गवोऽपि कंचित्कालं रमणीये गङ्गातीरे नियममाचरन्स्वसंदर्शनजनितकौतूहलेन स्वसमीपमागताय सभार्याय कुशिकनृपतये चम्पकाशोकपुन्नागवकुलादिनानाविधवृक्ष-

वीरुत्परिवृतं मणिस्तम्भोपेतकाञ्चनमयप्रासादमध्यमध्यासीनं समनन्तरमेव विविक्ते कौशयां बृस्यां समासीनमात्मानं दर्शयामास । स च राजा विस्मयोत्फुल्लहृदयः 'अहो प्रभावो ब्रह्मर्षेश्च्यवनस्य महात्मनः । इच्छयैष तपोवीर्यादन्यांल्लोकान्सृजेदपि ॥ ब्राह्मणा एव जायेरन्पुण्यवाग्बुद्धिकर्मिणः । ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः' इति मनसि चिन्तयन्नेव सभार्यस्तं प्रणम्य तेन च प्रसन्नेन परमर्षिणा वरैश्छन्द्यमानः 'एष एव वरो मुख्यः प्राप्तो मे भृगुनन्दन । यत्प्रीतोऽस्मि मया ब्रह्मन्कुलं त्रातं च मेऽनघ ॥ अग्निमध्यगतेनैव भगवन्संनिधौ मया । वर्तितं भृगुशार्दूल यन्न दग्धोऽस्मि तद्वहु' इत्युक्तवान् । पुनरपि वरैश्छन्द्यमानेन राज्ञानुनाथितब्राह्मण्यो भार्गवः 'एवमेतद्यथात्थ त्वं ब्राह्मण्यं तात दुर्लभम् । ब्राह्मण्ये सति चर्षित्वमृषित्वे च तपस्विता ॥ भविष्यत्येष ते कामः कुशिकात्कौशिको द्विजः । तृतीयं पुरुषं तुभ्यं ब्राह्मणत्वं गमिष्यति ॥ वंशस्ते पार्थिवश्रेष्ठ भृगूणामेव तेजसा । पौत्रस्ते भविता विप्र तपस्वी पाव-

कथुतिः' इत्यभिहितवान् । वनपर्वणि तीर्थयात्रायाम्, 'कान्यकुब्जे महानासीत्पार्थिवः सुमहाबलः । गाधीति विश्रुतो लोके वनवासं जगाम ह ॥ वने तु तस्य वसतः कन्या जज्ञेऽप्सरःसमा । ऋचीको भार्गवस्तां च वरयामास भारत ॥ गाधिना स्वकुलधर्मेणैकतः श्यामकर्णानां हयानां शुल्कं याचित ऋचीको वरुणसंप्रार्थनालब्धाश्वः कन्यां वरयामास । 'गङ्गायां कान्यकुब्जे वै ददौ सत्यवतीं तदा ॥ धर्मेण लब्धां तां भार्यामृचीको द्विजसत्तमः । यथाकामं यथाजोषं तया रेमे सुमध्यया । तं विवाहे कृते राजन्सभार्यमवलोकतः । आजगाम भृगुः श्रेष्ठं पुत्रं दृष्ट्वा ननन्द ह ॥ ततः स्नुषां स भगवान्प्रहृष्टो भृगुरब्रवीत् । वरं वृणीष्व सुभगे दाता ह्यस्मि तवेप्सितम् ॥ सा वै प्रसादयामास तं गुरुं पुत्रकारणात् । आत्मनश्चैव मातुश्च प्रसादं च चकार सः ॥ भृगुः— 'ऋतौ त्वं चैव माता च स्नाते पुंसवनाय वै । आलिङ्गेथां पृथग्वृक्षौ साश्वत्थं त्वमुदुम्बरम् ॥ चरुद्वयमिदं भद्रे जनन्याश्च तवैव च । विश्वमावर्तयित्वा तु मया

यत्नेन साधितम् ॥ प्राशितव्यं प्रयत्नेन चेत्युक्त्वादर्शनं गतः । आलिङ्गने चरौ चैव चक्रतुस्ते विपर्ययम् ॥ ततः पुनः स भगवान्काले बहुतिथे गते । दिव्यज्ञानाद्विदित्वा तु भगवानागतः पुनः ॥ अथोवाच महातेजा भृगुः सत्यवतीं स्नुषाम् । उपयुक्तश्चरुर्भद्रे वृक्षे चालिङ्गनं कृतम् ॥ विपरीतेन ते सुभ्रु मात्रा चैवासि वञ्चिता । ब्राह्मणः क्षत्रवृत्तिर्वै तव पुत्रो भविष्यति ॥ क्षत्रियो ब्राह्मणाचारो मातुस्तव सुतो महान् । भविष्यति महाबीर्यः साधूनां मार्गमास्थितः' इति । ननु—

ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ।
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥

इति चतुर्मुखमुखोदीरितवचनपर्यालोचनया तपसैव ब्राह्मण्यावाप्तिदर्शनात् केवलतपसा ब्राह्मण्यप्राप्तिर्नास्तीति कथमुक्तमिति चेन्न । तथा सति 'तृतीयं पुरुषं तुभ्यं ब्राह्मणत्वं गमिष्यति' इति च्यवनकृतकुशिकवरप्रदानस्य भृग्वाज्ञप्तचरुभक्षणवृक्षालिङ्गनव्यत्यासस्य ब्रह्मकृतवरप्रदा-

नवसिष्ठवचनयोरपि वैय्यर्थ्यापत्तेः 'विश्वामित्रं त्वजनयद्गाधेर्भार्या यशस्विनी। ऋषेः प्रसादाद्राजेन्द्र ब्रह्मर्षेर्ब्रह्मवादिनः। ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः' इत्यानुशासनिके पर्वणि ऋचीकवचनादेव ब्राह्मण्यावाप्तिप्रतिपादनविरोधाच्च, मतङ्गेन केवलतपश्चर्यायां कृतायामपि ब्राह्मणानुग्रहाभावात् ब्राह्मण्यानवाप्तेश्च, तपश्चर्याभावेऽपि ब्राह्मणोत्तमभृगुवचनमात्रेणैव जात्या क्षत्रियस्य वीतहव्यस्य ब्राह्मण्यावाप्तिदर्शनाच्च। तथा चानुशासनिके—वीतहव्यपराभूतो दिवोदासः भरद्वाजमुन्यनुसंप्राप्तस्तदनुग्रहावाप्तप्रतर्दनाख्यजैत्रतनयस्तेन वीतहव्यं पराभाव्य भृग्वाश्रमशरणमकरोत्। तत्रापि वीतहव्यनिवासमसहमानः प्रतर्दनः भृगुनिकटमागम्य अस्मत्कुलोत्सादको वीतहव्यो विसर्ज्यतामिति प्रार्थितवान्। महर्षिरपि शरणागतविचक्षणः 'नेहास्ति क्षत्रियः कश्चित् सर्वे हीमे द्विजातयः' इत्यभिहितवान्। महर्षिणा भृगुणा परित्याजितक्षत्रभावं वीतहव्यमवगम्य प्रतिनिवृत्ते प्रतर्दने वीतहव्योऽपि करुणोदीरितमहर्षिवचनसमनन्तरमेव दुरवापं ब्रा-

ह्मण्यमवापेत्युक्तम् । तस्मात्केवलतपसा ब्राह्मण्यं दुर्लभतरम् । न चैवम् 'ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक' इति पूर्वोक्तवचनविरोधः, तस्य वचनस्य ब्रह्मस्वापहरणमहाब्राह्मणवसिष्ठद्रोहादिजनितप्रत्यवायपरिहारपूर्वकं देवताप्रसादं संपाद्य तत्प्रार्थितब्राह्मणवचनसंपादनेनैव ब्राह्मण्यावाप्तिरित्येवं तपसः परम्परासाधनत्वप्रतिपादकत्वान्न विरोधः कर्मणां चित्तशुद्धिद्वारा आत्मज्ञानसंपादनेनैव मोक्षोपयोगित्ववत् । न चैतत्सर्वं तदा शोभते, यदि कर्मणां चित्तशुद्धिद्वारा हेतुत्वं स्यात् । तदेवासिद्धम्, साक्षादेव हेतुत्वसंभवात् । तथा हि श्रुतिः– 'अपाम सोममभूता अभूम' 'तदाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयन्तीति न तथा विद्यात् यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान् एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति प्रियां वाचमभिवदन्त्योऽर्पयन्त्यः एष वः पुण्यः सुकृतो ब्रह्मलोकः' इति । 'ततो मया नचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्' 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' 'उद्यन्त-

मस्तँ यन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावदित्यो ब्रह्मेति ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः। वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः । तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥ योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः । स ब्रह्म परमाप्नोति वायुभूतः खमाप्लुतः ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः । यथोक्तचारिणः सर्वे गच्छन्ति परमां गतिम् ॥ एको वाप्याश्रमानेतान्योऽनुतिष्ठेद्यथाविधि । अकामद्वेषसंयुक्तः स परत्र महीयते ॥ चतुष्पदीह निश्रेणिर्ब्रह्मण्येषा प्रतिष्ठिता । एतामारुह्य निश्रेणिं ब्रह्मलोके महीयते ॥ संध्यामुपासते ये तु सततं संशितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्' । 'अग्निहोत्रादिति तु तत्कार्यायैव तद्दर्शनात्' इति श्रुतिस्मृतिसूत्रैः कर्मणां मोक्षहेतुत्वावगमात् । न च, 'ब्रह्मविदाप्नोति परम्' 'तरति शोकमात्मवित्' 'ब्रह्म वेद ब्रह्मैव भवति' 'तमेव विदित्वातिमृत्यु-

मेति' 'तमेवं विद्वानमृत इह भवति' 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' 'स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति' 'तदिदमप्येतर्हि य एवं वेद अहं ब्रह्मास्मीति स इदं सर्वं भवति' 'आचार्यवान्पुरुषो वेद' 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये इति' 'इहैव सन्तोऽथ विद्मस्तद्वयम्' 'न चेदवेदीर्महती विनष्टिः य एतद्विदुरमृतास्ते भवन्ति' 'ब्रह्मसंस्थोऽमृतत्वमेति'। 'स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च । वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । यदा पश्यति भूतात्मा ब्रह्म संपद्यते तदा ॥ यावानात्मनि वेदात्मा तावानात्मा परात्मनि । य एवं सततं वेद सोऽमृतत्वाय कल्पते' 'पुरुषार्थोऽतः शब्दादिति बादरायणः' इति श्रुतिस्मृतिसूत्राणां ज्ञानस्य मोक्षहेतुत्वप्रतिपादकानां का गतिरिति वाच्यम् । तेषां वचनानां मोक्षहेतुकर्मापेक्षितकर्तात्मज्ञानपरत्वात् । तथा हि, 'शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः' इति सूत्रेण कर्मशेषभूते कर्तृद्वारा आत्मज्ञानकर्मोपाययो-

गियागसाधनीभूतव्रीहिद्वारा प्रोक्षणादिवत् ज्ञानफलश्रवणमपि अपापश्लोकश्रवणवदर्थवाद इति प्रतिपाद्य 'आचारदर्शनात्' इति सूत्रेण 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेज इति यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि' इत्येवमादिभिर्ब्रह्मविदामपि कर्मसंबन्धावगमात्, 'उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच' इति ब्रह्मविदोऽप्युद्दालकस्य पुत्रानुशासनदर्शनात्, ज्ञानादेव फलसिद्धौ 'अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन दुःखात्मके कर्मणि प्रवृत्तिर्न स्यात्, अतो न स्वतन्त्रा विद्येति प्रतिपाद्य, तच्छ्रुतेः 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति विद्यायाः कर्मशेषत्वश्रवणादिति प्रतिपाद्य 'समन्वारम्भणात्' 'तं विद्याकर्मिणी समन्वारभेते' इति विद्यायाः कर्मफलारम्भे उपयोगदर्शनात् इति प्रतिपाद्य, 'तद्वतो विधानात्' आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि प्रतिष्ठाप्य अहिंसन्सर्वभूतान्यन्यत्र

तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते 'न च पुनरावर्तते न च पुनरावर्तते' इति श्रुत्वा समस्तवेदार्थज्ञानवतः कर्मण्यधिकारदर्शनात्, 'नियमाच्च' 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति. न कर्म लिप्यते नरे' इति। 'एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येतस्मान्मुच्यते मृत्युना वा' इत्येवंजातीयकात् आमरणमग्निहोत्रादीनामनुष्ठाननियमनादपि, कर्मशेषत्वमेव विद्याया इति चेन्न। 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' 'यः सर्वज्ञः सर्ववित्' 'यस्य ज्ञानमयं तपः' 'भीषास्माद्वातः पवते' 'महद्भयं वज्रमुद्यतम्' 'एतस्य वा अक्षरस्य प्रशासने गार्गि' 'तदैक्षत बहु स्यां प्रजायेय' 'तत्तेजोऽसृजत' इत्यादिश्रुतिभिः कर्तृत्वभोक्तृत्वशारीरत्वादिविरुद्धाकर्तृत्वाभोक्तृत्वापहतपाप्मत्वादिविशिष्टस्याधिकस्योपदेशात् तद्विज्ञानस्य तद्विरुद्धस्य कर्मशेषत्वासंभवात्। 'तुल्यं तु दर्शनम्' यदुक्तम् आचारदर्शनात्कर्मशेषो विद्या इति अत्रोच्यते— तुल्यमाचारदर्शनमकर्मशेषत्वेऽपि विद्यायाः, तथा हि— 'एतद्ध स्म वै

तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे एतावदरे खल्वमृतत्वम् इति चोक्त्वा याज्ञवल्क्यः प्रवव्राज' इत्यादिश्रुतिभिः याज्ञवल्क्यादीनामकर्मनिष्ठत्वप्रतिपादनात्। 'यक्ष्यमाणो वै भगवन्तोऽहमस्मि' इत्येतल्लिङ्गदर्शनस्य वैश्वानरविद्याविषयत्वात्प्रकरणाभावाच्च। यदुक्तम् 'यदेव विद्यया करोति' इति श्रुतिबलाद्विद्यायाः कर्माङ्गत्वमिति, तन्न संभवति। उद्गीथविद्यायाः प्रकृतित्वेन तस्याश्च श्रुतेः प्रकृतोद्गीथविद्यासंबन्धप्रतिपादकत्वेन सर्वविद्याविषयत्वात्। यदुक्तम् 'तं विद्याकर्मणी समन्वारभेते' इति, तत्रोच्यते—'विभागः शतवत्' 'विद्यान्यं समारभते' 'कर्मान्यं समारभते' इति विभागेनोपपत्तेः। यदुक्तम् 'तद्वतोविधानात्' इति तत्रोच्यते— अध्ययनमात्रवतः 'आचार्यकुलाद्वेदमधीत्य' इत्यस्य कर्मोपयुक्तज्ञानपरत्वेन औपनिषदात्मज्ञानपरत्वाभावात्; यदुक्तं यावज्जीवं विदुषः कर्मनियमः इति तदपि न, अविशेषात् 'कुर्वन्नेवेह कर्माणि' इत्यस्याः श्रुतेः अविद्वद्विषयत्वेनोपपत्तौ विद्वद्विषयत्वाभावात्। 'स्तुतये-

ऽनुमतिर्वा' भवतु वा विद्वद्विषयं प्रकरणात्, तथापि विद्यास्तुत्यर्थत्वोपपत्तेः । तस्माद्विद्यायाः कर्मशेषत्वं नोपपद्यते इति स्वातन्त्र्येणैव हेतुत्वम् । तथा च पारमर्षं सूत्रम् 'पुरुषार्थोऽतः शब्दादिति बादरायणः' इति । नन्वेवमुभयोरपि समुच्चित्यैव हेतुत्वमस्तु । तथा हि 'एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यम्, तस्मान्न प्रमाद्येत्' 'सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्' 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' 'उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥ तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामते' 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति श्रुतिस्मृतिसूत्रैः ज्ञानकर्मणोरुभयोरपि मोक्षहेतुत्वावगमात् इति चेन्न । ज्ञानकर्मणोः समुच्चितस्य मोक्षं प्रति साधनत्वं न संभवति, परस्परविरोधात् । कर्मणां हेतुत्वस्य श्रुतिनिषिद्धत्वाच्च, भिन्नमार्गत्वाच्च भिन्नफलत्वाच्च । तथा हि— 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । अविद्यायामन्तरे

वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः। दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनेव नीयमाना यथान्धाः॥ न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे॥ प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म॥ एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति। अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः। यत्कर्मणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते॥ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः॥ नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति। परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन॥ अमृतस्य तु नाशास्ति वित्तेन' इति। वित्तसाध्येन कर्मणा इत्यर्थः। 'अथ त्रयो वा व लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा, कर्मणा पितृलोकः' इति पितृलोकपर्यवसानाच्च। 'अथ य आत्मा स सेतुर्विधृति-

रेषां लोकानामसंभेदाय नैनं सेतुमहोरात्रे तरतः । न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः' इति ब्रह्मलोकप्राप्तेः पूर्वं कर्मणां विनाशप्रतिपादनात् । 'स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते असङ्गो न हि सज्जते अशितो न व्यथते न रिष्यति एतमु हैं वै तेन तरतः इत्सतः पापमकरवम् इत्यतः कल्याणमकरवम्' इति 'उभौ ह्येवैष एते तरति नैनं कृताकृते तपतः तदेतदृचाभ्युक्तम्— एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् । तस्यैवात्मात्पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तपति सर्वं पाप्मानं तपति नैनं पाप्मा तरति सर्वं पाप्मानं तरति विपापो विरजो विचिकित्सो ब्राह्मणो भवति, एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः । तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम् ।

तद्यथा रथेन धावन् रथचक्रे पर्यवेक्षेत । एवमहोरात्रे पर्यवेक्षते । एवं सुकृतदुष्कृते सर्वाणि च द्वन्द्वानि । स एष विसुकृतो विदुष्कृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति । तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति । मार्गभेदविषये च्छान्दोग्ये— 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति । अर्चिषोऽहरन्ह आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षड्दङ्डेति मासान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति एष देवयानः पन्थाः' इति । तथा कौषीतकिब्राह्मणे— 'एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं ह तस्य वा एतस्य ब्रह्मलोकस्यारोहंदो मुहूर्तावेष्टिहा विरजा नदीस्यो वृक्षः सालज्यं संस्थानमपराजितमायतनमिन्द्रप्रजापती द्वारगोपौ विभुप्रमितं विचक्षणाः संध्यमितौजाः पर्यङ्कः प्रिया च मानसी प्रतिरूपा च चाक्षुषी पुष्पाण्या-

दायावयतौ वै च जगत्यम्बाश्चाम्बायवाश्चाप्सरसोऽम्बया नद्यस्तामित्थंविदागच्छति तं ब्रह्माहाभिधावत मम यशसा विरजां वायं नदीं प्रापन्न वायं जिगीष्यतीति तं पञ्चशतान्यप्सरसां प्रतिधावन्ति शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं कणाहस्तास्तं ब्रह्मालंकारेणालंकुर्वन्ति स ब्रह्मालंकारेणालंकृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति स आगच्छत्यारं हृदं तं मनसात्येति तमित्वा संप्रतिविदो मज्जन्ति स आगच्छति मुहूर्तान्येष्टिहांस्तेऽस्मादपद्रवन्ति स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतं तद्यथा रथेन धावयन्रथचक्रे पर्यवेक्षेत एवमहोरात्रे पर्यवेक्षेत एवं सुकृतदुष्कृते सर्वाणि च द्वन्द्वानि स एष विसुकृतो विदुष्कृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति स आगच्छतील्यं वृक्षं तं ब्रह्मगन्धः प्रविशति स आगच्छति सालज्यं संस्थानं तं ब्रह्मरसः प्रविशति स आगच्छत्यपराजितमायतनं तं ब्रह्मतेजः प्रविशति स आगच्छतीन्द्रप्रजापती द्वारगोपौ ताव-

स्मादपद्रवतः स आगच्छति विभुप्रमितं तं ब्रह्मयशः प्रविशति स आगच्छति विचक्षणामासन्दीं बृहद्रथन्तरे सामनी पूर्वौ पादौ श्यैतनौधसे चापरौ पादौ वैरूपवैराजे अनूच्ये शाक्वररैवते तिरश्ची सा प्रज्ञा प्रज्ञया हि विपश्यति स आगच्छत्यमितौजसं पर्यङ्कं स प्राणस्तस्य भूतं च भविष्यच्च पूर्वौ पादौ श्रीश्चेराचापरौ बृहद्रथन्तरे अनूच्ये भद्रयज्ञायज्ञीये शीर्षण्यमृचश्च सामानि च प्राचीनातानं यजूँषि तिरश्चीनानि सोमांशव उपस्तरणमुद्गीथ उपश्रीः श्रीरुपबर्हणं तस्मिन्ब्रह्मास्ते तमित्थंवित्पादेनैवाग्र आरोहति तं ब्रह्माह कोऽसीति तं प्रति ब्रूयादृतुरस्म्यार्तवोऽस्याकाशाद्योनेः संभूतो भार्यायै रेतः संवत्सरश्च तेजोभूतश्च भूतस्यात्मा भूतस्य त्वमात्मासि यस्त्वमसि सोऽहमस्मीति तमाह कोऽहमस्मीति सत्यमिति ब्रूयात्किं तद्यत्सत्यमिति यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत्सदथ यद्देवाश्च प्राणाश्च तद्यत्तदेतया वाचाभिव्याह्रियते सत्यमित्येतावदिदं सर्वमिदं सर्वमसीत्येवैनं तदाह तदेतच्छ्लोकेनाभ्युक्तम्— यजूदरः सामशिरा आसावृङ्मूर्तिरव्ययः । स ब्रह्मेति हि विज्ञेय

ऋषिब्रह्ममयो महानिति । तमाह केन पौंस्नानि नामान्याप्नोतीति प्राणेनेति ब्रूयात्केन स्त्रीनामानीति वाचेति केन नपुंसकनामानीति मनसेति केन गन्धानिति घ्राणेनेति ब्रूयात्केन रूपाणीति चक्षुषेति केन शब्दानिति श्रोत्रेणेति केनान्नरसानिति जिह्वयेति केन कर्माणीति हस्ताभ्यामिति केन सुखदुःखे इति शरीरेणेति केनानन्दं रतिं प्रजातीरित्युपस्थेनेति केनेत्या इति पादाभ्यामिति केन धियो विज्ञातव्यं कामानिति प्रज्ञयेति प्रब्रूयात्तमाहापो वै खलु मे ह्यसावयं ते लोक इति सा या ब्रह्मणि चितिर्या व्यष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद य एवं वेद' इति। छान्दोग्येऽपि 'ब्रह्मलोके तृतीयस्यामितो दिवि तदैरंमदीयं सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयम्। तद्य एवैतावरं च एयं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाँ सर्वेषु लोकेषु कामचारो भवति' इति। गीतायामपि 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो

जनाः' इति । भगवान्बादरायणोऽपि 'अर्चिरादिना तत्प्रथितेः' इति चतुर्थाध्यायतृतीयपादाद्यसूत्रेण विद्याप्रकरणभेदादिभिः प्रसक्तमार्गभेदे निराकरणपूर्वकं ब्रह्मप्राप्तिरर्चिरादिनैव 'ये चेमेऽरण्ये श्रद्धासत्यमुपासते' इत्युपसानान्तरशीलानां अर्चिरादिमार्गाविगमान्नानाविशेषणविशिष्ट एक एव अर्चिरादिमार्ग इति प्रतिपाद्य, 'वायुमब्दादविशेषविशेषाभ्याम्' इत्यनन्तरसूत्रेण 'स एतं देवयानं पन्थानमापाद्याग्निलोकमागच्छति स वायुलोकम्' इत्यविशेषेण श्रुतस्य वायोः 'स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति' इत्यादित्यात्पूर्वत्वदर्शनाद्विशेषात्, संवत्सरादित्ययोरन्तराले वायोर्निवेशः । तत्रापि 'मासेभ्यो देवलोकं देवलोकादादित्यम्' इति वाजसनेयके मासानन्तरं समाम्नातस्य देवलोकस्य मासंबन्ध्यब्दानन्तरं निवेशः देवलोकाच्च वायोर्निवेशः तत आदित्यस्य । सूत्रं तु च्छान्दोग्याभिप्रायमिति प्रतिपाद्य 'तटितोऽधिवरुणः संबन्धात्' इत्यनन्तरसूत्रेण 'चन्द्रमसो विद्युतम्' इति

श्रुताया विद्युत उपरिष्टात्स वरुणलोकमित्युपदिष्टो वरुणः संनिवेश्यः विद्युद्वर्षाधिपतित्वाद्वरुणस्य, तदनन्तरमवशिष्टेन्द्रप्रजापत्योर्निवेशः, 'अन्ते तु बादरायणः' इति न्यायादित्यवधार्य तदनन्तरेण 'आतिवाहिकास्तल्लिङ्गात्' इति सूत्रेण अर्चिरादिपर्वणां मार्गचिह्नत्वं भोगभूमित्वं वा इत्याशङ्क्य 'तत्पुरुषोऽमानवः' इति अर्चिरादिप्रापकमानवपुरुषव्यावर्तकामानवत्वविशेषणात् संपिण्डितकरणस्य लोकान्तरगमनं चेतनान्तराधीनमिति आतिवाहिकत्वमेव, अतः अर्चिरभिमानिनीं देवतां प्राप्य तया अहरभिमानिनीं तया च पूर्वपक्षाभिमानिनीमित्येवंप्रकारेण संवत्सरदेवलोकवायुलोकादित्यलोकचन्द्रविद्युल्लोकपर्यन्तं पूर्वपूर्वलोकाभिमानिन्या देवतया उत्तरोत्तरलोकाभिमानिदेवतां प्रापितः क्रमेण तडिल्लोकं प्राप्त इति प्रतिपाद्य, 'वैद्युतेन तु तच्छ्रुतेः' इत्यनन्तरसूत्रेण ब्रह्मलोकाद्विद्युल्लोकमागतेन अमानवपुरुषेण तडिदभिमानिदेवतासहितेन वरुणलोकं नीतः तद्वरुणसहितेनेन्द्रलोकम्, इन्द्रसहितेन प्रजापतिलोकं प्रजापतिसहितेन ब्रह्मलोक-

मित्येवंक्रमेण ब्रह्मलोकं प्राप्नोति इति प्रतिपाद्यं कार्यम् 'बादरिरस्य गत्युपपत्तेः' 'विशेषितत्वाच्च' इति सूत्राभ्यामकार्यव्यापकब्रह्मणो गन्तव्यत्वासंभवात् ब्रह्मलोकं गमयति, 'पराः परावतो वसन्ति' इति श्रुत्यन्तरे विशेषितत्वाच्च सगुणमेव ब्रह्म प्राप्यत इति प्रतिपाद्य 'संकल्पादेव तु तच्छ्रुतेः' इति सूत्रेण एवं कार्यब्रह्मलोकं गतस्य 'यं यं मतमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते' इति यत्ननिरपेक्षतया पित्राद्युत्पत्तिरिति प्रतिपाद्य, 'अत एव चानन्याधिपतिः' इति सूत्रेण अवन्ध्यसंकल्पादेवायमनन्याधिपतिरिति प्रतिपाद्य, 'अभावं बादरिराह ह्येवम्' इति सूत्रेण विदुषो देह एव नास्तीति च प्रतिपाद्य 'भावं जैमिनिर्विकल्पामननात्' इति सूत्रेण 'स एकधा भवति त्रिधा भवति' इत्यादिश्रुत्या प्रतिपाद्यमानानेकप्रकारत्वस्यैकप्रकारे आत्मनि शरीरमादायैव वक्तव्यत्वात्सेन्द्रियशरीरयुक्तस्यैवात्मनो भोग इति प्रतिपाद्य 'द्वादशाहवदुभयविधं बादरायणोऽतः' इति सूत्रेण सवा-

हीनोभयात्मकत्वं द्वादशाहस्य यथा तद्वदुभयविधश्रुतिबलाच्छरीरित्वं चोपपन्नमिति प्रतिपाद्य, 'तन्वभावे संध्यवदुपपत्तेः' 'भावे जाग्रद्वत्' इति सूत्राभ्यां शरीरित्वाशरीरित्वयोः अविरोधं प्रतिपाद्य 'प्रदीपवदावेशस्तथा हि दर्शयति' इति सूत्रेण मुक्तः पुष्कलभोगाय स्वसंकल्पसृष्टानेकशरीरेषु प्रदीपवदाविश्य विद्याबलाद्विहरति सौभरिवत् 'स एकधा भवति' इति श्रुतेरिति प्रतिपाद्य, 'जगद्व्यापारवर्जं प्रकरणात्' इति सूत्रेण 'आप्नोति स्वाराज्यं सर्वस्मै देवा बलिमावहन्ति' इत्यादिश्रुत्यावाप्तनिरङ्कुशैश्वर्यस्य वियदादिस्रष्टृत्वमपि तद्वदेवास्त्वित्यशङ्क्य 'आत्मन आकाशः संभूतः' 'तत्तेजोऽसृजत' इत्यादेः परमात्मप्रकरणस्थत्वात्तन्मात्रविषयत्वमिति प्रतिपाद्य, 'प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः' इत्यनेन 'आप्नोति स्वाराज्यम्' इति श्रुतिः आधिकारिकसवितृमण्डलमध्यस्थपरमेश्वरानुग्रहायत्ताणिमाद्यैश्वर्यमात्रविषया न तु जगत्स्रष्टृत्वपरा 'वाक्पतिश्चक्षुष्पतिः' इत्यादिविशेषग्रहणाच्च जगद्व्यापारवर्जमिति प्रतिपाद्य, 'भोगमात्र-

साम्यलिङ्गाच्च' 'यथैव देवतां सर्वाणि भूतान्यवन्ति एवं हैवंविदं सर्वाणि भूतान्यवन्ति' इति श्रुत्या भोगमात्रसाम्यावगमादपि जगद्व्यापारवर्जत्वम् न ह्येवं जगत्स्रष्टृत्वमसक्तस्य क्वचिद्व्यपदिश्यते, तेन 'एतस्यै देवतायै सायुज्यं सलोकतां जयति' इत्यादिभेदव्यपदेशलिङ्गेभ्यश्च जगद्व्यापारवर्जत्वमेवेति प्रतिपाद्य, 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इत्यन्तिमसूत्रेण अर्चिरादिमार्गेण ब्रह्मलोकं गतानां न पुनरावृत्तिरिति 'न स पुनरावर्तते' इत्यादिशब्दाद्ब्रह्मलोकं गतस्य अपुनरावृत्तिं प्रतिपादितवान्। एवं श्रुतिस्मृतिसूत्रैः अहंग्रहोपासकानां पञ्चाग्निविद्यावतां च अर्चिरादिमार्गेण पुनरावृत्तिरहितं ब्रह्मलोकं गतानां ब्रह्मणा सह जगद्व्यापारवर्जं ब्राह्मणान्सर्वान्भोगाननुभूय तत्रोत्पन्नात्मज्ञानेन 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति 'ब्रह्मणा सह मुच्यन्ते कल्पान्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति श्रुतिस्मृतिसूत्रोक्तप्रकारेण मुक्तिर्भवति। 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते

ते धूममभि संभवान्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षा-द्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभि प्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसम्, एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन्या-वत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाश-माकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते, अतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वा, अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' इति। तथा कौषीतकिब्राह्मणेऽपि 'ये वैके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति तेषां प्राणैः पूर्वपक्ष आप्यायतेऽथापरपक्षे न प्रजनयत्येतद्वै स्वर्गलोकस्य द्वारं यश्चन्द्रमास्तं यत्प्रत्याहतमिति सृजते

य एनं प्रत्याहतमिह वृष्टिर्भूत्वा वर्षति स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परश्वा वा पुरुषो वान्यो वैतेषु स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यम्' इति; यथाविद्यमङ्गावबद्धविद्यानुरूपमित्यर्थः। गीतायामपि— 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते। ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान्॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते' इति। एवं कर्मिणां धूमादिमार्गेण स्वर्गलोकं गतानां यथाकर्मफलभोगानन्तरं पुनर्वृष्ट्यादिद्वारा भुवं प्राप्य मनुष्यादिजन्मप्राप्तिर्भवति। निर्विशेषज्ञानवतां तु 'न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवलीयन्ते, अत्र ब्रह्म समश्नुते। ब्रह्मैव सन्ब्रह्माप्येति, परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुत्या 'सर्वभूतात्मभूतस्य सर्वभूतहितैषिणः देवापि मार्गे मुह्य-

न्ति अपदस्य पदैषिणः । शकुन्तानामिवाकाशे मत्स्यानामिव चोदके । यथा गतिर्न दृश्येत तथा ज्ञानविदां गतिः' इति स्मृत्वा च 'संपद्याविर्भावः स्वेन शब्दात्' इति सूत्रेण च 'स्वेन रूपेणाभिनिष्पद्यते' इति निष्पद्यप्रतिपादनान्मोक्षस्य फलप्रसिद्धेश्च रूपान्तरापत्तिमाशङ्क्य, स्वेन रूपेणेति शब्देन स्वरूपाविर्भाव एवावगम्यते, अन्यथा स्वशब्दवैयर्थ्यात् अतो न रूपान्तरापत्तिरिति प्रतिपाद्य, 'मुक्तः प्रतिज्ञानात्' इति सूत्रेण आवृतस्वरूपस्य अवस्थात्रयराहित्यरूपो विशेषो मुक्त्यवस्थायामस्ति, 'य आत्मापहतपाप्मा' इत्युपक्रान्तस्यात्मनः 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामः' इत्यनुकृष्य 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति अवस्थात्रयराहित्यप्रतिपादनात् 'रोगनिवृत्तोऽरोगो निष्पद्यते' इतिवन्निष्पत्तिव्यपदेशोपपत्तेश्च इति प्रतिपाद्य, 'आत्मा प्रकरणात्' इति सूत्रेण परमात्मप्रकरणात् 'तं देवा ज्योतिषां ज्योतिः' इत्यत्र ज्योतिःशब्दस्यात्मनि प्रयुक्तत्वात् 'य आत्मापहतपाप्मा' इति परमात्मप्रकरणस्थत्वाच्च 'परं ज्योतिरुपसं-

पद्य' इति परमात्मप्राप्तिरेवेति प्रतिपाद्य, 'अविभागेन दृष्टत्वात्' इति सूत्रेण 'स तत्र पर्येति' इत्याधाराधेयभावावगमात् 'ज्योतिरुपसंपद्य' इति गन्तृगन्तव्यव्यपदेशाच्च मुक्तस्य भेदेनैवावस्थानमाशङ्क्य 'तत्त्वमसि' इति वाक्येन अविभागावगमात् भेदव्यपदेशस्य 'स्वे महिम्नि' इतिवदुपपत्तेः परस्मिन्ब्रह्मणि अविभागेनैव मुक्तोऽवतिष्ठत इति सूत्रैश्च गमनेन विना स्वस्वरूपावस्थानरूपैव मुक्तिरत्रैव प्रतिपादिता। एवं कर्मिणामुपासकानां निर्विशेषज्ञानवतां च गतितदभाववैलक्षण्येन गन्तव्यस्वस्वरूपावस्थानरूपफलभेदाच्च न समुच्चयः। 'कर्मणा बध्यते जन्तुर्विद्यया प्रतिमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः॥ कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः। तेन ते देहजालानि रमयन्त उपासते' 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा', सूत्रमपि 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्'; तस्य ब्रह्मणोऽधिगमे उत्तरेषां कर्मणामश्लेषः पूर्वेषां विनाशः।

तथा च श्रुतिः 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते, तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति। 'इतरस्याप्येवमसंश्लेषः पाते तु' इतरस्य पुण्यस्याप्यसंश्लेषः 'उभे ह्येवैष एते तरति' इति सुकृतदुष्कृतयोरविशेषश्रवणात्, 'उपमर्दं च' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इति कर्तृकर्मप्रतिषेधात्। एवं श्रुतिस्मृतिसूत्रैर्ज्ञानविरोधित्वेन अनित्यफलत्वेन नश्वरत्वेन गतिमत्त्वेन च प्रतिपादितानां कर्मणां ज्ञानेन सह मोक्षे समुच्चयासंभवः। अत एव सर्वज्ञैर्वेदप्रामाण्यं समर्थयद्भिः कर्मकाण्डप्रवर्तकैः कर्मणां मोक्षहेतुत्वमनाशङ्कितमेव। ननु कर्मणां मोक्षहेतुत्वप्रतिपादकवचनानां का गतिरिति चेत्, तेषां चित्तशुद्धिद्वारा हेतुत्वाभिप्रायत्वात्। अत एव च श्रुतिः चित्तशुद्धिद्वारा विविदिषाहेतुत्वं कर्मणामाह—'तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' इति। यज्ञादिसहपाठात् यज्ञादीनि कर्माण्येवानुक्रमिष्यन्वेदानुवचनशब्दं प्रयुङ्क्ते। तस्मात्कर्मैव वेदानुवच-

नशब्देनोच्यत इति गम्यते। कर्म हि नित्यस्वाध्यायः कथं पुनर्नित्यं स्वाध्यायादिभिः कर्मभिरात्मानं विविदिषन्ति; नैव हि तान्यात्मानं प्रकाशयन्ति यथोपनिषदः। नैष दोषः, कर्मणां विशुद्धिहेतुत्वात्, कर्मभिः संस्कृता हि विशुद्धात्मानः शुक्नुवन्त्यात्मानमुपनिषत्प्रकाशितमप्रतिबन्धेन वेदितुम्। तथा ह्याथर्वणे 'विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति। स्मृतिश्च—'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इत्यादि। कथं पुनर्नित्यानि कर्माणि संस्कारार्थानीत्यवगम्यते? 'सह वा आत्मयाजी यो वेदेदं मेऽनेनाङ्गं संस्क्रियते इदमनेनाङ्गमुपधीयते' इत्यादिश्रुतेः सर्वेषु च स्मृतिशास्त्रेषु कर्माणि संस्कारार्थान्याचक्षते 'अष्टाचत्वारिंशत्संस्काराः' इत्यादिषु। गीतासु च— 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' इति 'सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः' इति च। यज्ञेनेति द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्कारार्थाः, संस्कृतस्य च विशुद्धसत्त्वस्य ज्ञानोत्पत्तिप्रतिबन्धो न भविष्यति। अतो यज्ञेन विविदिषन्ति दानेन, दानमपि पापक्षयहेतुत्वात् धर्महेतु-

त्वाच्च । तपसा, तप इति विशेषेण कृच्छ्रचान्द्रायणादिप्राप्तौ विशेषणम् । अनाशकेन इति कामानशनमनाशकं न तु भोजननिवृत्तिः, भोजननिवृत्तौ म्रियत एव, नात्मवेदनं भवति । वेदानुवचनयज्ञदानतपःशब्देन सर्वमेव नित्यं कर्म लक्ष्यते । एवं काम्यवर्जितं नित्यं कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपाद्यते । ज्ञानकर्मसमुच्चयवादिनाप्ययमर्थोऽङ्गीकृत एव । तेन नित्यनैमित्तिककर्मणां प्रत्यवायपरिहारार्थत्वस्याप्यङ्गीकारात्प्रत्यवायपरिहारस्य चित्तशुद्धिरूपत्वादेवं प्रनाड्या मोक्षहेतुत्वं संभवति । पृथक्साक्षाद्धेतुत्वकल्पने प्रमाणाभावात् 'नान्यः पन्था विद्यतेऽयनाय' इति ज्ञानव्यतिरेकेण मोक्षे साधनान्तरप्रतिषेधाच्च । स्मृतिरपि 'कषायपाक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते ॥ ज्ञानेन हि सदा जन्तुरज्ञानप्रभवं तमः । व्यपोहति तदा ब्रह्म प्रकाशति सनातनम्' 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' 'ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा । शौचमाचारसंशुद्धिरिन्द्रियाणां

च निग्रहः ॥ एतैर्विवर्धते तेजः पाप्मानं चापकर्षति । सिध्यन्ति चास्य सर्वार्था विज्ञानं च प्रवर्धते' 'श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते । तपो विद्या च विप्रस्य नैश्रेयसकरं परम् ॥ तपसा कल्मषं हन्ति विद्ययामृतमश्नुते' इति । तस्मात्कर्मणां मोक्षं प्रति चित्तशुद्धिद्वारैव हेतुत्वं सिद्धम् । एवं तपसोऽपि देवताप्रसादद्वारा ब्राह्मणवचनेनैव ब्राह्मण्यप्रापकत्वमिति सर्वं सुस्थम् । एषां ब्राह्मणानां लीलोदीरितवचनमात्रमपि सकललोकनिग्रहानुग्रहसमर्थम्, दुर्लभब्राह्मण्यप्रापकं च । तेषां ब्राह्मणानां माहात्म्यं श्रुतिस्मृतीतिहासपुराणधर्मप्रधानकाव्यादिषु बहुधा प्रतिपाद्यमानं कृत्स्नश उपवर्णयितुमशक्यमिति प्रकरणानुरोधेन दिक्प्रदर्शनमात्रमत्र कृतम् । एवमतिप्रशस्ततरं ब्राह्मण्यं ब्राह्मणानुग्रहेण विना न प्राप्यमिति तत्संपादकतपश्चरणाय दक्षिणां दिशं प्रतस्थे । षट्त्रिंशामारभ्य षष्टिपर्यन्तम्—ततो दक्षिणां दिशमभिगम्य सहस्रवर्षपर्यन्तमुग्रे तपसि वर्तमानं विश्वामित्रम्—

जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ।
अनेन तपसा त्वां तु राजर्षिरिति विद्महे ॥

इति पितामहः समभाषत । तद्वचनश्रवणसंजातमन्युर्विश्वामित्रः पुनरपि त्रैलोक्यभयंकरमत्युग्रं तपश्चरितुं समारभत । अत्रान्तरे सशरीरं स्वर्गगमनमभिलषंस्त्रिशङ्कुः स्वपुरोहितं वसिष्ठमभिगम्य, कथितनिजमनोरथस्तेन चातिदुर्घटमिदमिति सन्यक्कारमुक्तोऽपि, वसिष्ठपुत्राञ्शतसंख्यान्समासाद्य कृताञ्जलिस्तानभिवाद्य

शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ।
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः ॥

सशरीरो यथाहं हि देवलोकमवाप्नुयाम् ।
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः ।
गुरुपुत्राद्ते सर्वान्नाहं पश्यामि कंचन ॥

इत्यभ्यर्थितवान् । तं गुरुपुत्राः

अशक्यमिति होवाच वसिष्ठो भगवानृषिः ।

तं वयं वै समाहर्तुं क्रतुं शक्ताः कथं तव ।
बालेशत्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः ॥

इति प्रत्याचख्युः । अनेन पित्रा गुरुणा च यत्कृतं तदनुसृत्यैव गन्तव्यं तयोर्निषेधो न कर्तव्य इत्ययं धर्मः सूचितः । 'गुरोरलीकनिर्बन्धो न कर्तव्यः कदाचन । अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर ॥ शिष्यो गुरौ नरश्रेष्ठ प्रतिकूलं न संचरेत्' इति विष्णुपुराणे ॥ ततः स राजा सक्रोधः क्रोधपर्याकुलाक्षरम्,

प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ।
अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः ।

इत्युक्तवान् ।

ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं क्रोधाभिसंहितम् ।
शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ॥

इति ।

अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ।
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ॥

अनेन गुरोरतिनिर्बन्धोऽशास्त्रीयः, दुर्लभकामनया च प्रवृत्तस्य एतादृशी गतिर्भवतीति च सूचितम् । अतो गुरुनिर्बन्धो न कर्तव्यो यतोऽयं महापातकसदृशः । तथा च मनुः— 'महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥ अनृतं च समुत्कर्षे राजगामि च पैशुनम् ॥ गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया' इति । ततः स राजा धृतचण्डालवेषः, मन्त्रिपुरोहितजानपदैश्च राज्यात्परिभ्रंशितः, इतस्ततः संचरन्नुग्रे तपसि वर्तमानं विश्वामित्रमासाद्य, किमागमनकृत्यं केन वा निमित्तेन चण्डालरूपधारणम्' इति स पृष्टः, सर्वमस्मै निजवृत्तान्तमाचख्यौ । ततस्तद्वचनमाकर्ण्य करुणया स्पर्धया च त्रिशङ्कोः स्वशरीरेणैव स्वर्गगमनसंपादकयज्ञनिर्वाहाय नानादिगन्तवास्तव्यऋषिगणान्समानीय यज्ञसंभाराय शिष्यानाज्ञापयामास । विदितवृत्तान्ता वासिष्ठाः

क्षत्रियो याजको यस्य चण्डाल च विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः॥

ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनम्।
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः॥

इत्यवदन्। अनया क्षत्रिययाजकत्वनिन्दया ब्राह्मणानामेवार्त्विज्यमिति सूचितम्। तथा च आपस्तम्बः— 'ब्राह्मणानार्त्विज्यं सोमेन यक्ष्यमाणो ब्राह्मणार्षेयानृत्विजो वृणीते। ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः' इति। बोधायनोऽपि 'ब्राह्मणा ऋत्विजः' इति। जैमिनिरपि 'प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्' इति द्वादशान्त्याधिकरणे विद्यावत्त्वाविशेषात्सर्वेषामार्त्विज्यं पूर्वपक्षं प्रापय्य, 'स्वकर्म ब्राह्मणस्य यजनं याजनमध्ययनमध्यापनं दानं प्रतिग्रहणम्' इति। गौतमोऽपि 'क्रत्वर्थतया ब्राह्मणानामेवार्त्विज्यम्' इति नियमनात् 'ब्राह्मणानामिदं हविः नेहाब्राह्मणस्यास्ति' 'एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः' इति मन्त्रलिङ्गाच्च ब्राह्मणानामेवा-

त्विज्यमिति सिद्धान्तितवान् । 'चण्डालस्य विशेषतः' इति विशिष्य चण्डालयाजननिन्दाश्रवणात्सामान्यतोऽया-ज्ययाजनं न कर्तव्यमिति गम्यते । तथा च्छन्दोग-ब्राह्मणमयाज्ययाजने 'दक्षिणास्त्वक्तमासचतुर्थे काले भुञ्जानः कानीत्येतद्वायेत्' इति । सुमन्तुरपि— 'शूद्र-याजकः सर्वद्रव्यपरित्यागात्पूतो भवति' । वसिष्ठोऽपि— 'दक्षिणात्यागात्पूतो भवतीति च विज्ञायते' । मनुरपि— 'अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम् । कुलान्या-शु विनश्यन्ति यानि हीनानि मन्त्रतः' इति । बोधायनो-ऽपि— 'बहु प्रतिग्राह्यस्य प्रतिगृह्याप्रतिग्राह्यस्य वा याज्यं वा याजयित्वानाश्यान्नस्य वान्नमशित्वा तरत्समन्दीयं जपेत्' इति । आश्वलायनोऽपि— 'अगमनीयां गत्वा अप्रति-ग्राह्यं प्रतिगृह्य अयाज्यं याजयित्वा पुनर्मामित्यृचं जपे-त्' इति । सुमन्तुः— 'अभिशस्तपतितपौनर्भवभ्रूणहपुं-श्चल्याशुचिशस्त्रकरतैलिकचाक्रिकध्वजिस्वर्णकारालेख्यक-पण्यकवार्धुषिकाश्च गणिकसौमिकव्याधनिषादरजकबुरुड-चर्मकरा अभोज्यान्ना अप्रतिग्राह्या अयाज्याश्च' इति । अत्र

सकलधर्मशास्त्रकारश्चण्डालस्य अयाज्येषु परिगणनम्, चण्डालपतितावेक्षणे दुष्टमिति चण्डालदृष्टहविषो यज्ञानर्हतया तद्याजनमत्यन्तमप्रसक्तमिति। अत एव च मूले

क्षत्रियो याजको यस्य चण्डालस्य विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः॥

इति। एवमधिकारिणो यजमानस्य शुद्धैः ऋत्विग्भिः शुद्धद्रव्योपकरणैश्च कृत एव यागो देवताप्रीतिकर इति सूचितम्। तथा च श्रुतिः— 'शुचिमध्वरं देवा जुषन्ति। शुचिकामा हि देवाः शुचयश्च। तदेषाभिवदति। शुची वो हव्या मरुतः शुचीनाम्। शुचिꣳ हिनोम्यध्वरँ शुचिभ्यः। ऋतेन सत्यमृतसाप आयन् शुचिजन्मानः शुचयः पावकाः' इति। महाभारते आनुशासनिकेऽपि— 'सुशुद्धैर्यजमानैश्च ऋत्विग्भिश्च तथाविधः। शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः॥ तथाविधेषु यज्ञेषु देवानां तोषणं भवेत्। तुष्टेषु देवसंघेषु यज्ञी यज्ञफलं लभेत्॥ तस्माद्यज्ञादिवं यान्ति अमरैः सह मोदते

इति । वनपर्वणि तार्क्ष्यसरस्वतीसंवादे— न चाशुचिर्नाप्यनिर्णिक्तपाणिर्नाब्रह्मविज्जुहुयान्नाविपश्चित् । बुभुक्षवः शुचिकामा हि देवा नाश्रद्दधानाद्धि हविर्जुषन्ति ॥ नाश्रोत्रियं देवहव्ये नियुञ्ज्यान्मोघं पुरा सिञ्चति तादृशो हि । अपूर्वमश्रोत्रियमाह तार्क्ष्य न वै तादृग्जुहुयादग्निहोत्रम्' इति ॥

ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनम्।
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः ॥

इत्यनेन चण्डालान्नमभोज्यमित्युक्तम् । तथा च पराशरः— भुङ्क्तेऽज्ञानाद्द्विजश्रेष्ठश्चण्डालान्नं कथंचन । गोमूत्रयावकाहारो दशरात्रेण शुद्धयति । अन्त्यावसायिनामन्नमश्नीयाद्यश्च कामतः । स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ॥ चण्डालखातवापीषु पीत्वा सलिलमग्रजः । अज्ञानाद्वैव भक्तेन अहोरात्रेण शुध्यति' इति । आपस्तम्बोऽपि— 'तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा । अकामान्नक्तभोजी स्यादहोरात्रेण

कामतः' इति । 'चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् । गोमूत्रयवकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥ चण्डालघटसंस्थं तु यस्तोयं पिबति द्विजः । तत्क्षणात्क्षिप्यते यस्तु प्राजापत्यं समाचरेत् ॥ यदि न क्षिप्यते तोयं शरीरे यस्य जीर्यते । प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत्' इति । ततस्तद्वचनश्रवणसंजातकोपो विश्वामित्रः,

भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ।
श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ॥
विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् ।

इति शशाप । तेऽपि वासिष्ठाः समहोदयास्तच्छापोक्तदशामवापुः । अनेन महतां दूषणं न कर्तव्यम् इति सूचितम् । ततस्तच्छापभयान्महर्षिभिः प्रवर्तिते यज्ञे स्वस्वभागग्रहणायानागतान्देवानवलोक्य

ततः क्रोधसमाविष्टो विश्वामित्रो महामुनिः ।
स्रुवमुद्यम्य सक्रोधस्त्रिशंकुमिदमब्रवीत् ॥

पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥

स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम् ।
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ॥

इत्युक्तवान् । तद्वचनसमनन्तरमेव देवलोकगतं त्रिशङ्कुमवलोक्य जातमन्युः शतमन्युः

त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ।
गुरुशापहतो मूढ पत भूमिमवाक्शिराः ॥

इति समाज्ञप्तवान् । अत्र गुरुशापदग्धानां प्रतिकारो नास्तीति पूर्वमेव निरूपितम् । तदाज्ञया पुनरपि स्वर्गात्पतन्तं तं त्रायस्वेति ब्रुवाणं त्रिशङ्कुमवलोक्य, क्रोधाकुलहृदयः दक्षिणमार्गस्थान्सप्तर्षीन्नक्षत्रमालां चासृजत् ।

अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।

इति वदन् दैवतानपि स्रष्टुमुपचक्रमे । ततः संभ्रान्त-

देवर्षिगणप्रार्थनया वैश्वानरपथाद्बुहिस्त्रिशङ्कोरवाक्शिरोरूपेणावस्थानमङ्गीकुर्वन्, स्वप्रतिज्ञानिर्वाहणजनितानन्दः, यज्ञसमाप्तिमकरोत् ॥

ततो देवा महात्मानो मुनयश्च तपोधनाः ।
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥

अत्र विश्वामित्रस्य वसिष्ठस्पर्धया कर्मणि प्रवृत्तस्य चिरकालसमार्जिततपोव्ययेन, त्रिशङ्कोरप्युत्तमस्वर्गलोकानावाप्तिरिति प्रतिपादनात्, महता सह स्पर्धा न कर्तव्येति सूचितम् । एकषष्टितमसर्गे— दक्षिणदिगवस्थानमात्रेणैव स्वतपोविघ्नं मन्वानो विश्वामित्रः, पश्चिमां दिशमभिगम्य कन्दमूलफलैः कृतनियताहारः उग्रं तपस्तेपे । अत्रान्तरे समारब्धयज्ञमम्बरीषमिन्द्रापहृतयज्ञियपशुमवलोक्य

पशुरद्य हृतो राजन्प्रनष्टस्तव दुर्नयात् ।
अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥
प्रायश्चित्तमहं मंन्ये नरं वा पुरुषर्षभम् ।

इति ऋत्विगब्रवीत् । अनेन यज्ञमरक्षितुः राज्ञो दोषोऽस्तीति सूचितम् ॥

आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते ।

इति तदुपाध्यायः समाज्ञप्तवान् । अम्बरीषोऽपि तदाज्ञया नरपशुसंपादनाय सर्वतः पर्यटन् भृगुतुङ्गे समासीनं सभार्यमृचीकमवलोक्य कथितनिजवृत्तान्तः

गवां शतसहस्रेण विक्रीणीषे सुतं यदि ।
पशोरर्थे महाभाग कृतकृत्योऽस्मि भार्गव ॥

इति पर्यपृच्छत् । तद्वचनश्रवणसमनन्तरं गोधनाशया

नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन ।

इति स्वपित्रा ऋचीकेन कथिते, मात्रा

ममापि दयितं विद्धि कनिष्ठं शुनकं नृप ।
तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥

इत्यभिहिते, तत्पुत्रो मध्यमः शुनःशेपः

पिता ज्येष्ठमविक्रेयं माता चाह कनीयसम् ।
विक्रीतं मध्यमं मन्ये राजन्पुत्रं नयस्व माम् ॥

इति राजानमब्रवीत् । स च राजा मुदितमनाः,

गवां शतसहस्रेण शुनःशेपं नरेश्वरः ।
गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥

इति द्विषष्टितमसर्गे । ननु दानं क्रयधर्मश्चापत्यस्य न विद्यते । 'आपदि व्यवहरेत पण्यानामपण्यानि व्युदस्यान्मनुष्यान्' इत्यापस्तम्बेन । तस्यापण्यमित्युपक्रम्य पुरुषवशा कुमारी वेहतश्चेति गौतमेन । 'अत्र गाथां यमे गीतां कीर्तयन्ति पुराविदः । यथान्योऽपि न विक्रेयः किं पुनः पुरुषः प्रजाः ॥ यो मनुष्यो मनुष्यस्य विक्रयाद्धनमिच्छति । तस्य मूत्रं पुरीषं च स परत्रोपजीवति' इति मनुना चापत्यविक्रयस्य प्रतिषेधात् कथमत्र स कृत इति चेन्न ; तेषां वचनानां ज्येष्ठपुत्रैकपुत्रनिषे-

धपरत्वात् । तथा च मिताक्षरायां वसिष्ठः— 'न ज्येष्ठपुत्रं दद्याद्ब्रह्मीयाद्वा स हि संतानाय पूर्वेषाम्' । बोधायनोऽपि— 'न त्वेकपुत्रं दद्यात्स हि संतानाय पूर्वेषाम्' इति । दाननिषेधो विक्रयपरित्यागयोरप्युपलक्षकः । तथा च ज्येष्ठस्यैव कुलकरत्वेन तत्र तत्र प्रशंसा । श्रुतिस्तावत्— 'ऋणमस्मिन्स अपत्यमृतत्वं च गच्छति पिता पुत्रस्य जातस्य पश्येचेज्जीवतो मुखम्' इति । स्मृतिरपि— 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः । पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ यस्मिन्नृणं संनयति येन चामृतमश्नुते । स एव धर्मजः पुत्रः कामजानितरान्विदुः' इति मनुः । तस्माज्ज्येष्ठपुत्रैकपुत्रयोः अविक्रेयता ; द्वितीयादीनां तु विक्रयः संभावितः । न च तत्र प्रमाणाभावः, 'शोणित-शुक्रसंभवो मातृपितृनिमित्तकः, तस्य प्रदानपरित्याग-विक्रयेषु मातापितरौ भवतः' इति बोधायनवचनस्य सामान्यतो विक्रयप्रापकस्य प्रमाणान्तरेण ज्येष्ठैकपुत्र-निषेधपरेण, तदितरविशेषपर्यवसन्नस्यैव प्रमाणत्वात् । यद्यपि सर्वकनिष्ठस्य विक्रयः संभावितः, तथापि

मातुर्निरवधिकप्रीतिविषयत्वात्, माद्री न विक्रीतः। सर्वकनिष्ठत्वं च प्रीतिविषयत्वम्। तथा च महाभारते सभापर्वणि सहदेवं प्रति कुन्तीवचनम्— 'सहदेव निवर्तस्व ननु त्वमसि मे प्रियः। शरीरादपि माद्रेय मामत्याक्षीः कुपुत्रवत्॥ व्रजन्तु भ्रातरस्तेऽपि यदि सत्याभिसंधिनः। मत्परित्राणजं धर्ममिहैव त्वमवाप्नुहि'। आश्रमवासे धर्मपुत्रं प्रति कुन्तीवाक्यम्— 'सहदेवे महाराज मा प्रमादं कृथाः क्वचित्। एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा'। तत्रैव— 'सहदेवस्तु वेगेन प्राधावद्यत्र सा पृथा। सा च बाष्पाकुलमुखी ददर्श दयितं सुतम्' इति। ततः शुनःशेपस्तु चिन्ताकुलहृदयस्तेन राज्ञा सह गच्छन्, मध्येमार्गं पुष्करक्षेत्रे उग्रे तपसि वर्तमानं स्वमातुलं विश्वामित्रमभिगम्य

विषण्णवदनो दीनस्तृष्णया च श्रमेण च।
पपाताङ्के मुनेराशु वाक्यं चेदमुवाच ह॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः।
पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात्।

इति । तद्वचनश्रवणमात्रादेव संजातकरुणो विश्वामित्रः मधुष्यन्दादीन्स्वपुत्रानाहूय

यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः ।
परलोकहितार्थाय तस्य कालोऽयमागतः ॥

अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छथ ॥
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ।

इत्यवादीत् । अनेनात्मपुत्रपरित्यागेनापि शरणागतसंरक्षणमवश्यं कर्तव्यम् इति सूचितम् । तथा च श्रुतिः— 'तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छति' इति । तथा वनपर्वणि घोषयात्रायां भीमं प्रति युधिष्ठिरः— 'अस्मानभिगतांस्तात भयार्ताञ्शरणैषिणः । कौरवान्विषमं प्राप्तान्कथं ब्रूयास्त्वमीदृशम् ॥ य एव कश्चिद्राजन्यः शरणार्थमिहागतम् । परं शक्त्याभिरक्षेत किं पुनस्त्वं वृकोदर ॥ क इहार्यो भवेत्राणमभिधावेति चोदितः । प्राञ्जलिं

शरणापन्नं दृष्ट्वा शत्रुमपि ध्रुवम् ॥ वरप्रदानं राज्यं च पुत्रं जन्म च पाण्डवाः । शत्रोश्च मोक्षणं क्लेशात्त्रीणि चैकं च तत्समम्' इति । महाप्रस्थानिके इन्द्रं प्रति युधिष्ठिरः— 'प्रतिप्रदानं शरणागतस्य स्त्रियो वधो ब्राह्मणस्वापहारः । मित्रद्रोहस्तानि चत्वारि शक्र भक्तत्यागश्चैव समं मतो मे' इति । ततः

कथमात्मसुतान्हित्वा त्रायसेऽन्यसुतं विभो ।
अकार्यमिव पश्यामः श्वमांसमिव भोजने ॥

इति प्रतिवदतो मधुच्छन्दादीन्स्वपुत्रान्सहस्रवर्षपर्यन्तम्

श्वमांसभोजिनः सर्वे पृथिव्यामनुवत्स्यथ ।

इति शशाप । अनेनौद्धत्येन पितुराज्ञाप्रतिकूलवचनरूपाद्यवज्ञया महान्दोषो भवति । तथा च मनुः— 'पितृमातृगुरूणां च येऽवज्ञां चक्रुरुद्धताः । त इमे पूयविण्मूत्रगर्ते मज्जन्त्यधोमुखाः ॥ गर्दभो जायते जन्तुः पित्रोश्चाप्यवमानकृत् ॥ आक्रुश्य मातापितरौ शारिका संप्रजायते । तावेव पीडयित्वा तु कच्छपः संप्रजायते ॥ परिवादीखरो भवति श्वा वै भवति निन्दकः । परिभोक्ता क्रिमिर्भ-

वति कीटो भवति मत्सरी ॥ आचार्यश्च पिता चैव माता भ्राता च पूर्वजः । नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः' इति । आनुशासनिकेऽपि—'सम्यङ्मिथ्याप्रवृत्तेऽपि वर्तितव्यं गुरौविह । गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः' इति । ततो मुनिकुमारकाय अम्बरीषयज्ञसाद्गुण्यकरं सकृज्जपादेव इन्द्रतदनुजप्रीतिकरं गाथाद्वयमुपदिदेश । ततः समारब्धयज्ञेन राज्ञा पशुतया यूपे नियोजितमुनिकुमारकगीयमानगाथाद्वयश्रवणमात्रादेव तर्पितः सहस्राक्षः

दीर्घायुस्तु तदा प्रादाच्छुनःशेपाय राघव ।
स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् ॥

फलं बहुगुणं राम सहस्राक्षप्रसादजम् ।
विश्वामित्रोऽपि धर्मात्मा भूयस्तेपे महत्तपः ।
पुष्करेषु नरश्रेष्ठ दशवर्षशतानि च ॥

त्रिषष्टितमसर्गे— भूयोऽपि तपश्चरन्विश्वामित्रः

ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ।

इति ब्रह्मणा समादिष्टोऽप्यपरिपूर्णमनोरथ एव पुनरपि तपश्चरन्रूपयौवनशालिनीं संदर्शनमात्रेण सकलजनमोहिनीं मेनकां संप्रेक्ष्य कंदर्पवशगः तया सह दश वर्षाणि सुखमन्वभवत् । ततस्तपोविघातमवेक्ष्य परित्यज्य मेनकां पुनरपि तपश्चरणायोत्तरस्यां दिशि कौशिकीतीरमासाद्य, तत्रोग्रं तपः समाचरन् ब्रह्मणा महर्षित्वप्रदानपूर्वकं सबहुमानमाहूतोऽपि ब्रह्मर्षित्वमभिलषन्

ऊर्ध्वबाहुर्निरालम्बो वायुभक्षोऽचरत्तपः ।
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ।
शिशिरे सलिलस्थायी रात्र्यहानि तपोधनः ॥

चतुःषष्टितमपञ्चषष्टितमयोः— ततः स्वसमाधिभीरुभिर्देवैस्तपोविघाताय प्रहितां रम्भाम्

दश वर्षसहस्राणि शैली स्थास्यसि दुर्भगे ।

इति विश्वामित्रः शशाप । अनेन धर्मविघातो न कर्तव्यः इति सूचितम् ।

तस्य शापेन महता रम्भा शैली तदाभवत् ।
कोपेन स महातेजास्तपोपहरणे कृते ॥
इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥

अनेन जितेन्द्रियाणामेव तपःसिद्धिरिति इन्द्रियजयोऽवश्यं कर्तव्य इति च सूचितम् । तथा च मनुः— 'इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् । जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः । अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ॥ प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' इति । गीतायामपि— 'यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः । वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां

वायुर्नावमिवाम्भसि ॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता' इति। मनुरपि— 'वेदास्त्यागश्च यज्ञाश्च तपांसि नियमास्तथा। न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥ इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयः। संनियम्य तु तान्येव ततः सिद्धिं स गच्छति ॥ इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम्। तदस्य हरति प्रज्ञां दृतेः पादादिवोदकम् ॥ वशे कृत्वेन्द्रियग्रामं संनियम्य मनस्तथा। सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम्' इति। महाभारते राजधर्मे— 'प्रसृतैरिन्द्रियैर्दुःखितैरेव नियतैः सुखी। तस्मादिन्द्रियरूपेभ्यो यच्छेदात्मानमात्मनि' इति।

बभूवास्य पुनश्चिन्ता तपोपहरणे कृते।
नैवं क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ॥

अनेन जितक्रोधानामेव तपआदिधर्मसिद्धेः क्रोधो

न कर्तव्य इति सूचितम्। तथा च मनुः— 'क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम्। ततो धर्मविहीनानां गतिरिष्टा न विद्यते'। वनपर्वणि द्रौपदीं प्रति युधिष्ठिरवचनम्— 'क्रोधो हन्ता मनुष्याणां क्रोधो भावयिता पुनः। इति विद्धि महाप्राज्ञ क्रोधमूलौ भवाभवौ। क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि। क्रुद्धः परुषया वाचा श्रेयसोऽप्यवमन्यते'। एवमिन्द्रियनिग्रहक्रोधजयपूर्वकम्,

पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम्।
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतम्।
भोक्तुमारब्धवानन्नं तस्मिन्काले रघूत्तम॥

इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत।
तस्मै दत्त्वा तदा सिद्धं सर्वं विप्राय निश्चितः॥

अनेन वैश्वदेवान्ते समागतोऽतिथिः स्वयमुपोष्यापि स्वीयान्नप्रदानेन संभोज्य इति सूचितम्। तथा च कठवल्ल्यां नाचिकेताः स्वपितृसमारब्धयज्ञदक्षिणात्वेन

पीतोदकजग्धतृणदुग्धदोहनिरिन्द्रियगोप्रदानेन पितुरानन्दलोकगमने क्रत्वसंपत्तिनिमित्तमनिष्टं भवतीति तन्निरसनाय कस्मै मां दास्यसीति पुनः पुनः पप्रच्छ। पिता क्रोधेन मृत्यवे त्वा दास्यामीत्युवाच। स च पितुर्वचनपरिपालनमेव गरीयान्धर्म इति तद्वचनगौरवेण यमभवनं गत्वा, प्रोषिते यमे तिस्रो रात्रीरपूजित एव उवास। प्रोष्यागतं यममात्मा ऊचुः—'वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्। तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम्। आशाप्रतीक्षे संगतँ सूनृतां चेष्टापूर्तं पुत्रपशूँश्च सर्वान्॥ एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे' इति। ततो मृत्युः 'तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः। नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व' इत्येवं प्रसाद्य दिनत्रयमनशनेन स्वगृहनिवासदोषपरिहाराय वरत्रयं प्रादात् इति। तैत्तिरीयश्रुतावपि— 'यो मा ददाति स इदेव मा वा अहमन्नमन्नमदन्तमद्मि पूर्वमन्नेरपि दहन्नन्नम्' इति। बोधायनोऽपि— 'यो मामदत्त्वा पितृदेव-

ताभ्यो भृत्यातिथीनां च सुहृज्जनस्य । संपन्नमश्नन्विष-
मत्ति मोहात्तमद्मि हन्तस्य च मृत्युरस्मि ॥ कृताग्निहोत्रः
कृतवैश्वदेवो भृत्यातिथीन्बन्धुजनावशिष्टम् । तुष्टः शुचिः
श्रद्दधदत्ति यो मां तस्यामृतं स्यां स च मां भुनक्ति'
इति । आपस्तम्बोऽपि— 'काले स्वामिनावन्नार्थिनौ न
प्रत्याचक्षीयाताम् । अभावे भूमिरुदकं तृणानि कल्याणी
वागित्येतानि वै सतोऽगारे न क्षीयन्ते कदाचन । इत्येवं
वृत्तौ अनन्तलोकौ भवतः ' इति । आपस्तम्बोदाहृतब्राह्म-
णमपि— 'स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यः
प्रततः । योऽतिथीनामग्निः स आहवनीयः यः कुटुम्बे
स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः ऊर्ज पुष्टिं
प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति । यः पूर्वोऽति-
थेरश्नाति पय उपसेचनमन्नमग्निष्टोमसमितं सर्पिषोक्थ्य-
संमितं मधुनातिरात्रसंमितं मांसेन द्वादशाहसंमितमुदके
प्रजावृद्धिरायुषश्च प्रियाप्रियाश्चातिथयः स्वर्गं लोकं गमय-
न्तीति विज्ञायते स यत्प्रातर्मध्यंदिने सायमिति ददाति
सवनान्येव तानि भवन्ति यदनुतिष्ठत्युदवस्यत्येव तत् ।

यत्सान्त्वयति सा दक्षिणा प्रशंसा यत्संसाधयति ते विष्णुक्रमाः। यदुपावर्तते सोऽवभृथ इति हि ब्राह्मणम्'। मनुरपि— 'कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत्। संप्राप्ताय त्वतिथये प्रदद्यादासनोदके॥ अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्। अग्नौ हुत्वा विधानेन यत्पुण्यफलमश्नुते॥ तेन तुल्यं समं वापि ब्राह्मणे तर्पिते फलम्। अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते॥ स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति। सिलेनाप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः॥ सर्वं सुकृतमादत्ते ब्राह्मणो नार्चितो वसन्' इति। आश्वमेधिकेऽपि— 'साङ्गोपाङ्गांस्तथा वेदान्पठतीह दिने दिने। न चातिथिं पूजयति वृथा स पठति द्विजः॥ पाकयज्ञैर्महायज्ञैः सोमसंस्थाभिरेव च। ये यजन्ति न चार्चाभिर्गृहेष्वतिथिमागतम्॥ तेषां यशोर्थकामानां दत्तमिष्टं च यद्भवेत्। वृथा भवति तत्सर्वमाशया हतया हतम्॥ वैश्वदेवान्तिके प्राप्तमतिथिं यो न पूजयेत्। स चण्डालत्वमाप्नोति सद्य एव न संशयः॥ नैव स्वयं तदश्नीयादतिथिं यन्न पूजयेत्। धन्यं यशस्य-

मायुष्यं स्वर्ग्यं चातिथिपूजनम्'। तथा शातातपोऽपि—'स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा। नावाप्नोति गृही लोकान्यथा त्वतिथिपूजनात्' इति। आनुशासनिके—'अतिथिः पूजितो यद्धि ध्यायते मनसा शुभम्। न तत्क्रतुशतेनापि तुल्यमाहुर्मनीषिणः'। आरण्यके पर्वणि तार्क्ष्यसरस्वतीसंवादे—'यो दत्त्वातिथिभूतेभ्यः पितृभ्यश्च द्विजोत्तमः। शिष्टान्यन्नानि यद्भुङ्क्ते किं वै सुखतरं ततः॥ अतो मृष्टतरं नान्यन्न्यूनं किंचिच्छतक्रतौ। दत्त्वा यस्त्वतिथिभ्योऽन्नं भुङ्क्ते तेनैव नित्यशः॥ यावतो ह्यन्धसः पिण्डानश्नाति सततं द्विजः। तावता गोसहस्राणां फलमाप्नोति दायकः॥ कपिलायां तु दत्तायां यत्फलं ज्येष्ठपुष्करे। तत्फलं भरतश्रेष्ठ विप्राणां पादधावने॥ द्विजपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपर्णेन पिबन्ति पितरो जलम्॥ स्वागतेनाग्रयस्तृप्ता आसनेन शतक्रतुः। पितरः पादशौचेन अन्नाद्येन प्रजापतिः' इति।

निःशेषितेऽन्ने भगवानभुक्त्वैव महातपाः।

तथैवासीत्पुनर्मौनमनुच्छ्वासं चकार ह ।
तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ॥

त्रैलोक्यं येन संभ्रान्तमादीपितमिवाभवत् ।
व्याकुलाश्च दिशः सर्वा न च किंचित्प्रकाशते ॥

सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः ।
प्रकम्पते च पृथिवी वायुर्वाति भृशाकुलः ॥

एवं त्रैलोक्यसंक्षोभकरं तपस्तप्यन्तं तमृषिमवलोक्य

ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ।
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ॥

इति वदन्तं ब्रह्माणम्

कृत्वा प्रणाममुदितो व्याजहार महामुनिः ।
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ।
ओंकारश्च वषट्कारो वेदाश्च वरयन्तु माम् ॥

क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ।
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः ॥

इति प्रार्थयामास ।

ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः ।
सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥
ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपत्स्यते तव ।

इति वसिष्ठवाक्येन ब्राह्मण्यं प्राप्तम्, ब्राह्मणसाधारणधर्माश्च सर्वेऽपि प्राप्ता इत्युक्तं भवति । इति पञ्चषष्टितमः सर्गः ।

तदनु वसिष्ठवचनसमनन्तरं प्राप्तब्रह्मर्षिभावः महाप्रभावोऽयं कौशिक इति शतानन्दवचनश्रवणेन जनितानन्दो जनकमहाराजः तं तपोनिधिं बहुधा प्रशस्य,

कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलम् ।
स्वागतं तपतां श्रेष्ठ मामनुज्ञातुमर्हसि ॥

इति प्रार्थनापूर्वकं रामलक्ष्मणाभ्यां सह विश्वामित्रं

विससर्ज । षट्षष्टितमे— ततः प्रभाते कृतपूर्वाह्णिक-क्रियो विश्वामित्रः रामलक्ष्मणाभ्यां सह जनकसमीप-मागत्य तत्कृतासनपाद्यार्घ्यपूजां प्रतिगृह्य, किं करो-म्याज्ञापयतु भवानिति सादरं पृष्टः, त्वद्गृहे न्यासभूतं धनूरत्नं द्रष्टुकामाविमौ रामलक्ष्मणौ, तद्दर्शयतु भवा-नित्यब्रवीत् । स च राजा 'दक्षयज्ञे स्वभागपरिक-ल्पनजनितरोषेण सकलदेवनिषूदनाय धनुरायम्य प्रवृ-त्तेन महादेवेन सकलदेवप्रार्थनया निवृत्तकोपेन प्रत्तं धनू-रत्नं देवाः निमेः षष्ठे देवराते न्यासं चक्रुः । अथ क्षेत्रं कृषतो मम भूतलादुत्थितां सीतां तद्धनुरारोपपण्यां कृत-वते देयेति वीर्यशुल्कतया स्थापितामुपश्रुत्य, समागतैर्ध-नुषस्तोलनेऽप्यसमर्थानवगत्य प्रत्याख्यातैः, तेन च कोपेन संवत्सरं मिथिलामुपरुन्धद्भिः प्रक्षीणबलः, देवप्रार्थनया पुनर्लब्धचतुरङ्गबलेन सर्वाञ्जितवानस्मि । तदाप्रभृति तदारोपणसमर्थं पुरुषं काङ्क्षतो मम इदं धनूरत्नं रामो यद्यारोपयिष्यति,

सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ।

इत्यकथयत् ॥

सप्तषष्टितमे,— ततो धनूरत्नमानीयतामिति विश्वामित्रसंचोदितो जनकः, अष्टचक्रमञ्जूषागतं महाबलयुक्तपञ्चशतमनुष्यैर्यत्नेन समानीतं धनूरत्नं विश्वामित्राय निवेदयामास । ततो विश्वामित्रेण संचोदितो रामः मञ्जूषामपावृत्य सलीलं धनूरत्नं मध्ये गृहीत्वा ज्यामारोप्य पूरयन् बभञ्ज—

तस्य शब्दो महानासीन्निर्घातसमनिस्वनः ।
भूमिकम्पश्च सुमहान्पर्वतस्येव दीर्यतः ॥

निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।
वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥

ततस्तीर्णप्रतिज्ञो जनको देवदानवादिभिरप्यशक्यारोपणधनूरत्नभञ्जनेन विस्मयाविष्टहृदयो विश्वामित्रेण सह रामाय सीताप्रदानं विनिश्चित्य, तदनुज्ञया दशरथानयनाय शीघ्रगान्दूतान्प्रेषयामास ।

अष्टषष्टितमसर्गे—

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः ।
त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन्पुरीम् ।
ते राजवचनाद्दूता राजवेश्म प्रवेशिताः ॥

राजानं प्रयता वाक्यमब्रुवन्मधुराक्षरम् ।
पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः ॥

कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ।
पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा ॥

यदृच्छयागतैर्वीरैर्निर्जिता तव पुत्रकैः ।
तच्च राजन्धनुर्दिव्यं भग्नं रामेण धीमता ॥

अस्मै देया मया सीता वीर्यशुल्का ममात्मजा ।
शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥

इत्युक्त्वा विरता दूता राजगौरवशंसिनः ।
सुप्रीतश्चाब्रवीद्राजा श्वो यास्येति स मन्त्रिणः ॥

एकोनसप्ततितमे— ततः प्रभाते चतुरङ्गबलपरिवृतो राजा वसिष्ठवामदेवादिद्विजान्पुरस्कृत्य,

गत्वा चतुरहं मार्गं मिथिलामभ्युपेयिवान् ।

ततस्तदागमनजनितानन्देन जनकेन शतानन्दं पुरस्कृत्य स्वागतादिकुशलप्रश्नपूर्वकं पूजां कुर्वता

श्वः प्रभाते नरेन्द्रेदं निर्वर्तयितुमर्हसि ।
यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसंमतम् ॥

इति पृष्टो दशरथः—

प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ।
यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयम् ॥

इति प्रत्यवादीत् ।

सप्ततितमसर्गे— जनकोऽपि तद्वचनश्रवणसमनन्तरं शतानन्दाभ्यनुज्ञया भ्रातरं कुशध्वजं समानीय कथितनिजवृत्तान्तः तेन सह संमन्त्र्य सुदामानं मन्त्रिश्रेष्ठं

स्वगृहं प्रति दशरथानयनाय प्रेषयामास । दशरथोऽपि मन्त्रिपुरोहितबान्धवसमेतो जनकसमीपमागम्य—

विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ।
एष वक्ष्यति धर्मात्मा वसिष्ठो मे यथाक्रमम् ॥

इत्यब्रवीत् । वसिष्ठोऽपि—

अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥

विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः ।
मनुः प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥

तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ।
इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः ॥

कुक्षेरथात्मजः श्रीमान्विकुक्षिरुदपद्यत ।
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् ॥

बाणस्य तु महातेजा अनरण्यः प्रतापवान् ।
अनरण्यात्पृथुर्जज्ञे त्रिशङ्कस्तु पृथोः सुतः ॥

त्रिशङ्कोरभवत्पुत्रो धुन्धुमारो महायशाः ।
धुन्धुमारान्महातेजा युवनाश्वो महाबलः ॥

युवनाश्वसुतः श्रीमान्मान्धाता पृथिवीपतिः ।
मान्धातुस्तु सुतः श्रीमान्सुसंधिरुदपद्यत ॥

सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् ।
यशस्वी ध्रुवसंधेस्तु भरतो नाम नामतः ॥

भरतात्सुमहातेजा असितो नाम जातवान् ।
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ॥

हैहयास्तालजङ्घाश्च शूराश्च शशिबिन्दवः ।
तान्स तु प्रतियुद्ध्यन्वै युद्धे राजा प्रवासितः ॥

हिमवन्तमुपागम्य भार्याभ्यां सहितस्ततः ।
असितोऽप्यबलो राजा मन्त्रिभिः सहितस्तथा ॥

द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः ।
एका गर्भविनाशाय सपत्न्यै सा गरं ददौ ॥

ततः शैलवनं रम्यं बभूवाभिरतो मुनिः ।
भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ॥

तत्रैका तु महाभागा भार्गवं देववर्चसम् ।
ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमात्मनः ॥

तमृषिं साभ्युपागम्य कालिन्दी चाभ्यवादयत् ।
सतामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि ॥

तव कुक्षौ महाभागे सुपुत्रः सुमहाबलः ।
महावीर्यो महातेजा अचिरात्संजनिष्यति ॥

गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ।
एवमुक्ता महाभागा असिते स्वर्गते सति ॥

विधाय चेतो नृपतौ विद्युल्लेखेव सुप्रभा ।
च्यवनं तु नमस्कृत्य राजपुत्री पतिव्रता ॥

पतिशोकातुरा तस्मात्पुत्रं देवी व्यजायत ।
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ॥

सह तेन गरेणैव जातः स सगरोऽभवत् ।
सगरस्यासमञ्जस्तु असमञ्जादथांशुमान् ॥

दिलीपोंशुमतः पुत्रो दिलीपस्य भगीरथः ।
भगीरथात्ककुत्स्थश्च ककुत्स्थस्य रघुः सुतः ॥

रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ।
कल्माषपादो ह्यभवत्तस्माज्जातस्तु शङ्खणः ॥

सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ।
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः ॥

मरोः प्रशुश्रुकस्त्वासीदम्बरीषः प्रशुश्रुकात् ।
अम्बरीषस्य पुत्रोऽभून्नहुषः पृथिवीपतिः ॥

नहुषस्य ययातिस्तु नाभागश्च ययातिजः ।
नाभागस्य बभूवाज: अजाद्दशरथोऽभवत् ॥

तस्माद्दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ।
आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम् ॥

इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनाम् ।
रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप ॥

सदृशाभ्यां नरश्रेष्ठ सदृश्यौ दातुमर्हसि ।
एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ।

श्रोतुमर्हसि भद्रं ते कुलं नः कीर्तितं परम् ।
प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः ॥

वक्तव्यं कुलजातेन तं निबोध महामुने ।
राजाभूत्त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा ॥

निमिः परमधर्मात्मा सर्वसत्त्ववतां वरः ।
तस्य पुत्रो मिथिर्नाम जनितो मिथिपुत्रकः ॥

प्रथमो जनको नाम जनकादप्युदावसुः ।
उदावसोस्तु धर्मात्मा जातो वै नन्दिवर्धनः ॥

नन्दिवर्धनपुत्रस्तु सुकेतुर्नाम नामतः।
सुकेतोरपि धर्मात्मा देवरातो महाबलः॥

देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः।
बृहद्रथस्य शूरोऽभून्महावीरः प्रतापवान्॥

महावीरस्य धृतिमान्सुधृतिः सत्यविक्रमः।
सुधृतेरपि धर्मात्मा धृष्टकेतुः सुधार्मिकः॥

धृष्टकेतोस्तु राजर्षेर्हर्यश्व इति विश्रुतः।
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतीन्धकः॥

प्रतीन्धकस्य धर्मात्मा राज कीर्त्तिरथः सुतः।
पुत्रः कीर्त्तिरथस्यापि देवमीढ इति स्मृतः॥

देवमीढस्य विबुधो विबुधस्य महीध्रकः।
महीध्रकसुतो राजा कीर्त्तिरातो महाबलः॥

कीर्त्तिरातस्य राजर्षेर्महारोमा व्यजायत।
महारोम्णः सुधर्मात्मा स्वर्णरोमा व्यजायत॥

स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत।
तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः।

ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः॥
मां तु ज्येष्ठं पिता राज्ये सोऽभिषिच्य नराधिपः॥

कुशध्वजं समावेश्य भारं मयि वनं गतः।
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने॥

ददामि परमप्रीतो वध्वौ ते मुनिपुंगव।
सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय च॥

वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम्।
द्वितीयामूर्मिलां चैव त्रिर्ददामि न संशयः॥

द्विसप्ततितमसर्गे— ततो जनकवचनश्रवणसमनन्तरं विश्वामित्रः कुलद्वयमपि प्रशस्य

सदृशो धर्मसंबन्धः सदृशो रूपसंपदा।

इति विश्वामित्रवचनेन च कुललक्षणादिपरीक्षापूर्वकं

वधूवरयोः सदृशवयोरूपसंपन्नयोरेव विवाहः कर्तव्य इति सूचितम्। तथा चाश्वलायनाचार्याः— 'कुलमग्रे परीक्ष्यो मातृतः पितृतश्च' इति। 'यथोक्तं पुरस्तात्—' इति दशपेयोक्तम्। 'कुलपरीक्षणम्' इति दिष्टवान्— दशपेये च— 'ये मातृतः पितृतश्च दशपूरुषं समनुष्ठिताः। विद्यातपोभ्यां पुण्यैश्च कर्मभिरेषामुभयतः॥ नाब्राह्मण्यं निनयेयुः पितृत एक इत्येति' इति विवाहेऽप्यतिदिष्टवान्। मनुरपि—'महान्त्यपि समृद्धानि गोजाविधनधान्यतः। स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत्॥ हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्। क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च' इति॥ यमः— 'चतुर्दशकुलानीमान्यविवाह्यानि निर्दिशेत्। अनार्षेयं ब्राह्मणानामृत्विजां चैव वर्जयेत्॥ अत्युच्चमप्यतिह्रस्वमतिवर्ण च वर्जयेत्। हीनाङ्गमतिरिक्ताङ्गमामयाविकुलानि च॥ श्वित्रिकुष्ठिकुलादीनां कुर्याद्विप्रविवर्जनम्। सदा कामकुलं वर्ज्यं रोमशानां च यत्कुलम्॥ अपस्मारिकुलं यच्च यच्च पाण्डुकुलं भवेत्। ये स्तेनाः पिशुनाः

क्रीडा ये च नास्तिकवृत्तयः। विकर्मणा च जीवन्तो विकृताकृतयस्तथा॥ प्रवृद्धवैराः शूरैर्ये राजकिल्बिषिणस्तथा। ब्रह्मस्वादाननित्याश्च कदर्याश्च विगर्हिताः॥ न प्रजा येषु वंशेषु स्त्रीप्रजाप्रसवस्तथा। पतिघ्नयश्च स्वैरिण्यस्ताश्च यत्नेन वर्जयेत्' इति। भारतेऽपि— 'यन्मूलं सर्वधर्माणां प्रजनस्य गृहस्य च। पितृदेवातिथीनां च तन्मे ब्रूहि पितामह' इति युधिष्ठिरप्रश्नस्य भीष्मोत्तरम्— 'शीलं वृत्तिं च विज्ञाय विद्यां योनिं च कर्म च। सद्भिरेवं प्रदातव्या कन्या गुणवते वरे' इति। उपादेयकुलान्युच्यन्ते। तत्र याज्ञवल्क्यः— 'दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात्' उपादेयेत्यर्थः॥ मनुः— 'उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह। निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्॥ विशुद्धाः कर्मभिश्चैव श्रुतिस्मृतिनिदर्शितैः। अविप्लुतब्रह्मचर्या महाकुलसमन्विताः॥ महाकुलेन संबद्धा महत्त्वे च व्यवस्थिताः। संतुष्टाः सज्जनहिताः साधवः समदर्शिनः॥ लोभरागद्वेषमर्षणामोहादिविवर्जिताः। अक्रोधनाः सुप्रसादाः कार्याः संबन्धिनः

सदा' इति । वरलक्षणमाह गौतमः— 'विद्याचारित्रबन्धुलक्षणशीललक्षणसंपन्नाय दद्यात्' । आपस्तम्बोऽपि— 'बन्धुशीललक्षनसंपन्नः श्रुतवानरोग इति वरसंपत्' इति । आश्वलायनोऽपि—'बुद्धिमते कन्यां प्रयच्छेत्' । इति । यमः— 'कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च । एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम्' इति । कन्यालक्षणमाहाश्वलायनाचार्यः— 'बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेत' । याज्ञवल्क्यश्च— 'अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् । उद्वहेत द्विजः कन्यामसपिण्डां यवीयसीम्' । मनुरपि— 'असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ॥ नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । न पक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकाम् ॥ अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुरोमकेशदशनां मृदुङ्गीमुद्वहेत्स्त्रियम् ॥

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता। नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया'। आपस्तम्बोऽपि— 'दत्तां गुप्तां द्योतामृषभां शरभां विनतां विकटां मुण्डां मण्डूषिकां सांकारिकां रातां पालीं मित्रां स्वनुजां वर्षकारीं च वर्जयेत्। नक्षत्रनामा नदीनामा वृक्षनामा च गर्हिताः। सर्वाश्च रेफलकारोपान्ता वरणे परिवर्जयेत्'। गौतमः—'गृहस्थः सदृशीं भार्यां विन्देत अनन्यपूर्वां यवीयसीम्' इति। विष्णुः— 'न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम्। न घर्घरस्वरां क्षामां तथा काकस्वरां न च॥ नातिवृत्तेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः। यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ॥ गण्डयोः कूर्परे यस्या हसन्त्यास्तां च नोद्वहेत्। नातिरूक्षच्छविं पाण्डुं करजामरुणेक्षणाम्। आपीनहस्तपादां च न कन्यामुद्वहेद्बुधः॥ न वामनां नातिदीर्घां नोद्वहेत्संहतभ्रुवम्। न चातिच्छिद्रदशनां न करालमुखीं नरः' इति।

इत्युक्त्वा भरतशत्रुघ्नाभ्यामपि कुशध्वजसुते प्रतिरूपे प्रदातव्ये इति जनकमवदत्—

जनकश्च—

एकाह्ना राजपुत्रीणां चतसृणां महामुने ।
पाणीन्गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥

उत्तरे दिवसे ब्रह्मन्फल्गुनीभ्यां मनीषिणः ।
वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥

इति विश्वामित्रं सादरमब्रवीत् । अनेन उत्तरफल्गुन्यां विवाहः प्रशस्त इति सूचितम् । तथा च बोधायनः— 'रोहिणी मृगशीर्षण्युत्तरफल्गुनी स्वातीति विवाहस्य नक्षत्राणि' । 'मघा मृगशिरो हस्तस्वाती मूलानुराधयोः । रेवती रोहिणी चैव उत्तराणि त्रयस्तथा ॥ आवाहे च विवाहे च विद्यासंग्रहणेषु च । वापयेत्सर्वबीजानि गृहं ग्रामं प्रवेशनम्' । ततः जनकवचनश्रवणसंजातसंतोषो दशरथः परमनुगृहीतोऽस्मि युवाभ्यामसंख्येयगुणाभ्यां भ्रातृभ्यामिति जनककुशध्वजावापृच्छ्य वसिष्ठविश्वामित्रपुरस्कृतः स्वमालयं जगाम ।

स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥

अनेन मङ्गलकर्मसु आदौ श्राद्धं कर्तव्यमिति सूचितम् । तथा च विष्णुपुराणे— 'सचेलस्य पितुः स्नानं जाते पुत्रे विधीयते । जातकर्म तदा कुर्याच्छ्राद्धमाभ्युदयं चरेत् ॥ कन्यापुत्रविवाहेषु प्रवेशेषु च वेश्मनः । सीमन्तोन्नयने चैव पित्रादिमुखदर्शने' इति । ततः पुत्रवत्सलो राजा एकैकपुत्रोद्देशेन स्वर्णशृङ्गालंकृतानेकशतसहस्रगवीर्बहुधनवस्त्राभरणं च दत्तवान् । गोदाने आश्वलायनः— 'एतेन गोदानं षोडशे वर्षे' इति। खादिरगृह्ये—'गोदाने चौलवत्कल्यः सलोमं वापयेत् गोअश्वाविमिथुनानि दक्षिणा'। त्रिसप्ततितमे— अथ स्वस्रीयसंदर्शनाय समागतं युधाजितं परमसत्कारैः संपूज्य अपरेद्युः कृतनित्यक्रियो वासिष्ठादिपरमर्षिसहितः कृतकौतुकमङ्गलैः सर्वाभरणभूषितैः पुत्रैः सहितो दशरथः, 'दातारं त्वामभिकाङ्क्षते' इत्यभिहितो जनकोऽपि तान्सर्वान्विवाहमण्डपं प्रवेश्य

कारयस्व ऋषे सर्वमृषिभिः सह धार्मिक ।
रामस्य लोकरामस्य क्रियां वैवाहिकीं विभो ॥

इति वसिष्ठमब्रवीत् । वसिष्ठोऽपि गन्धपुष्पलाजपूर्ण-पात्रसाङ्कुरजलकुम्भादिभिः विवाहमण्डपमलंकृत्य मन्त्रपूर्वकं विवाहाग्निमुपसमाधाय यथाविधि होमं कृतवान् । ततो जनकः सर्वाभरणभूषितां सीतामग्रेः समक्षं संस्थाप्य राघवाभिमुखो भूत्वा सादरमिदमब्रवीत्—

इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥

पतिव्रता महाभागा च्छायेवानुगता सदा ।
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ॥

नन्वनेनात्र श्रीरामभद्रस्य विवाह उक्तः । विवाहाश्चाष्टविधाः स्मृतिषु प्रसिद्धाः । तथा च मनुः— 'ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ आच्छाद्य चार्चयित्वा च श्रुति-

शीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ यज्ञे च विततेऽ सम्यगृत्विजे कर्म कुर्वते । अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः । कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ सहोभौ चरतां धर्ममिति वाचानुभाष्य च । कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥ ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः । कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥ इच्छयान्योन्यसंसर्गः कन्यायाश्च वरस्य च । गांधर्वः स च विज्ञेयो मैथुन्यः कामसंभवः ॥ हत्वा च्छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ सुप्तां मत्तां प्रमत्तां वा रहो यत्र गच्छति । स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः । एतेष्वष्टसु विवाहेषु अयं विवाहो न कोऽपि भवितुमर्हति, तदुक्तलक्षणाभावात् । तथा हि— न तावद्ब्राह्मः, आहूय दानाभावात्; नापि दैवः, क्षत्रियस्यार्त्विज्यासंभवात्; नाप्यार्षः, कन्यापित्रे गोमिथुनगोदानाभावात्; नापि प्राजापत्यः,

वीर्यशुल्केति कथनात्; नाप्यासुरः, कन्यापितुर्द्रव्यदानाभावात्; नापि गांधर्वः, परस्परानुरागेण संसर्गाभावात्; नापि राक्षसः, छेदनहननादिना प्रसह्य कन्याहरणाभावात्; नापि पैशाचः, स्वापप्रमादान्यतमावस्थायुक्तायाः रहसि धर्षणाभावात्; तस्मात्कृतमोऽयं विवाह इति चेत्, सहधर्मचरी तवेत्युक्त्वा प्राजापत्य एव विवाहः। तथा चाश्वलायनः—'सह धर्मं चरत इति प्राजापत्यः' इति। गौतमोऽपि—'संयोगमन्त्रः प्राजापत्ये सह धर्मं चर्यताम्' इति। मनुरपि— 'सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः' इति। बोधायनोऽपि—'आच्छाद्यालंकृत्यैषा सहधर्मं चर्यतामिति प्राजापत्यः' इति। ननु क्षत्रियाणां प्राजापत्यविवाहो न संभवति, वर्णविभागेन ब्राह्मादीनां विवाहानां धर्म्यत्वप्रशस्तत्वादिव्यवस्थां कुर्वद्भिः कैश्चिद्धर्मशास्त्रकृद्भिः प्राजापत्यव्यतिरिक्तविवाहानामेव क्षत्रियस्योक्तत्वात्। तथा हि एष्वष्टसु विवाहेषु 'षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्। विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्।

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान्कवयो विदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः' इति वचनाभ्यां ब्राह्मणस्य ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वाः धर्म्याः, क्षत्रियस्य आसुरगान्धर्वराक्षसपैशाचा धर्म्याः, विट्शूद्रयोः आसुरगान्धर्वपैशाचा धर्म्याः, ब्राह्मणस्य ब्राह्मदैवर्षिप्राजापत्याः प्रशस्ताः, राक्षसः क्षत्रियस्य, वैश्यशूद्रयोश्च आसुरः प्रशस्त इति मनुना प्रतिपादितत्वात्; बोधायनेनापि— 'तेषां चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः पूर्वः श्रेयान्' 'उत्तरेषामुत्तरोत्तरः पापीयान्' 'अत्रापि षष्ठसप्तमौ क्षत्रधर्मानुगतौ तत्प्रत्ययत्वात्क्षत्रियस्य' 'पञ्चमाष्टमौ वैश्यशूद्राणाम्' 'अयन्त्रितकलत्रा हि वैश्यशूद्रा भवन्ति' 'गान्धर्वमप्येके प्रशंसन्ति सर्वेषां स्नेहानुगतत्वात्' इति सूत्रेण ब्राह्मणस्य ब्राह्मप्राजापत्यार्षदैवाश्चत्वारो विवाहाः। तेषां पूर्वः पूर्वः श्रेयान्। क्षत्रियस्यासुरराक्षसौ द्वौ। विट्शूद्रयोस्तु गान्धर्वपैशाचौ। सर्वेषां वा गान्धर्वो विवाह इति प्रतिपादितत्वात्; तथा चैवं स्मृतिपर्यालोचनया प्राजापत्यविवाहव्यतिरिक्तानामेव प्रशस्त-

त्वधर्म्यत्वाभ्यां क्षत्रियविषयतया नियमितत्वात्, कथं क्षत्रियस्य दाशरथेः प्राजापत्यो विवाह उक्त इति चेन्न। मनुना 'पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह। पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचन' इति। अस्यार्थः— 'पञ्चानां प्राजापत्यादीनां मध्ये प्राजापत्यगान्धर्वराक्षसा धर्म्याः धर्मादनपेताः। यथोक्तालाभे चतुर्णां वर्णानां द्वावधर्म्यौ। पैशाचासुरौ न कर्तव्यौ। तत्र क्षत्रियवृत्तिस्थस्य विप्रस्य राक्षसः। अयं तु आसुरपैशाचौ शूद्रविशोः विकल्पितौ। ब्राह्मादि ब्राह्मणस्यैव' इति राघवानन्दीये पूर्वोक्तवर्णविभागेन व्यवस्थितविवाहालाभे प्राजापत्यगांधर्वराक्षसाः सर्ववर्णसाधारण्येन धर्म्या इति प्रतिपादनात् क्षत्रियस्य प्राजापत्यो विवाहः सिद्ध एवेत्युक्तम्। एवमष्टावेव विवाहान्प्रतिपाद्य, 'चत्वारो धर्म्याः प्रथमाः षडित्येके' इति सूत्रेण वर्णविभागानादरेण ब्राह्मादीनां चतुर्णां षण्णां वा विवाहानां धर्म्यत्वं प्रतिपादयद्भिर्गौतमाचार्यैः प्राजापत्यस्यापि क्षत्रियविषयेऽभ्यनुज्ञातत्वात्। तथा च मिताक्षरायां व्याख्यातम्। एवमष्टौ विवाहा

उक्ताः। तेषु चत्वारो धर्म्याः प्रथमाः आदितश्चत्वारो धर्म्याः धर्मादनपेताः प्रशस्ताः। अविशेषात्सर्वेषामेव वर्णानां षडित्येके एक आचार्या षट् धर्म्या इत्याहुः प्रथमा इत्येव। आपस्तम्बीयेऽपि— 'तेषां त्रय आद्याः प्रशस्ताः पूर्वः पूर्वः श्रेयान्' इति वर्णविभागं विना विशेषेणैव सर्वविषयत्वं प्रतिपादितम्। नन्वेवमपि क्षत्रियस्य राक्षसविवाहस्यैव प्रशस्ततया कथं प्राजापत्यः कृत इति चेन्न, युद्धकाण्डे मेघनादशरप्रहारवेदनया

ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम्।

इति वदन्तं लक्ष्मणं प्रति

नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि।

इति, उत्तरकाण्डे राजसूयाचरणे

पृथिव्यां राजवंश्यानां विनाशो यत्र दृश्यते।
सर्वेषां भविता तत्र क्षयः सर्वान्तकोपमः॥

इति वदन्तं भरतं प्रति

ध्याहृतं पुरुषव्याघ्र पृथिव्याः परिपालनम् ।
इति तस्मादभिप्रायाद्राजसूयात्क्रतूत्तमात् ॥
निवृत्तो हि महाबाहो तव सुव्याहृतेन च ।

इत्यादिवचनैः श्रीरामभद्रस्य सकललोकदयापरत्वावगमात् । 'हत्वा च्छित्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते' इति प्रसह्यादानरूपराक्षसस्य विवाहस्य अतिक्रूरकृत्यतया सकललोकदयापरेण रामेण तं परित्यज्य प्राजापत्यो विवाहः कृत इति न दोषः । ननु

वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम् ।
द्वितीयामूर्मिलां चैव त्रिर्ददामि न संशयः ॥

इत्यत्र शुल्कशब्दस्य क्रयसाधनवचनत्वात् वीर्यमेव शुल्कं क्रयसाधनीभूतं यस्या इति व्युत्पत्त्या शौर्येण सीतायाः क्रयः प्रतीयते तदनुचितम्, क्रयस्य निषिद्धत्वात् । तथा च मनुः— 'न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि । गृह्णन्हि शुल्कं लोभेन स्यान्नरो-

ऽपत्यविक्रयी' इति। बोधायनोऽपि— 'शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः। आत्मविक्रयिणः पापाः महाकिल्बिषकारकाः। पतन्ति नरके घोरे भ्रान्ति चासप्तमं कुलम्' इति। काश्यपोऽपि— 'क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवेन सावित्र्ये दासीं तां काश्यपोऽब्रवीत्'। न च क्रयश्रवणेऽपि आर्षवदनिषिद्धत्वं किं न स्यादिति वाच्यम्, आर्षविवाहस्यापि क्रयरूपतया बहुधा निषिद्धत्वात्। तथा च मनुः— 'आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत्। अल्पोऽप्ययं महान्वापि विक्रयस्तावदेव सः' इति। तस्माद्वीर्यशुल्केति प्रतिपादनमसंगतमिति चेत्, नायमार्षः येनार्षे गोमिथुनं दद्यादित्यादि निषेधो भवेत्। नाप्यासुरः कन्यापितुर्द्रव्यदानाभावात्। नाप्ययमतिरिक्तः, सर्वधर्मशास्त्रकारैर्वीर्यशुल्केन विवाहान्तरस्याकथनात्। तस्मात् 'विद्यया ब्राह्मणः श्रेष्ठो वीर्यणे क्षत्रियः स्मृतः। वैश्यस्तु धान्यधनतः शूद्रश्चैव तु जन्मतः' इति वचनेन क्षत्रियेषु वीर्यवर एव श्रेष्ठत्वात्तादृशाय कन्यां प्रदातुं वी-

र्थपरिशोधनं कृतमिति शुल्केति कथनाच्छुल्कशब्द औपचारिकः । शुल्कनिषेधवचनानि तु स्वोपजीवनाय द्रव्यपरिग्रहविषयाणि । तथा च मनुः— 'स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः । नारी यानानि वस्त्रं वा ते पापा यान्त्यधोगतिम्' । 'अत्र गाधा यमोद्गीताः कीर्तयन्ति पुराविदः । यथान्योऽपि न विक्रेयः पूरुषः किं पुनः प्रजाः ॥ यो मनुष्यो मनुष्यस्य विक्रयाद्धनमिच्छति । तस्य मूत्रं पुरीषं च स पत्रोपजीवति' । भारतेऽपि— 'यो मनुष्यः स्वकं पुत्रं विक्रयाद्धनमिच्छति । यः कन्यां वा जीवितार्थाय शुल्केन प्रयच्छति ॥ सम्प्रावरे महाघोरे निरये कालसाह्वये । स्वेदं मूत्रं पुरीषं च तस्मिन्मूढः समश्नुते' इति कन्यार्थतया वरबान्धवदत्तवस्त्राभरणादिभिः कन्यालंकारेण विना स्वार्थतया द्रव्यग्रहणात्स्वेनानुपभुक्तत्वाच्च दोषः । तथा च मनुः— 'यासां नाददते शुल्कं ज्ञातयो न स विक्रयः । अर्हणं तत्कुमारीणामानृशंस्यं प्रचक्षते' इति । एवं च स्वानुपजीवने दोषाभाव इत्युक्तं भवति । तस्मादयं प्राजापत्य एव । अयं च

विवाहः महाफलः। तथा चाश्वलायनः— 'सह धर्मं चरत इति प्राजापत्यस्तस्यां जातोऽष्टावरानष्ट परान्पुनात्युभयतः' इति। गौतमोऽपि— 'दशैव प्राजापत्यात्' इति। मन्त्रभूतं जलमित्यनेनोदकपूर्वतयैव कन्यादानं कर्तव्यमिति सूचितम्। तथा चापस्तम्बः— 'सर्वाण्युदकपूर्वाणि दानानि' इति। देवलश्च— 'पूर्वे विवाहाश्चत्वारो धर्म्यास्तोयप्रदानिकाः' इति।

प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना।

इति। अत्र चैवं व्यवस्था, सवर्णासु पाणिग्रहणमेव नियतम्। असवर्णासु तु शरप्रतोदवस्त्रदशादिग्रहणम्। तथा च मनुः— 'पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते। असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि॥ शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया। वासोदशा शूद्रया तु वर्णोत्कृष्टस्य वेदने'। क्षत्रियया गृहीतः शरः उत्कृष्टेन वरेण ग्राह्यः, न तु वरेण गृहीतः शरः कन्यया; एवं प्रतोदादिषु॥

साधु साध्विति देवानामृषीणां वदतां तदा ।
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् ॥

एवं दत्त्वा तदा सीतां मन्त्रोदकपुरस्कृताम् ।
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥

लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतामिमाम् ।
प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः ॥

तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ।
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥

शत्रुघ्नं चापि धर्मात्मा अब्रवीज्जनकेश्वरः ।
श्रुतकीर्त्या महाबाहो पाणिं गृह्णीष्व पाणिना ॥

सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ।
पत्नीभिः सन्तु काकुत्स्था मा भूत्कालस्य पर्ययः ॥

जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन् ।
चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ॥

काकुत्स्थैश्च गृहीतेषु सलिलेनैव पाणिषु ।
पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा ॥

दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिस्वनैः ।
ननृतुश्चाप्सरःसङ्घा गन्धर्वाश्च जगुः कलम् ॥

अथोपकार्यां जग्मुस्ते सभार्या रघुनन्दनाः ।
राजाप्यनुययौ पश्यन्सर्षिसङ्घः सबान्धवः ॥

चतुःसप्ततितमे— ततो दशरथजनकावामन्त्र्य कुमारांश्च रामलक्ष्मणादीनाशीर्भिः संयोज्य प्रतियाते विश्वामित्रे दशरथोऽपि जनकमामन्त्र्य पुरीं प्रतस्थे ॥

अथ राजा विदेहानां ददौ कन्याधनं बहु ।
गवां शतसहस्राणि बहूनि मिथिलेश्वरः ॥

कम्बलानां च मुख्यानां क्षौमान्कोट्यम्बराणि च ।
हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतम् ॥

ददौ कन्यापिता तासां दासीदासमनुत्तमम् ।
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥

ददौ परमसंहृष्टः कन्याधनमनुत्तमम् ॥

अनेन विवाहानन्तरं कन्यापित्रा कन्यायै गवाश्वादि बहुधनं देयमित्युक्तम् । तथा चादिपर्वणि द्रौपदीविवाहे यौतकम्— 'कृते विवाहे द्रुपदो धनं ददौ महारथेभ्यो बहुरूपमुत्तमम् । शतं रथानां वरहेममालिनां चतुर्युजां हेमखलीनशालिनाम् ॥ शतं गजानामपि पद्मिनां तथा शतं गिरीणामिव हेमशृङ्गिणाम् । तथैव दासीशतमप्ययौवनं महार्हवेषाभरणाम्बरस्रजम् ॥ पृथक्पृथक्चैव दशान्वितायुतं धनं ददौ सौमकिरग्निसाक्षिकम् । तथैव वस्त्राणि विभूषणानि प्रभावयुक्तानि महानुभावः ॥ कृते विवाहे तु ततस्तु पाण्डवाः प्रभूतरत्नामुपलभ्य तां श्रियम् । विजह्रुरिन्द्रप्रतिमा महाबलाः पुरे तु पाञ्चालनृपस्य तस्य' इति । सुभद्राविवाहे— तेषां ददौ हृषीकेशः कन्यार्थे धनमुत्तमम् । हरणं वै सुभद्राया ज्ञातिदेयं महायशाः ॥ रथानां काञ्चनाङ्गानां किङ्किणीजालमालिनाम् । चतुर्युजामुपेतानां सूतैः कुशलशिक्षितैः ॥ सहस्रं प्रददौ कृष्णो गवामयुतमेव च । श्रीमा-

न्माधुरदेश्यानां दोग्ध्रीणां पुण्यवर्चसाम् ॥ बडबानां च शुद्धानां चन्द्रांशुसमवर्चसाम् । ददौ जनार्दनः प्रीत्य सहस्रं हेमभूषणम् ॥ तथैवाश्वतरीणां च दान्तानां वातरंहसाम् । शतान्यञ्जनकेशीनां श्वेतानां पञ्च पञ्च च ॥ स्नानपानोत्सवे चैव प्रयुक्तं वयसान्वितम् । स्त्रीणां सहस्रं गौरीणां सुवेषाणां सुवर्चसाम् ॥ सुवर्णशतकण्ठीनामरोगाणां स्वलंकृताम् । परिचर्यासु दक्षाणां प्रददौ पुष्करेक्षणः ॥ पृष्ठयानामपि चाश्वानां बाह्लीकानां जनार्दनः । ददौ शतसहस्राख्यं कन्याधनमनुत्तमम् ॥ कृताकृतस्य मुख्यस्य कनकस्याग्निवर्चसः । मनुष्यभारां दाशार्हो ददौ दश जनार्दनः ॥ गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम् । गिरिकूटनिकाशानां समरेष्वनिवर्तिनाम् ॥ कल्पानां पटुघण्टानां चारूणां हेममालिनाम् । हस्त्यारोहैरुपेतानां सहस्रं साहसप्रियः ॥ रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली । प्रीयमाणो हलधरः संबन्धं प्रतिमानयन् ॥ स महाधनरत्नौघो वस्त्रकम्बलफेनवान् । महागजमहाग्राहः पताकाशैवलाकुलः ॥ पाण्डुसीरसमाविद्धः

प्रविवेश महाधनः । पूर्णमापूरयंस्तेषां द्विषच्छोकावहो-ऽभवत् ॥ प्रतिजग्राह तत्सर्वं धर्मराजो युधिष्ठिरः' इति । अत्रान्तरे हरधनुर्भङ्गश्रवणकुपितजामदग्न्यागमनसंसूचकान्यशिवानि निमित्तानि संप्रेक्ष्य भयचकितान्तःकरणेन दशरथेन

किमिदं हृदयोत्कम्पि मनो मम विषीदति ।

इति पृष्टो वसिष्ठः

उवाच मधुरां वाणीं श्रूयतामस्य यत्फलम् ।
उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्युतम् ॥

मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयम् ।
तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥

कम्पयन्मेदिनीं सर्वां पातयंश्च द्रुमाञ्शुभान् ।
तमसा संवृतः सूर्यः सर्वा न प्रबभुर्दिशः ॥

भस्मना चावृतं सर्वं संमूढमिव तद्बलम् ।
वसिष्ठो मुनयश्चान्ये राजा च ससुतस्तदा ॥

ससंज्ञा इव तत्रासन्सर्वमन्यद्विचेतनम् ।
तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥

ददर्श भीमसंकाशं जटामण्डलधारिणम् ।
भार्गवं जामदग्न्यं तं राजराजविमर्दनम् ॥

कैलासमिव दुर्धर्षं कालाग्निमिव दुःसहम् ।
ज्वलन्तमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥

स्कन्धे चासज्ज्य परशुं धनुर्विद्युद्गणोपमम् ।
प्रगृह्य शरमुख्यं च त्रिपुरघ्नं यथा हरम् ॥

ततो वसिष्ठप्रमुखाः सर्वे च परमर्षयः क्षत्रस्योत्सादनं भूयः किं चिकीर्षितमिति सभयं तमर्घ्यपाद्यादिभिरभ्यर्चयामासुः ।

प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् ।
रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥

पञ्चसप्ततितमे— ततस्त्वत्कृतधनुर्भङ्गश्रवणजनितविस्मयः वैष्णवधनुषः पूरणे ज्ञानबलोऽहं द्वन्द्वयुद्धं ते दा-

स्यामीति जानकीनायकं प्रति जल्पन्तं जामदग्न्यं क्षत्र-रोषात्प्रशान्तः सन् इतः परं शस्त्रं न गृहिष्यामीति सह-स्राक्षसंनिधौ प्रतिज्ञापूर्वकं शस्त्रं निक्षिप्य काश्यपाय च दत्त्वा वसुधाम् उग्रे तपसि वर्तमानः कथं पुनर्मत्कुल-विनाशाय संप्राप्तवानिति दशरथः समभाषत । जाम-दग्न्योऽपि अनादृत्य दशरथमुदीरितवचनं राममेवा-भ्यभाषत; पुरा खलु विष्णुशितिकण्ठयोर्बलाबलं जि-ज्ञासमानैर्देवैः प्रार्थितेन ब्रह्मणा दक्षयज्ञवधे समुत्पादित-परस्परविरोधयोर्विश्वकर्मनिर्मितधनुषी आदाय परस्पर-जयैषिणोः प्रवृत्ते युद्धे शितिकण्ठो विष्णुहुंकारेण भग्न-शरासनोऽभूत् ॥

जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ।
अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तदा ॥

अनेन शिवाद्विष्णोरुत्कर्षः प्रतिपादितः । अयमेवार्थः विष्णुपुराणे कृष्णबाणासुरयुद्धे प्रतिपादितः । तथा हि— 'ततः समस्तसैन्येन दैतेयानां बलेः सुतः । युयुधे शंक-

रश्चैव कार्त्तिकेयश्च शौरिणा ॥ हरिशंकरयोर्युद्धमतीवा-
सीत्सुदारुणम् । जृम्भणास्त्रेण गोविन्दो जृम्भयामास
शंकरम् ॥ जृम्भाभिभूतस्तु हरो रथोपस्थ उपाविशत् ।
न शशाक तदा योद्धुं कृष्णेनाक्लिष्टकर्मणा ॥ जृम्भिते
शंकरे नष्टदैत्यसैन्ये गते गुहे । नष्टप्रमथसैन्ये च संक्षयं
शार्ङ्गधन्वना ॥ नन्दीशसंगृहीताश्वमधिरूढो महारथम् ।
बाणस्तत्र ययौ योद्धुं कृष्णकार्ष्णिबलैः सह ॥ ततोऽर्क-
शतसंघाततेजसा सदृशद्युतिः । जग्राह दैत्यचक्रारिर्हरि-
श्चक्रं सुदर्शनम् ॥ मुञ्चतो बाणनाशाय तच्चक्रं मधुवि-
द्विषः ॥ मुमोच बाणमुद्दिश्य च्छेत्तुं बाहुवनं रिपोः ।
क्रमेण तत्तु बाहूनां बाणस्याच्युतचोदितम् ॥ भेदं चक्रे
सुरेशास्त्रं शस्त्रौघक्षपणादृतम् । भिन्ने बाहुवने तत्तु करस्थं
मधुसूदनः ॥ मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा ।
सहोपेत्याह गोविन्दं सान्त्वपूर्वमुमापतिः ॥ विलोक्य बाणं
दोर्दण्डभेदासृक्स्रावविर्षिणम् । शंकर उवाच— कृष्ण
कृष्ण जगन्नाथ जाने त्वां पुरुषोत्तमम् । परेशं परमात्मा-
नमनादिनिधनं परम् ॥ देवतिर्यङ्मनुष्येषु शरीरग्रहणा-

त्मिका। लीलेयं सर्वभूतस्य तव चेष्टोपलक्षणा॥ तत्प्रसी-
दाभयं दत्तं बाणस्यास्य मया प्रभो। तत्त्वया नानृतं कार्यं
यन्मया व्याहृतं वचः॥ अस्मत्संश्रयदृप्तोऽयमपराधी
तवाच्युत। मया दत्तवरो दैत्यस्ततस्त्वां क्षमयाम्यहम्॥
पराशरः— इत्युक्तः प्राह गोविन्दः शूलपाणिमुमाप-
तिम्। प्रसन्नवदनो भूत्वा गतामर्षोऽसुरं प्रति॥ युष्मद्-
त्तवरो बाणो जीवतामेष शंकर। त्वद्वाक्यगौरवादेतन्मया
चक्रं निवर्तितम्॥ त्वया यदभयं दत्तं तदत्तमखिलं मया'
इति विष्णुपराक्रमेण शिवस्य जृम्भणप्रतिपादनात्। तथा
हरिवंशेऽपि— 'त्रिपुरान्तकरं बाणं जग्राह स चतुर्मुखम्।
संदधत्कार्मुके चैव क्षेप्तुकामस्त्रिलोचनः॥ विज्ञातो वासु-
देवेन चित्तज्ञेन महात्मना। जृम्भणं नाम सोऽप्यस्त्रं
जग्राह मधुसूदनः॥ हरं स जृम्भयामास क्षिप्रकारी
महाबलः। सशरः सधनुश्चैव हरस्तेनाशु जृम्भितः॥
संज्ञां न लेभे भगवान्विजेता सुररक्षसाम्। सशरं सध-
नुष्कं च दृष्ट्वात्मानं विजृम्भितम्॥ ततो ननाद भूतात्मा
स्निग्धगम्भीरनिस्वनः। दृष्ट्वा तु भगवान्ब्रह्मा रुद्रं वचन-

मब्रवीत्। सृष्टो महासुरविधः किं भूयः परिरक्षसे। न च युद्धं महाबाहो तव कृष्णेन रोचते' इति विष्णुप्रहितः जृम्भणास्त्रेण शिवस्य जृम्भितत्वप्रतिपादनाद्विष्णुरेवाधिक-पूज्यश्च, शिवस्तद्भक्ताग्रेसरः पूजकश्चेति केचिदाहुः। अयमर्थः सर्वपुराणेषु प्रसिद्धः विस्तरभयान्न लिखितः। अन्ये तु

श्रीमतो नीलकण्ठस्य कृत्यं हि दुरतिक्रमम्॥

इत्युत्तररामायणे रामवचनेन

अत्र पूर्वं महादेवः प्रसादमकरोत्प्रभुः॥

इति युद्धकाण्डे प्रतिप्रयाणे रामवचनेन च शिव एव विष्णोरधिकः। अयं चार्थः द्रोणपर्वणि शतरुद्रीये—अश्वत्थामा सेनासहितकृष्णार्जुनवधाय प्रयुक्तं नारायणास्त्रं मोघं दृष्ट्वा रथादाप्लुत्य धिग्धिगित्युक्त्वा गच्छन्मध्ये-मार्गे यदृच्छया यान्तं व्यासं दृष्ट्वा कथमेतादृशमस्त्रं मोघमभवादिति पप्रच्छ। व्यासः—'महान्तमिममर्थं मां यत्त्वं पृच्छसि विस्मयात्। तं प्रवक्ष्यामि ते सर्वं

समाधाय मनः शृणु'। पुरा किल केनचित्कारणेन नारायणः धर्मस्य पुत्रो भूत्वा तुहिनगिरौ बहुवर्षसहस्राणि तपश्चरन् तपसा प्राप्तब्रह्मभावोऽभूत्। 'ततो विश्वेश्वरं योनिं विश्वस्य जगतः पतिम्। ददर्श भृशदुर्दर्शं सर्वदेवेशमीश्वरम्। अणीयांसमणुभ्यश्च बृहद्भ्यश्च महत्तरम्। रुद्रमीशानं वृषभं हरं शंभुं कपर्दिनम्। चेकितानं परां योनिं तिष्ठतो गच्छतश्च ह। दुर्वारणं दुर्दर्शं तिग्ममन्युं महात्मानं सर्वहरं प्रचेतसम्। दिव्यं चापमिषुधी चाददानं हिरण्यवर्माणमनन्तवीर्यम्॥ पिनाकिनं वज्रिणं दीप्तशूलं परश्वधिनं गदिनं स्वायतासिम्। यं पश्यन्ति ब्राह्मणाः साधुवृत्ताः क्षीणे पापे मनसा यं विशोकाः॥ तं निष्टपन्तं तपसा धर्ममीड्यं तद्भक्त्या वै विश्वरूपं ददर्श। दृष्ट्वा चैनं वाङ्मनोबुद्धिदेहैः संहृष्टात्मा मुमुदे वासुदेवः॥ ततो नारायणो देवं ववन्दे विश्वतोभवम्। मुमुदे पृथुचार्वङ्ग्या पार्वत्या सहितं प्रभुम्॥ अजमीशानमव्यग्रं कारणात्मानमच्युतम्। अभिवाद्याथ रुद्राय सद्योऽन्धकनिपातिने॥ पद्माक्षस्तं

विरूपाक्षमभितुष्टाव भक्तिमान् । नारायणः— 'त्वत्सं-
भूता भूतकृतो वरेण्य गोप्तारोऽस्य भुवनस्यादिदेव ।
आविश्येमां धरणीं येऽभ्यरक्षन्पुरा पुराणीं तव देव
दृष्टिम् ॥ ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं पैत्रं त्वाष्ट्रं कर्म
सौम्यं च तुभ्यम् । रूपं ज्योतिः शब्दमाकाशो वायुः
स्पर्शः स्वाद्यः सलिलं गन्ध उर्वी ॥ कालो ब्रह्मा ब्रह्म
च ब्राह्मणाश्च त्वत्संभूतस्थास्तु सरिन्मुचेदम् । भूतं भव्यं
भविता चाप्रधृष्यं त्वत्संभूता भुवनानीह विश्वा । भक्तं
च मां भजमानं भजस्व मा रीरिषो मामहिताहितेन । अ-
स्तौषं त्वां तव संमानमिच्छन्विचिन्वन्वै सदृशं देव-
वर्यम् ॥ सुदुर्लभान्देहि वरान्ममेष्टानभिष्टुतः प्रविकार्यश्च
मायाम् ॥ व्यासः— 'तस्मै वरानचिन्त्याय नीलकण्ठः
पिनाकधृक् । अर्हते वासुदेवाय प्रायच्छदृषिसंसुतः ॥
श्रीभगवानुवाच— मत्प्रसादान्मनुष्येषु देवगन्धर्वयोनिषु ।
अप्रमेयबलात्मा च नारायण भविष्यसि ॥ न च त्वां प्रस-
हिष्यन्ति देवासुरमहोरगाः । न सुपर्णास्तथा नागा न
च विश्वे वियोनिजाः ॥ न कश्चित्त्वां तु देवोऽपि समरेषु

विजेष्यति । न शस्त्रेण न वज्रेण नाग्निना न च वायुना ॥ न चार्द्रेण न शुष्केण चरेण स्थावरेण च । कश्चित्तव रुजां कर्ता मत्प्रसादात्कथंचन ॥ अपि चेत् समरं गत्वा भविष्यसि समाधिकः । एवमेते पुरा लब्धा वरास्ते विद्धि शौरिणा ॥ स एष देवश्चरति मायया मोहयञ्जगत् । तस्यैव तपसो जातं नरं नाम महामुनिम् ॥ तुल्यमेतेन देवेन त्वं जानीह्यर्जुनं सदा । तावेतौ पूर्वदेवानां परमोपचितावृषी ॥ लोकयात्राविधानार्थं संजायेते युगे युगे । तथैव कर्मणा तूर्णं महतस्तपसोऽपि वा ॥ तेजो मन्युं च विभ्रंस्त्वं जातो रौद्रो महामुने । स भवान्देववत्प्राज्ञो ज्ञात्वा भवमयं जगत् ॥ अनाकर्षस्त्वमात्मानं नियमैस्तत्प्रियेच्छया ॥ शुद्धमन्त्रं हविः कृत्वा महापुरुषविग्रहम् ॥ ईजिवांस्त्वं जपैर्होमैरुपहारैश्च मानद ॥ स तथा पूज्यमानस्ते पूर्वदेहेऽप्यतूतुषत् । पुष्कलांश्च वरान्प्रादात्तव विद्वान्हृदि स्थितान् ॥ जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः । ताभ्यां लिङ्गेऽर्चितो देवस्त्वयार्च्यायां युगे युगे ॥ स एष रुद्रभक्तश्च केशवो रुद्रसंभवः । सर्व-

रूपं भवं ज्ञात्वा लिङ्गमर्चयति प्रभुम् ॥ आत्मयोगाश्च तस्मिन्वै शास्त्रयोगाश्च शाश्वताः । एतमेवाजयन्देवाः सिद्धाश्च परमर्षयः ॥ प्रार्थयन्ति परं लोके स्थाणुमेकं स सर्वकृत् । कृष्ण एव हि यष्टव्यो यज्ञैश्चैव सनातनः ॥ सर्वभूतभवं ज्ञात्वा लिङ्गमर्चति यः प्रभुम् । तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥ तस्य तद्वचनं श्रुत्वा द्रोणपुत्रो महारथः । नमश्चकार रुद्राय बहुमेने न केशवम् ॥ हृष्टरोमा च वश्यात्मा नमस्कृत्य महर्षये । संग्रामेऽन्यहनच्छत्रूञ्शरौघैर्विमलैरहम् । अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥ ज्वलन्तं शूलमुद्यम्य यां दिशं प्रतिपद्यते । तस्यां दिशि विशीर्यन्ते शत्रवो मे महामुने ॥ तेन भग्नानरीन्सर्वान्मद्भग्नान्मन्यते जनः । तेन भग्नानि सैन्यानि पृष्ठतो ननु हन्म्यहम् ॥ भगवंस्तं ममाचक्ष्व को वै स पुरुषोत्तमः । शूलपाणिर्मया दृष्टस्तेजसा सूर्यसंनिभः ॥ न पद्भ्यां स्पृशते भूमिं शूलं न च विमुञ्चति । शूलाच्छूलसहस्राणि निपेतुस्तस्य तेजसा ॥

व्यासः— प्रजापतीनां प्रथमं तेजसां प्रथमं प्रभुम् ।

भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुम् ॥ ईशानं वरदं पार्थ दृष्टवानसि शंकरम्। तं गच्छ शरणं देवं वरदं भुवनेश्वरम् ॥ महादेवं महात्मानमीशानं जटिलं शिवम्। त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससम् ॥ महादेवं वरं स्थाणुं वरदं भुवनेश्वरम् । जगत्प्रधानमधिकं जगत्प्रीतिमधीश्वरम् ॥ जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् । विश्वात्मानं विश्वसृजं विश्वमूर्तिं यशस्विनम् ॥ विश्वेश्वरं विश्ववरं कर्मणामीश्वरं प्रभुम् । शंभुं स्वयंभुं भूतेशं भूतभव्यभवोद्भवम् ॥ योगं योगेश्वरं शर्वं सर्वलोकेश्वरेश्वरम् । सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनम् ॥ लोकत्रयविधातारमेकं लोकत्रयाश्रयम् । सुदुर्जयं जगन्नाथं जन्ममृत्युजरातिगम् ॥ ज्ञानात्मानं ज्ञानगम्यं ज्ञानिश्रेष्ठं सुदुर्विदम् । दातारं चैव भक्तानां प्रसादविहितान्वरान् ॥ तस्य पारिषदा दिव्या रूपैर्नानाविधैर्विभोः । वामना जटिला मुण्डा ह्रस्वग्रीवा महोरगाः ॥ महाकाया महोत्साहा महाकर्णास्तथापरे । आननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः ॥ ईदृशः स महादेवः

पूज्यमानो महेश्वरः। स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः ॥ तस्मिन्घोरे सदा पार्थ संग्रामे रोमहर्षणे। द्रोणकर्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः ॥ कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत्। ऋते देवान्महेष्वासाद्वृषरूपान्महेश्वरात्॥ स्थातुमुत्सहते कश्चिन्न तस्मिन्नग्रतः स्थिते। न हि भूतं समं तेन त्रिषु लोकेषु विद्यते ॥ गन्धेनापि हि संग्रामे यस्य क्रुद्धस्य शत्रवः। विसंज्ञा हतभूयिष्ठा वेपन्ति च पतन्ति च ॥ तस्मै नमस्तु कुर्वन्तो देवास्तिष्ठन्ति वै दिवि। ये चान्ये मानवा लोके ये च स्वर्गजितो नराः ॥ ये भक्ता वरदं देवं शिवं रुद्रमुमापतिम्। इह लोके सुखं प्राप्य ते यान्ति परमां गतिम् ॥ नमस्कुरुष्व कौन्तेय तस्मै शान्ताय वै सदा। रुद्राय शितिकण्ठाय कनिष्ठाय सुवर्चसे ॥ कपर्दिने करालाय हर्यक्षवरदाय च। याम्यायाव्यक्तकेशाय सहते शंकराय च ॥ काम्याय हरिनेत्राय स्थाणवे पुरुषाय च। भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥ बहुरूपाय सर्वाय प्रियाय प्रियवादिने। सोष्णीषाय सुचक्राय सहस्राक्षाय मीढुषे ॥ हिरण्य-

बाणचीराय उग्राय पतये दिशाम्। पर्जन्यपतये चैव भूतानां पतये नमः॥ वृषाणां पतये चैव गवां च पतये तथा। वृक्षैरावृतकामाय सेनान्ये मध्यमाय च॥ स्रुव-हस्ताय देवाय धन्विने भार्गवाय च। बहुरूपाय विश्वस्य पतये मुञ्जवाससे॥ सहस्रशिरसे चैव सहस्रनयनाय च॥ सहस्रबाहवे चैव सहस्रचरणाय च॥ शरणं गच्छ कौन्तेय वरदं भुवनेश्वरम्। उमापतिं विरूपाक्षं दक्षयज्ञ-निबर्हणम्॥ प्रजानां पतिमत्युग्रं भूतानां पतिमव्ययम्॥ कपर्दिनं वृषावर्तं वृषनाभं वृषध्वजम्॥ वृषदर्पं वृषपतिं वृषशृङ्गं वृषर्षभम्। वृषाङ्कं वृषभोदारं वृषभं वृषभेक्षणम्॥ वृषायुधं वृषशरं वृषभूतं महेश्वरम्। महोदरं महाकायं द्वीपिचर्मनिवासिनम्॥ लोकेशं वरदं मुण्डं ब्रह्मण्यं ब्राह्म-णप्रियम्। त्रिशूलपाणिं वरदं खड्गचर्मधरं शुभम्॥ पिनाकिनं खड्गधरं लोकानां पतिमीश्वरम्। प्रपद्ये देवमीशानं शरण्यं चीरवाससम्॥ नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा। सुवाससे नमो नित्यं सुव्रताय सुधन्विने॥ धनुर्धराय देवाय प्रियधन्वाय धन्विने। धन्वन्तराय

धनुषे धन्वाचार्याय ते नमः ॥ उग्रायुधाय देवाय नमः सुखकराय च । नमोऽस्तु बहुरूपाय नमस्ते बहुधन्विने ॥ नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः । वनस्पतीनां पतये नराणां पतये नमः ॥ अपां च पतये नित्यं यज्ञानां पतये नमः । पूषदन्तविनाशाय त्र्यक्षाय वरदाय च ॥ हराय नीलकण्ठाय स्वर्णकेशाय वै नमः । कर्माणि यानि दिव्यानि महादेवस्य धीमतः ॥ तानि ते कीर्तयिष्यामि यथाप्रज्ञं यथाश्रुतम् । न सुरा नासुरा लोके न गन्धर्वा न राक्षसाः ॥ सुखमेधन्ति कुपिते तस्मिन्नपि गुहागताः । दक्षस्य यजमानस्य विधिवत्संभृतं पुरा ॥ विव्याध कुपितो यज्ञं निर्दयस्त्वभवत्तदा । धनुषा बाणमुत्सृज्य सघोषं विननाद च । तेन शर्म कुतः शान्तिं लेभिरे स्म सुरास्तदा ॥ विद्युते सहसा यज्ञे कुपिते च महेश्वरे ॥ तेन ज्यातलघोषेण सर्वे देवाः समाकुलाः । बभूवुर्वशगाः पार्थ निपेतुश्च सुरासुराः ॥ आपश्चुक्षुभिरे सर्वाश्चकम्पे च वसुंधरा । पर्वताश्च व्यशीर्यन्त दिशो नागाश्च मोहिताः ॥ अन्धेन तमसा लोका न प्राकाशन्त संवृताः । जघ्नि-

वान्सह सूर्येण सर्वेषां ज्योतिषां प्रभाम् ॥ चुक्षुभुर्भय-भीताश्च शान्ति चक्रुस्तथैव च । ऋषयः सर्वभूतानामात्मनश्च सुखैषिणः ॥ पूषाणमभ्यद्रवत शंकरः प्रहसन्निव । पुरोडाशं भक्षयतो दशनान्वै व्यशातयत् ॥ ततो निश्चक्रमुर्देवा वेपमाना नताः स्म तम् । पुनश्च संदधे दीप्तान्देवानां निशिताञ्शरान् ॥ सधूमान्सस्फुलिङ्गांश्च विद्युत्तोयदसंनिभान् । तं दृष्ट्वा तु सुराः सर्वे प्रणिपत्य महेश्वरम् ॥ रुद्रस्य यज्ञभागं च विशिष्टं ते त्वकल्पयन् । भयेन त्रिदशा राजन् शरणं च प्रपेदिरे ॥ तेन चैवातिकोपेन स यज्ञः संधितस्तदा । भग्नाश्चापि सुरा आसन्भीताश्चापातितं प्रति ॥ असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि । आयसं राजतं चैव सौवर्णं परमं महत् ॥ सौवर्णं कमलाक्षस्य तारकाक्षस्य राजतम् । तृतीयं तु परं तेषां विद्युन्मालिन आयसम् । न शक्तस्तानि मघवा भेत्तुं सर्वायुधैरपि ॥ अथ सर्वे सुरा रुद्रं जग्मुः शरणमर्दिताः । ते तमूचुर्महात्मानं सर्वे देवाः सवासवाः ॥ ब्रह्मदत्तवरा ह्येते घोरास्त्रिपुरवासिनः ।

पीडयन्ति वरं लोकं यस्मात्ते वरदर्पिताः ॥ त्वदृते देव देवेश नान्यः शक्तः कथंचन । हन्तुं दैत्यान्महादेव जहि तांस्त्वं सुरद्विषः ॥ रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु । न पातयिष्यसे चैत्रानसुरान्भुवनेश्वर ॥ स तथोक्तस्तथेत्युक्त्वा देवानां हितकाम्यया । गन्धमादन-विन्ध्यौ च कृत्वा वंशध्वजौ हरः ॥ पृथ्वीं स सागरवनां रथं कृत्वा च शंकरः । अक्षं कृत्वा तु नागेन्द्रं शेषं कृत्वा त्रिलोचनः ॥ चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक् । तूणीकृत्वैलपत्रं च पुष्पदन्तं च त्र्यम्बकः ॥ यूपं कृत्वा तु मलयमवनाहं च तक्षकम् । योक्राङ्गानि च सत्त्वानि कृत्वा शर्वः प्रतापवान् ॥ वेदान्कृत्वाथ चतुर-श्चतुरोऽश्वान्महेश्वरः । उपवेदान्खलीनांश्च कृत्वा लोक-त्रयेश्वरः ॥ गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः । कृत्वोंकारं प्रतोदं च ब्रह्माणं चैव सारथिम् ॥ गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम् । विष्णुं सर्वोत्तमं कृत्वा शल्यमग्निं तथैव च । वायुं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम् ॥ विद्युत्कृत्वाथ निस्त्राणं मेरुं कृत्वाथ वै

ध्वजम् । आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः ॥ त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः । असुराणामन्तकरः श्रीमानतुलविक्रमः ॥ स्तूयमानः सुरैः पार्थ ऋषिभिश्च तपोधनैः । स्थानं माहेश्वरं कृत्वा दिव्यास्त्रप्रतिमं विभुः ॥ अतिष्ठत्स्थाणुभूतः स सहस्रं परिवत्सरान् । यदा त्रीणि समेतानि अन्तरिक्षे पुराणि च ॥ त्रिपर्वणा त्रिशल्येन तथा तानि बिभेद सः । पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम् ॥ शरं कालाग्निसंयुक्तं विष्णुसोमशिवायुतम् । पुराणि दग्धवन्तं तं देवी याता प्रवीक्षितुम् ॥ बालमङ्कगतं कृत्वा स्वयं पञ्चशिखं पुनः । उमा जिज्ञासमाना वै कोऽयमित्यब्रवीत्सुरान् ॥ असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः । बाहुं स वज्रं तं तस्य क्रुद्धस्यास्तम्भयत्प्रभुः ॥ प्रहस्य भगवांस्तूर्णं सर्वलोकेश्वरो विभुः । ततः संस्तम्भितभुजः शक्रो देवगणैर्वृतः ॥ जगाम ससुरस्तूर्णं ब्रह्माणं प्रभुमव्ययम् । ते तं प्रणम्य शिरसा प्रोचुः प्राञ्जलयस्तदा ॥ किमप्यङ्कगतं ब्रह्म पार्वत्या भूतमद्भुतम् । बालरूपधरं दृष्ट्वा नास्माभिरभिवा-

दितः । तस्मात्त्वां प्रष्टुमिच्छामो निर्जिता येन वै वयम् ॥ अयुध्यता हि बालेन लीलया स पुरंदरः । तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदां वरः । ध्यात्वा स शंभुं भगवान्बालं चामिततेजसम् । उवाच भगवान्ब्रह्मा शक्रादींश्च सुरोत्तमान् । चराचरस्य जगतः प्रभुः स भगवान्हरः । तस्मात्परतरं नान्यत्किंचिदस्ति महेश्वरात् । यो दृष्टो ह्युमया सार्धं युष्माभिरमितद्युतिः । स पार्वत्याः कृते देवाः कृतवान्बालरूपताम् ॥ ते मया सहिता यूयं प्रपद्यध्वं तमेव हि । स एष भगवान्देवः सर्वलोकेश्वरः प्रभुः ॥ न संबुबुधिरे चैनं देवास्तं भुवनेश्वरम् । स प्रजापतयः सर्वे बालार्कसदृशप्रभम् ॥ अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा च स महेश्वरम् । अयं श्रेष्ठ इति ज्ञात्वा ववन्दे स पितामहः ॥ ब्रह्मोवाच— त्वं यज्ञो भुवनस्यास्य त्वं गतिस्त्वं परायणम् । त्वं भवस्त्वं महादेवस्त्वं धाम परमं पदम् ॥ त्वया सर्वमिदं व्याप्तं जगत्स्थावरजङ्गमम् । भगवन्भूतभव्येश लोकनाथ जगत्पते ॥ प्रसादं कुरु शक्रस्य त्वया क्रोधार्दितस्य वै । व्यासः— पद्मयोनेर्वचः श्रुत्वा

ततः प्रीतो महेश्वरः ॥ प्रसादाभिमुखो भूत्वा अट्टहासमथाकरोत् । ततः प्रसादयामासुरुमां चन्द्रं च ते सुराः ॥ अभवच्च पुनर्बाहुः प्रकृतिस्थो हि वह्निनः ॥ तेषां प्रसन्नो भगवान्सपत्नीको वृषध्वजः । देवानां त्रिदशश्रेष्ठो दक्षयज्ञविनाशनः ॥ स वै रुद्रः स च शिवः सोऽग्निः सर्वः स सर्ववित् । स चेन्द्रश्चैव वायुश्च सोऽश्विनौ च स विद्युतः ॥ स भवः स च पर्जन्यो महादेवः स चानघः । स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः ॥ स कालः सोऽन्तको मृत्युः स यमो रात्र्यहानि च । मासार्धमासा ऋतवः संध्ये संवत्सराणि च ॥ धाता च स विधाता च विश्वात्मा विश्वकर्मकृत् । सर्वासां देवतानां च धारयत्यवपुर्वसुः ॥ सर्वदेवैः स्तुतो देवः सैकधा बहुधा च सः । सहस्रधा शतधा चैव तथा शतसहस्रधा ॥ द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः । घोरा चान्या शिवा चान्या ते तनू बहुधा पुनः ॥ घोरा तु या तनुस्तस्य सोऽग्निर्विष्णुः स भास्करः । सौम्या तु पुनरेवास्य आपो ज्योतींषि

चन्द्रमाः ॥ वेदाङ्गाः सोपनिषदः पुराणाध्यात्मनिश्रयाः । यदत्र परमं गुह्यं स वै देवो महेश्वरः ॥ ईदृशश्च महादेवो भूयांश्च भगवानतः । न हि सर्वे मया शक्या वक्तुं भगवतो गुणाः ॥ अपि वर्षसहस्रेण सततं पाण्डुनन्दन । सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् ॥ स मोचयति सुप्रीतः शरण्यः शरणागतान् । आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् ॥ स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः । सेन्द्रादिषु च देवेषु तस्यैवैश्वर्यमुच्यते ॥ स चैव व्यापृतो लोके मनुष्याणां शुभाशुभे । ऐश्वर्याच्चैव कामानामीश्वरश्च स उच्यते ॥ महेश्वरश्च भूतानां महतामीश्वरश्च सः । बहुभिर्बहुधा रूपैर्विश्वं व्याप्नोति वै जगत् ॥ तस्य देवस्य यद्वक्त्रं समुद्रे तदधिष्ठितम् । बडवामुखेति विख्यातं पिबत्तोयमयं हविः ॥ एष चैव श्मशानेषु रुद्रो वसति नित्यशः । यजत्येनं जनास्तत्र वीरस्थान इतीश्वरम् ॥ अन्य दीप्तानि रूपाणि घोराणि च बहूनि च । लोके यान्यस्य पूज्यन्ते मनुष्याः प्रवदन्ति च ॥ नामधेयानि लोकेषु

बहून्यस्य यथार्थवत् । निरुच्यन्ते महत्त्वाच्च विभुत्वात्कर्मणस्तथा ॥ वेदे चान्यसमाख्यातं शतरुद्रीयमुत्तमम् । नाम्ना चानन्तरुद्रेति ह्युपस्थानं महात्मनः । सकामानां प्रभुर्दिव्यो ये दिव्या ये च मानुषाः ॥ स विभुः स प्रभुर्देवो विश्वं व्याप्नोति वै महत् । ज्येष्ठं भूतं वदन्त्येनं ब्राह्मणा मुनयस्तथा ॥ प्रथमो ह्येव देवानां मुखादस्यानलोऽभवत् । सर्वथा यत्पशून्पाति तैश्च यद्रमते पुनः ॥ तेषामधिपतिर्यश्च तस्मात्पशुपतिः स्मृतः । दिव्यं च ब्रह्मचर्येण लिङ्गमस्य यथा स्थितम् ॥ महयत्येष लोकांश्च महेश्वर इति स्थितः । ऋषयश्चैव देवाश्च गन्धर्वाप्सरसस्तथा ॥ लिङ्गमस्यार्चयन्ति स्म तच्चाप्यूर्ध्वं समास्थितम् । पूज्यमाने ततस्तस्मिन्मोदते च महेश्वरः ॥ स्वयं प्रीतश्च भवति प्रहृष्टश्चैव शंकरः । यदस्य बहुधा रूपं भूतं भव्यमवस्थितम् । स्थावरं जङ्गमं चैव बहुरूपस्ततः स्मृतः । एकाक्षो जाज्वलन्नास्ते सर्वतोऽक्षिमयोऽपि वा ॥ क्रोधाद्यचाविशल्लोकात्तस्मात्सर्व इति स्मृतः । धूम्ररूपं च यत्तस्य धूर्जटिस्तेन चोच्यते ॥ विश्वे देवाश्च यस्तस्मिन्विश्वरू-

पस्ततः स्मृतः । समेधयति यन्नित्यं सर्वार्थान्सर्वक-
र्मसु ॥ शिवमिच्छन्मनुष्याणां तस्मादेष शिवः स्मृतः ।
सहस्राक्षोऽयुताक्षो वा सर्वतोऽक्षिमयोऽपि वा ॥ यच्च
विश्वं महत्पाति महादेवस्ततः स्मृतः । तिस्रो देवी-
र्यदा चैव भजते भुवनेश्वरः ॥ द्यामपः पृथिवीं चैव
त्र्यम्बकश्च ततः स्मृतः । महत्पूर्वस्थितो यश्च प्राणो-
त्पत्तेः स्थितश्च यत् ॥ स्थितलिङ्गश्च यन्नित्यं तस्मात्स्था-
णुरिति स्मृतः । सूर्याचन्द्रमसोर्लोके प्रकाशन्ते रुच-
श्च याः ॥ ताः केशसंज्ञितास्त्र्यक्षे व्योमकेशस्ततः
स्मृतः । कपिश्रेष्ठ इति प्रोक्तो धर्मश्च वृष उच्यते ॥ स
देवदेवो भगवान्कीर्त्यतेऽस्माद्वृषाकपिः । ब्रह्माणमिन्द्रं
वरुणं यमं धनदमेव च ॥ निगृह्य हरते यस्मात्तस्मा-
द्धर इति स्मृतः । निमीलिताभ्यां नेत्राभ्यां बलादेवो
महेश्वरः ॥ ललाटे नेत्रमसृजत्तेन त्र्यक्षः स उच्यते ।
विषमस्थः शरीरेषु समश्च प्राणिनामिह ॥ स वायुवि-
षमस्तेषु प्राणापानः शरीरिषु । पूजयेद्विग्रहं यस्तु लिङ्गं
चापि समर्चयेत् ॥ लिङ्गं पूजयिता नित्यं महतीं श्रियम-

श्नुते । ऊरुभ्यामर्धमाग्नेयं सोमार्धं च शिवा तनुः ॥ आत्मनोऽर्धं तथा चाग्निः सोमार्धं पुनरुच्यते । तैजसी महती दीप्ता दैवी यास्य शिवा तनुः ॥ भास्वती मानुषेष्वस्य तुनुर्घोराग्निरुच्यते । ब्रह्मचर्यं चरत्येष शिवायास्य तनुस्तथा ॥ यास्य घोरतरा मूर्तिः सर्वानतिमहेश्वरः । यान्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् ॥ मांसशोणितमज्जादो यत्ततो रुद्र उच्यते । एष देवो महादेवो योऽसौ पार्थ तवाग्रतः ॥ सततं शात्रवान्निघ्नंस्त्वया दृष्टः पिनाकधृक् । सिन्धुराजवधार्थाय प्रतिज्ञाय त्वयानघ ॥ कृष्णेन दर्शितः स्वप्ने यस्तु शैलेन्द्रमूर्धनि । एष वै भगवान्देवः संग्रामे याति तेऽग्रतः ॥ तेन दत्तानि चास्त्राणि यैस्तया दानवा हताः । धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च संमितम् ॥ देवदेवस्य ते पार्थ व्याख्यातं शतरुद्रियम् । सर्वार्थसाधकं पुण्यं सर्वकिल्बिषनाशनम् ॥ सर्वपापप्रशमनं सर्वदुःखविनाशनम् ॥ चतुर्विधमिदं स्तोत्रं यः शृणोति नरः सदा ॥ विजित्य सर्वाञ्शत्रून्स रुद्रलोके महीयते । चरितं महा-

त्मनो दिव्यं सांग्रामिकमिदं शुभम् ॥ पठन्वै शतरुद्रीयं शृण्वंश्च सततोत्थितः । भक्तो विश्वेश्वरं देवं मानुषेषु च यः सदा ॥ वरान्स कामाल्लँभते प्रसन्ने त्र्यम्बके नरः । गच्छ युध्यस्व कौन्तेय न तवास्ति पराजयः ॥ यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्दनः । संजयः— एवमुक्त्वार्जुनं संख्ये पराशरसुतस्तदा ॥ जगाम भरतश्रेष्ठ यथागतमरिंदम' इति शतरुद्रीये कृष्णस्य तपःप्रसादितपरमेश्वरवरलब्धमेव माहात्म्यमिति प्रतिपादनेन, अर्जुनं प्रति सकलधार्तराष्ट्रानीकवधः त्वदभ्रयायित्रिशूलधारिपरमेश्वरकृत एवेति व्यासवचनेन, दक्षयज्ञविध्वंसनत्रिपुरदहननरेन्द्रहस्तस्तम्भप्रतिपादनेन च, शिव एव उत्कृष्ट इति प्रतिपादितम् । तथा द्रोणपर्वणि जयद्रथवधे— अर्जुनस्तु अभिमन्युवधजनितामर्षेण श्वोभूतेऽनस्तमित एव भगवति सहस्ररश्मौ जयद्रथं वधिष्यामि न चेदग्निं प्रवेक्ष्यामीति प्रतिज्ञां कृत्वा नैत्यकनैशशिवपूजार्थमुपाविशत् । 'ततः स्पृष्टोदके पार्थे विनीताः परिचारिकाः । दर्शयन्तोऽन्तिके चक्रुर्नैशं त्रैयम्बकं बलिम् ॥ ततः

प्रीतमनाः पार्थो गन्धमाल्यैश्च माधवम् । अलंकृत्योपहारं तं नैशं तस्मै न्यवेदयत्' । ततस्तेनानेकबलपरिवृतं जयद्रथमशक्यवधमवलोक्य पृष्टः श्रीकृष्णः उदकमुपस्पृश्य ध्यानावगततद्वधोपायः परमेश्वरप्रसादलब्धपाशुपतास्त्रस्त्वं स्वोभूते जयद्रथं हन्तासीत्यवादीत् । ततः कृष्णेनोपदिष्टोपायोऽर्जुन उपस्पृश्योदकमुपविश्यासने ध्यायन्कैलासपर्वते कृष्णेन नीयमानमात्मानं ददर्श । 'समासाद्य तु तं शैलं शैलाग्रे समवस्थितम् । तपोनित्यं महात्मानमपश्यद्वृषभध्वजम् ॥ सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा । शूलिनं जटिलं गौरं वल्कलाजिनवाससम् ॥ नयनानां सहस्रैश्च विचित्राङ्गं महौजसम् । पार्वत्या सहितं देवं भूतसंघैश्च भास्वरैः ॥ स्तूयमानं स्तवैर्दिव्यैर्ऋषिभिर्ब्रह्मवादिभिः । गोप्तारं सर्वभूतानामिष्वासधरमच्युतम् । वासुदेवस्तुतं दृष्ट्वा जगाम शिरसा क्षितिम् । पार्थेन सह धर्मात्मा गृह्णन्ब्रह्म सनातनम् ॥ लोकादिं विश्वकर्माणमजमीशानमव्ययम् । मनसः परमं योनिं खं वायुं ज्योतिषां निधिम् ॥ स्रष्टारं वारिधा-

राणां भुवश्च प्रकृतिं पराम्। देवदानवयक्षाणां मानवानां च साधनम्॥ योगानां च परं ब्रह्म तृप्तब्रह्मविदां निधिम्। चराचरस्य स्रष्टारं प्रतिहर्तारमेव च॥ कालकोपं महात्मानं शक्रसूर्यगुणोदयम्। ववन्दे तं सदा कृष्णो वाङ्मनोबुद्धिकर्मभिः॥ यं प्रपद्यन्ति विद्वांसः सूक्ष्माध्यात्मपदैषिणः। तमजं कारणात्मानं जग्मतुः शरणं भवम्॥ अर्जुनश्चापि तं देवं भूयो भूयोऽप्यवन्दत। ज्ञात्वा तं सर्वभूतादिं भूतभव्यभवोद्भवम्॥ ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ। सुप्रसन्नमनाः शर्वः प्रोवाच प्रहसन्निव॥ स्वागतं वां नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ। किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यताम्॥ येन कार्येण संप्राप्तौ युवां तत्साधयामि किम्। ब्रियतामात्मनः श्रेयस्तत्सर्वं प्रददामि वाम्॥ ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृताञ्जली। वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती॥ भक्त्या स्तवेन दिव्येन महात्मानावनिन्दितौ। कृष्णार्जुनावूचतुः— नमो भवाय शर्वाय रुद्राय वरदाय च। पशूनां पतये नित्यमुग्राय च

कपर्दिने ॥ महादेवाय भीमाय त्र्यम्बकाय च शान्तये । ईशानाय मखघ्नाय नमोऽस्त्वन्तकघातिने ॥ कुमारगुरवे नित्यं नीलग्रीवाय वेधसे । पिनाकिने हविष्याय सत्याय विभवे सदा ॥ विलोहिताय धूम्राय व्याधायानपराजिते । नित्यं नीलशिखण्डाय शूलिने दिव्यचक्षुषे । होत्रे पोत्रे त्रिनेत्राय व्यासाय वसुरेतसे ॥ अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च । वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ॥ तप्यमानाय सलिले ब्रह्मण्यायाजिताय च । विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते । नमो नमस्ते सेव्याय भूतानां प्रभवे सदा ॥ ब्रह्मवक्त्राय शर्वाय शंकराय शिवाय च । नमोऽस्तु वाचां पतये प्रजानां पतये नमः ॥ नमो विश्वस्य पतये महतां पतये नमः । नमः सहस्रशिरसे सहस्रभुजमन्यवे ॥ सहस्रनेत्रपादाय नमोऽसंख्येयकर्मणे । नमो हिरण्यवर्णाय हिरण्यकवचाय च । भक्तानुकम्पिने नित्यं सिध्यतां नौ वरः प्रभो । संजयः— एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ॥ प्रसादयामास भवं तदा

ह्यस्त्रोपलब्धये । संजय उवाच— ततः पार्थः प्रसन्नात्मा प्राञ्जलिर्वृषभध्वजम् ॥ ददर्शोत्फुल्लनयनः समस्तं तेजसां निधिम् । तं चोपहारं स्वकृतं नैशं नैत्यकमात्मनः ॥ ददर्श त्र्यम्बकाभ्याशे वासुदेवनिवेदितम् । ततोऽभिपूज्य मनसा कृष्णं शर्वं च पाण्डवः ॥ इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शंकरम् । ततः प्रसन्नेन परमेश्वरेणामृतमयसरसि सर्वासुरनिबर्हणं सशरं धनुर्मया निहितम्, तदानीयताम्, प्रदास्यामि दिव्यमस्त्रमित्यभिहितौ कृष्णार्जुनौ, तत्सरःसमीपमागत्य सहस्रशिरोनागरूपधारिणं बाणं धनुश्च केवलनागरूपमवलोक्य, कृतशतरुद्रस्तोत्रलब्धनिजरूपं सशरं धनुरादाय देवाय निवेद्य महादेवपार्श्वे स्थितब्रह्मचारिप्रदर्शितज्यारोपमुष्टिबन्धशरमोक्षप्रकारः भवमुखावगतपाशुपतमन्त्रः तदुपदिष्टप्रकारेण स्वयमपि तथैव शरमारोप्य तस्मिन्नेव सरसि शरमोक्षणपूर्वकं धनुर्निक्षिप्य, संहृष्टरोमा दुर्धर्षः कृतं कार्यममन्यत । ववन्दतुश्च संहृष्टौ शिरोभ्यां तं महेश्वरम् । अनुज्ञातौ क्षणे तस्मिन्भवेनार्जुनकेशवौ ॥ प्राप्तौ स्वशिबिरं

वीरौ मुदा परमया युतौ। तथा भवेनानुमतौ महासुर-निघातिना' इति कृष्णार्जुनयोर्नतिस्तुत्यादिना प्रसन्नात्परमेश्वरात्पाशुपतास्त्रपाप्तिकथनेन च शिव एव उत्कृष्टः इति प्रतिपादितम्। तथा च हरिवंशे— पुत्रार्थं तप्यमानया रुक्मिण्या संप्रार्थितः श्रीकृष्णः पतगराजमारुह्य कैलासमगमत्। तत्र जपोपवासहोमादिनियमानाचरन्स्वाभिलषितप्रदानाय संप्राप्तमुमासहायं महेन्द्रादिसकलदेवगणसंस्तूयमानं भगवन्तमुमापतिमवलोक्य संजातसंतोषः प्रणम्यास्तौषीत्—'नमस्ते शितिकण्ठाय नीलग्रीवाय वेधसे। नमस्ते शोचिषे अस्तु नमस्त उपवासिने॥ नमस्ते अस्तु विदुषे नमस्ते गदिने हर। नमस्ते विश्वकर्त्रे ते वृषाय वृषरूपिणे॥ अमूर्ताय च मूर्ताय नमस्तेऽस्तु पिनाकिने। नमः कुब्जाय कक्ष्याय शिवाय शिवरूपिणे॥ नमो हिताय विप्राय नमो हरिहराय च। नम आद्याय बीजाय शुचये भस्मरूपिणे॥ हराय हरिरूपाय नमस्ते तिग्मतेजसे। भक्तप्रियाय भक्ताय भक्तानां वरदायिने॥ नमो दक्षमखघ्नाय भृगुनेत्रापहारिणे। उमापते नमस्तुभ्यं कैलासनिलयाय च॥

आदिदेवाय देवाय भवाय भवरूपिणे। नमः कपालहस्ताय मनोजमथनाय च॥ त्र्यम्बकाय नमस्तुभ्यं त्र्यक्षाय च शिवाय च। वरदाय वरेण्याय नमस्ते चन्द्रशेखर॥ नम इध्माय हविषे स्रुवाय च कुशाय च। नमस्ते शतघ्नाय नागपाशप्रियाय च॥ विरूपाय सुरूपाय भद्रयानप्रियाय च। श्मशानरतये नित्यं जपशब्दप्रियाय च। स्वरप्रियाय शर्वाय स्वराय स्वररूपिणे। भद्रप्रियाय भद्राय भद्ररूपधराय च॥ रक्ष देव जगन्नाथ लोकान्सर्वान्महाहर। त्राहि भक्तान्महादेव भक्तप्रिय सदा हर॥ ततो वृषध्वजो देवः शूली साक्षादुमापतिः। करं करेण संस्पृश्य विष्णोश्चक्रधरस्य ह॥ प्रोवाच भगवान्रुद्रः केशवं गरुडध्वजम्'। पुरा केनचित्कारणेन तपः कुर्वाणस्य मम शुश्रूषया समीपे संचरन्त्यां च पार्वत्यां मत्समाधिभीरुणा महेन्द्रेण वसन्तकोकिलमलयानिलादिपरिवारेण मत्समीपं प्रेषितं मन्मथं तपोविघातार्थमुद्धृतप्रसूनायुधं मदीयनिटिलानलज्वालयानङ्गतामापन्नमवलोक्य चतुर्मुखमुखमखभुजः प्रसादयामासुः। ततः

संजातकरुणेन मया मन्मथः प्रद्युम्ननामा तव पुत्रो भवितेति अनुगृहीत इति अभिहितवानिति कृष्णस्य स्वतपश्चर्याप्रसादितपरमेश्वरेण प्रद्युम्नाख्यपुत्रलाभप्रतिपादनेन शिव एव उत्कृष्टः विष्णुस्तद्भक्ताग्रेसरः पूजकश्च इति मन्यन्ते । एवमन्यतरोत्कर्षं वदतामन्यतरग्रन्थाप्रामाण्यं प्रसज्यते । तत्तु श्रुतिस्मृतीतिहासपुराणप्रामाण्याभ्युपगन्तृभिः आस्तिकैरङ्गीकर्तुं न शक्यते । अतः कृत्स्नप्रामाण्यमुपपादयतां परस्पराविरोधाय शिवविष्णवोः अभेदाभ्युपगममन्तरा नान्या गतिः । स चाभेदः शिवविष्णूत्कर्षप्रतिपादकत्वेन भवदुदाहृततत्तदाख्यायिकास्वेव प्रतिपादितः । तथा हि तत्रैव विष्णुपुराणे बाणासुरयुद्धे— 'कृत्तो विभिन्नमात्मानं द्रष्टुमर्हसि शंकर । योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम् ॥ अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः' इति । तथा हि हरिवंशे— 'न च युद्धं महाबाहो तव कृष्णेन रोचते । नावबुध्यसि कृष्णं त्वमात्मानं च द्विधाकृतम्' इति पितामहेनोक्तः शंकरः, 'ततः शरीरयोगेन भगवानव्ययः

प्रभुः । प्रविश्य पश्यते कृत्स्नांस्त्रीँल्लोकान्सचराचरान् ॥ आत्मानं कृष्णदेहस्थं पश्यते ह्येकयोनिजम् । ततोऽभिसृत्य कृष्णस्तु न्यस्तवादोऽभवन्मृधे ॥ ब्रह्माणं चाब्रवीद्रुद्रो न योत्स्ये भगवन्निति । ततः कृष्णोऽथ रुद्रश्च परिष्वज्य परस्परम् ॥ परां प्रीतिमुपागम्य संग्रामादथ जग्मतुः' इति । एवं द्रोणपर्वणि शतरुद्रीये व्यासं प्रति अर्जुनवचनम्— 'संग्रामे न्यहनच्छत्रूञ्शरौघैर्विमलैरहम् । अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥ ज्वलन्तं शूलमुद्यम्य यां दिशं प्रतिपद्यते । तस्यां दिशि विशीर्यन्ते शत्रवो मे महामुने ॥ तेन भग्नानरीन्सर्वान्मद्भग्नान्मन्यते जनः । तेन भग्नानि सैन्यानि पृष्ठतो ननु हन्म्यहम् । भगवंस्तन्ममाचक्ष्व को वै स पुरुषोत्तमः' । व्यासः— 'ईशानं वरदं पार्थ पृष्टवानसि शंकरम् । तं गच्छ शरणं देवं वरदं भुवनेश्वरम् ॥ एष देवो महादेवो योऽसौ पार्थ तवाग्रतः । सततं शात्रवान्निघ्नंस्त्वया दृष्टः पिनाकधृक् ॥ सिन्धुराजवधार्थाय प्रतिज्ञा यत्त्वयानघ । कृष्णेन दर्शितः स्वप्ने यस्तु शैलेन्द्र-

मूर्धनि। एष वै भगवान्देवः संग्रामे याति तेऽग्रतः। तेन दत्तानि चास्त्राणि यैस्त्वया दानवा हताः॥ गच्छ युध्यस्व कौन्तेय न तवास्ति पराजयः। यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्दनः' इति। अनेन भगवता शिवेन भारतीयानां हननं कृतम्। सव्यसाची तु निमित्तमात्रमिति व्यासेन प्रतिपादितम्। एवं गीतायां भगवद्वाक्यम्— श्री भगवानुवाच—'कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः। ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्। मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्। मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्'। अनेन भारतीयं सर्वसैन्यं श्रीकृष्णेन संहृतमिति भगवतैवोक्तम्। एवं शतरुद्रीयगीतास्थवचनाभ्यामितरनिवृत्तिपूर्वकं स्वेनैव हतमित्यवगमाच्छिवविष्ण्वोश्च भेदे वचनविरोधपरि-

हारोऽतिदुर्घटः । तस्मात्सकलश्रुतिशिरःसंमताभेदः सिद्धः । तथा द्रोणपर्वणि अर्जुनस्वप्नदर्शने 'ततः प्रीतमनाः पार्थो गन्धमाल्यैश्च माधवम् । अलंकृत्योपहारं तं नैशं तस्मै न्यवेदयत् ॥ तं चोपहारं स्वकृतं नैशं नैत्यकमात्मनः । ददर्श त्र्यम्बकाभ्याशे वासुदेवनिवेदितम्' इति वचनाभ्यां अर्जुनकृतविष्णुपूजायाः शिवशिरसि दर्शनप्रतिपादनेन तयोरभेदः सिद्धः । तत्रैव हरिवंशे रुक्मिणीपुत्रप्राप्तौ मार्कण्डेयनारदौ प्रति ब्रह्मवचनम्— हरिहरस्तोत्रम्— पितामहः— मन्दरस्य गिरेः पार्श्वे नलिन्यां भवकेशवौ । रात्रौ स्वप्नान्तरे ब्रह्मचर्यधरं हरिम् ॥ गरुडध्वजं चैव हरं हरिं च वृषभध्वजम् । विस्मयो मे महान्ब्रह्मन्दृष्ट्वा तत्परमाद्भुतम् ॥ एतदाचक्ष्व भगवन्यथातथ्येन सुव्रत । मार्कण्डेयः— शिवाय विष्णुरूपाय शिवरूपाय विष्णवे ॥ अथान्तरं न पश्यामि तेन तौ दिशतः शिवम् । अनादिमध्यनिधनमेतदक्षरमव्ययम् ॥ तदेव ते प्रवक्ष्यामि रूपं हरिहरात्मकम् । यो वै विष्णुः स वै रुद्रो यो रुद्रः स पितामहः ॥ एकमूर्तित्रयो देवा रुद्र-

विष्णुपितामहाः । वरदा लोककर्तारो लोकनाथाः स्वयंभुवः ॥ अर्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिताः । यथा जले जलं क्षिप्तं जलमेव तु तद्भवेत् ॥ रुद्रं विष्णुं प्रविष्टं तु तथा रुद्रमयोऽभवत् । अग्निरग्निं प्रविष्टस्तु अग्निरेव यथा भवेत् । तथा विष्णुं प्रविष्टस्तु रुद्रो विष्णुमयोऽभवत् ॥ रुद्रमग्निमयं विद्याद्विष्णुः सोमात्मकः स्मृतः । अग्नीषोमात्मकं चैव जगत्स्थावरजङ्गमम् ॥ कर्तारौ चापहर्तारौ स्थावरस्य चरस्य च । जगतः शुभकर्तारौ प्रभू विष्णुमहेश्वरौ ॥ कर्तृकारणकर्तारौ कर्तृकारणकारकौ । भूतभव्यभवौ देवौ नारायणमहेश्वरौ ॥ एते चैव प्रवर्षन्ति भान्ति पान्ति सृजन्ति च । एतत्परतरं गुह्यं कथितं ते पितामह ॥ यश्चैनं पठते नित्यं यश्चैनं शृणुयान्नरः । प्राप्नोति परमं स्थानं विष्णुरुद्रप्रसादजम् ॥ देवौ हरिहरौ स्तौष्ये ब्रह्मणा सह संगतौ । एतौ च परमौ देवौ जगतः प्रभवाप्ययौ ॥ रुद्रस्य प्रभवो विष्णुर्विष्णोश्च प्रभवः शिवः । एक एव द्विधा भूत्वा लोके चरति नित्यशः ॥ न विना शंकरं विष्णुर्न

विना केशवं शिवः । तस्मादेकत्वमापन्नौ रुद्रोपेन्द्रौ स्तुतौ पुरा ॥ नमो रुद्राय कृष्णाय नमः संहतचारिणे । नमः षडर्धनेत्राय सद्विनेत्राय वै नमः ॥ नमः पिङ्गलनेत्राय पद्मनेत्राय वै नमः । नमः कुमारगुरवे प्रद्युम्नगुरवे नमः ॥ नमो धरणिधाराय गङ्गाधराय वै नमः । नमो मयूरपिञ्छाय नमः केयूरधारिणे ॥ नमः कपालमालाय वनमालाय वै नमः । नमस्त्रिशूलहस्ताय चक्रहस्ताय वै नमः ॥ नमः कनकदण्डाय नमस्ते व्रतदण्डिने । नमश्चर्मवसनाय नमस्ते पीतवाससे ॥ नमोऽस्तु लक्ष्मीपतये पार्वतीपतये नमः । नमः खट्वाङ्गधाराय नमो मुसलधारिणे ॥ नमो भस्माङ्गरागाय नमः कृष्णाङ्गधारिणे । नमःश्मशानवासाय नमस्त्वाश्रमवासिने ॥ नमो वृषभवाहाय नमो गरुडवाहिने । नमोऽस्त्वनेकरूपाय बहुरूपाय वै नमः ॥ नमः प्रलयकर्त्रे च नमः सागरशायिने । नमोऽस्तु सौम्यरूपाय नमो भैरवरूपिणे ॥ विरूपाक्षाय देवाय नमः सौम्येक्षणाय च । दक्षयज्ञविनाशाय बलेर्नियमनाय च ॥ नमः पर्वतवासाय नमः सागरशायि-

ने । नमः सुरारिपुघ्नाय त्रिपुरघ्नाय वै नमः ॥ नमोऽस्तु नरकघ्नाय नमः कामाङ्कशायिने । नमस्त्वन्धकनाशाय नमः कैटभनाशिने ॥ नमः सहस्रहस्ताय नमोऽसंख्येयबाहवे । नमः सहस्रशीर्षाय बहुशीर्षाय वै नमः ॥ दामोदराय देवाय मुञ्जमेखलिने नमः । नमस्ते भगवन्विष्णो नमस्ते भगवञ्शिव ॥ नमस्ते भगवन्देव नमस्ते देवपूजित । नमस्ते सामभिर्गीत नमस्ते यजुभिः स्तुत ॥ नमस्ते सुरशत्रुघ्न नमस्ते सुरपूजित । नमस्ते कर्मिणां कर्म नमोऽस्त्वमितविक्रम ॥ हृषीकेश नमस्तेऽस्तु स्वर्णकेश नमोऽस्तु ते । इमं स्तवं तु रुद्रस्य विष्णोश्चैव महात्मनः ॥ समेत्य ऋषिभिः सर्वैः स्तुतौ तौ सुमहात्मभिः । व्यासेन वेदविदुषा नारदेन च धीमता ॥ भारद्वाजेन गार्ग्येण विश्वामित्रेण वै तदा । अगस्त्येन पुलस्त्येन धौम्येन च महात्मना । यश्चेदं पठते नित्यं स्तोत्रं हरिहरात्मकम् ॥ अरोगी बलवांश्चैव जायते नात्र संशयः । श्रियश्च लभते नित्यं न च सर्गान्निवर्तते ॥ अपुत्रो लभते पुत्रं कन्या विन्दति सत्पतिम् । गुर्विणी शृणुते

या तु वरं पुत्रं प्रसूयते ॥ राक्षसाश्च पिशाचाश्च भूतानि च विनाशकाः । भयं तत्र न कुर्वन्ति यत्रायं पठ्यते स्तवः' इति । तस्माद्भवदुदाहृतस्थले एवाभेदप्रतिपादनादभेदः सिद्ध एव । नन्वेवमुभयोरुत्कर्षापकर्षप्रतिपादकवचनानां का गतिरिति चेन्न, औपाधिकभेदमादाय तत्तत्कार्योपाधिकोत्कर्षापकर्षप्रतिपादकत्वे विरोधाभावात् । अन्यथा दाशरथिपरशुरामयोः परमार्थतः विष्णुस्वरूपेणाभिन्नयोरुत्कर्षापकर्षप्रतिपादनमनुपपन्नं स्यात्, स्वस्यैव स्वापेक्षयोत्कर्षापकर्षासंभवात् । यदि च दाशरथिपरशुरामयोः समयभेदेन तत्तत्कार्यवशात्प्रकर्षापकर्षौ परमार्थतस्त्वैक्यमेव, तदा वैकुण्ठशितिकण्ठयोरपि कार्यवशादेवोत्कर्षापकर्षौ परमार्थतस्त्वैक्यमेवेति स्वीकर्तव्यम् । अत एव शिवविष्ण्वोः भेदस्यापारमार्थिकत्वप्रतिपादनपूर्वकपरतया प्रवृत्तानि अभेदवचनानि । तथा च विष्णुपुराणे 'सृष्टिस्थित्यन्तकरिणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दनः ॥ योऽहं सत्यं जगच्चेदं सदेवासुरमानुषम् । अविद्यामोहितात्मानः पुरुषा

भिन्नदर्शिनः' इति । कालिदासोऽपि 'एकैव मूर्तिर्बिभिदे त्रिधासौ सामान्यमेषां प्रथमावरत्वम् । विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ' इति । विष्णुपुराणे— यथाह वसुधा सर्वं सत्यमेतद्विलोकसः । अहं भवो भवन्तश्च सर्वे नारायणात्मकम् ॥ विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माण एव च । कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वधः ॥ ये च मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः । ब्रह्माणं च तथा तेषां भ्रूणहत्यासमं त्वघम्' किं बहुना, प्रपञ्चजीवपरब्रह्मणां परस्परभेदनिषेधमभेदं च प्रतिपादयन्ति श्रुतिस्मृतिसूत्राणि । भेदनिषेधे श्रुतिरपि 'नान्यदतोऽस्ति द्रष्टा' 'उदरमन्तरं कुरुते अथ तस्य भयं भवति' 'नान्यदतोऽस्ति श्रोता' 'द्वितीयाद्वै भयं भवति' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' । भेदनिषेधे स्मृतिरपि— अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणका-

र्यजातम् । ईदृक्जनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्व गता भवन्ति ॥ न तदस्ति विना देव यत्ते विरहितं जगत् । यदासीद्भूर्तते यच्च यच्च भावि जगत्पते ॥ सर्वं त्वमेव देवेश विना किञ्चित्त्वया न हि । सितनीलादिभेदेन यथैकं दृश्यते नभः ॥ भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् ॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् । एकः स देवः परमः परेशः स वासुदेवो न तदन्यदस्ति ॥ एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यत् । सोऽहं समस्तं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥ अभेदे श्रुतिः— 'एक एव रुद्रो न द्वितीयाय तस्थे' 'एको देवः सर्वभूतेषु गूढ एको वशी सर्वभूतान्तरात्मा' 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' 'ब्रह्मैवेदममृतं पुरस्तात्' 'सर्वं खल्विदं ब्रह्म' 'सर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु' 'ब्रह्म वा इदमग्र आसीत्' 'एकमेव आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्। स एवेदं सर्वं ब्रह्मैवेदं सर्वम्' 'हिरण्यगर्भः

समवर्तताग्रे त्वमेकोऽसि बहूननुप्राविष्टः ऐतदात्म्यमिदं सर्वम्' 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' 'एको देवो बहुधा निविष्टः एकः सन्बहुधा विचारः' 'एक एव महानात्मा' 'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' 'एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्' 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्' 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः। सर्वेषां भूतानामन्तरतमः स आत्मेति विद्यात्' 'एकं सद्विप्रा बहुधा वदन्ति एकं सन्तं बहुधा कल्पयन्ति। एको विममे त्रिभिरित्यादिभिः एको दधार भुवनानि विश्वा' इत्यादिभिः। भूतेषु स्मृतिरपि 'यदा सर्वेषु पुमानेको

व्यवस्थितः। तदा ह्येको भवान्सोऽहमित्येतद्विफलं वचः॥ एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यत्॥ सकलमिदमहं च वासुदेवपरः पुमान्परमेश्वरः स एकः। इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात्' इति। सूत्राणि 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यादीनि। एवं श्रुतिस्मृतिसूत्रादिभिर्भेदमात्रनिषेधपूर्वकमभेदस्यैव प्रतिपादनात् कैमुतिकन्यायेन वचनैश्च शिवविष्ण्वोरभेदः सिद्धः। उत्कर्षादिप्रतिपादनं तु कार्येणाधिकमिति सर्वमवदातम्। प्रकृते 'अधिकं मेनिरे विष्णुम्' इति रामायणवचनं तु अग्रे कर्तव्यसकलराक्षसवधहेतुभूतवैष्णवधनुषः प्राशस्त्यप्रतिपादनपरं ज्ञेयम्। अयमर्थोऽग्रे स्फुटः। ततः विष्णुकृतपराभवजनितकोपेन पुनरपि समारब्धयुद्धं शितिकण्ठमवलोक्य देवाः प्रसादयामासुः। प्रसन्नेन च शितिकण्ठेन तद्धनूरत्नं निमेः षष्ठे देवराते न्यासीकृतम्। तदिदमसारं त्वया भग्नम्, युद्धात्प्रतिनिवृत्तेन विष्णुना च स्वीयं धनुः ऋचीके न्यासीकृतम्। तेन चास्मत्पितरि न्यासी-

कृतम् । न्यस्तशस्त्रं चास्मत्पितरं सहस्रभुजनिषूदितमवलोक्य, अकारणपितृवधामर्षेण त्रिः सप्तकृत्वः पृथिवीं निःक्षत्रियामकरवम् । ततः स्वभुजबलार्जितामखिलां महीं काश्यपाय महर्षये यज्ञे दक्षिणात्वेन प्रदाय महेन्द्रकृतनिकेतनोऽहं नभस्तलसंचारिदेवर्षिगणश्राव्यमानशितिकण्ठधनुर्भङ्गश्रवणसंजातविस्मयः असारधनुर्भङ्गमात्रेणानिर्णीतपराक्रमः सारतरवैष्णवधनुरारोपणेन विज्ञातभुजवीर्यस्त्वया सह द्वन्द्वयुद्धं कर्तुमागतोऽस्मि इति अकथयत् । षट्सप्ततितमे— जामदग्न्यवचनश्रवणसंजातसंरम्भः समीपवर्तिपितृगौरवेणापरिकीर्तितस्वपराक्रमो दाशरथिर्ब्राह्मणगौरवेण विश्वामित्रकृते च त्वामुपेक्ष्यावस्थितं वीर्यहीनं प्राकृतं क्षत्रियमिव मां नावमन्तुमर्हसि, पश्य मे पराक्रमम् इत्यभिधाय तत्करात्सशरं धनुरादाय सज्ये धनुषि शरमारोप्यामोघोऽयं शरः क्व वा मोक्तव्य इत्यवादीत् । ननु

ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च ।
तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम् ॥

इति वचनेन 'ब्राह्मणो न हन्तव्यः' इति जानता रामेण परशुरामवधोद्यमः कथं कृतः इति चेत्, न; केवलब्राह्मणस्यावध्यत्वेऽपि

तदहं ते बलं दृष्ट्वा धनुषोऽस्य प्रपूरणे।
द्वन्द्वयुद्धं प्रदास्यामि वीरश्लाघ्यामिदं तव॥

इति युद्धार्थं प्रवृत्तो गुरुरपि ब्राह्मणः क्षत्रधर्मं पुरस्कृत्य क्षत्रियेण हन्तव्य एव। तथा च राजधर्मे कृष्णं प्रति भीष्मः— 'पितॄन्पितामहान्पित्र्यान्गुरून्संबन्धिबान्धवान्। मिथ्याप्रवृत्तान्यः संख्ये निहन्याद्धर्म एव सः॥ समत्यागिनो लुब्धान्गुरूनपि च केशव। निहन्ति यस्तान्समरे क्षत्रियो यः स धर्मवित्' इति। तथा उद्योगपर्वणि परशुरामं प्रति भीष्मः—'उद्यतेषुमथो दृष्ट्वा ब्राह्मणं क्षत्रबन्धुवत्। यो हन्यात्समरे क्रुद्धो युध्यन्तमपलायिनम्॥ ब्रह्महत्या न तस्य स्यादिति धर्मेषु निश्चयः। क्षत्रियाणां स्थितो धर्मे क्षत्रियोऽस्मि तपोधन। यो यथा वर्तते यस्मिंस्तथा तस्मिन्प्रवर्तयन्॥ नाधर्मं समवाप्नोति न चाश्रेयश्च विन्दति। एते देवाः शरीरस्था

ब्राह्मण्यं यच्च ते महत् ॥ तपश्च सुमहत्तप्तं न तेभ्यः प्रहरास्यहम् । प्रहरे क्षत्रधर्मस्य यत्त्वं राम समास्थितः ॥ ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात्' इति । अत एव गुरुभिर्भीष्मद्रोणकृपादिभिः सह पाण्डवैर्युद्धं कृतमिति भारते प्रतिपादितम् । विस्तरभिया न लिखितम् । तस्माद्युद्धार्थमागतपरशुरामजयो न दोषायेति । ततः

तेजोऽभिहतवीर्यत्वाज्जामदग्न्यो जडीकृतः ।
रामं कमलपत्राक्षं मन्दं मन्दमुवाच ह ॥

राम, काश्यपाज्ञया भूमिभागं परित्यज्य महेन्द्रभूधरं गच्छामि त्वं च मे तपोबलार्जितालँल्लोकाञ्जहीत्यभिहिते, रामेण च तथा कृते, सकलदेवगणसंस्तूयमानमहिमानं रामभद्रं सादरं प्रदक्षिणीकुर्वन्

अक्षय्यं मधुहन्तारं जानामि त्वां सुरोत्तमम् ।
धनुषोऽस्य परामर्शात्स्वस्ति तेऽस्तु परंतप ॥

एते सुरगणाः सर्वे निरीक्षन्ते समागताः ।
त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥

न चेयं मम काकुत्स्थ व्रीडा भवितुमर्हति ।
त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥

सप्तसप्ततितमे— गतो जामदग्न्यः, चातकालिर्जलमिव त्वच्छासनमभिकाङ्क्षति चतुरङ्गिणी सेना, तदाज्ञापयतु भवानित्यवदत् । अथ दशरथोऽपि तद्वचनामृतधारया सजीवितमिव ससुतमात्मानं मन्यमानस्तं परिष्वज्य मूर्ध्नि चोपाघ्राय पताकाध्वजमालिनीं सिक्तराजपथप्रकीर्णकुसुमोत्करां स्वागमनश्रवणसंजातहर्षप्रत्युद्गतपौरजानपदसमाकीर्णराजपथामयोध्यां विवेश ॥ ततः

पुत्रैरनुगतश्रीमाञ्श्रीमद्भिश्च महायशाः ।
प्रविवेश गृहं राजा हिमवत्सदृशं पुनः ॥

ननन्द सजनो राजा गृहे कामैः सुपूजितः ।
कौसल्या च सुमित्रा च कैकेयी च सुमध्यमा ॥

वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः ।
ततः सीतां महाभागामूर्मिलां च यशस्विनीम् ॥

कुशध्वजसुते चोभे जगृहुर्नृपपत्नयः ।
मङ्गलालम्भनैश्चैव शोभिताः क्षौमवाससः ॥

देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् ।
अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥

स्वं स्वं गृहमथासाद्य कुबेरभवनोपमम् ।
गोभिर्धनैश्च धान्यैश्च तर्पयित्वा द्विजोत्तमान् ॥

रेमिरे मुदिताः सर्वा भर्तृभिः सहिता रहः ।
कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ॥

कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ।
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः ॥

अत्र 'प्रविवेश गृहं राजा' इति वचनेन पाणिग्रहणानन्तरं क्रियमाणो गृहप्रवेशः, 'मङ्गलालम्भनैश्चैव शोभिता' इति वचनेन स्त्रीकर्तृकमङ्गलानि, 'देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन्' इत्येतेन च देशकुलधर्माः, 'गोभिर्धनैश्च धान्यैश्च तर्पयित्वा द्विजोत्तमान्' इति वचनेन

वैवाहिकब्रह्मचर्यादिव्रतसमाप्त्यङ्गं ब्राह्मणसंतर्पणपूर्वकं स्वस्त्ययनवाचनम्, 'रेमिरे मुदिताः सर्वा भर्तृभिः सहिता रहः' इति वचनेन क्रमप्राप्तं संवेशनारूपं कर्म चोक्तं भवति। तथा च आश्वलायनः—"प्रयाण उपपद्यमाने 'पूषा त्वेतो नयतु हस्त गृह्य' इति यानमारोहयेत् 'अश्मन्वती-रीयते संरभध्वम्' इत्यर्धर्चेन नावमारोहयेत्। उत्तरेणोल्कमयेत् 'जीवं रुदन्ती' इति रुदत्यां विवाहाग्निमग्रतोऽजस्रं नयन्ति। कल्याणेषु देशवृक्षचतुष्पथेषु 'मा विदन्परिपन्थिन' इति जपेत् 'वासे वासे सुमङ्गलीरियं वधूरिति' ईक्षकानीक्षेत। 'इह प्रियं प्रजया ते समृध्यताम्' इति गृहं प्रवेशयेद्विवाहाग्निमुपसमाधाय पश्चादस्यानड्वहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायाम् 'आ नः प्रजां जनयतु प्रजापतिः' इति चतसृभिः प्रत्यृचं हुत्वा, 'समञ्जन्तु विश्वेदेवाः' इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये। अक्षारलवणाशिनौ ब्रह्मचारिणावधःशायिनौ स्यातामत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति चरितव्रतः

सूर्यायै वधूवस्त्रं दद्यादन्नं ब्राह्मणेभ्योऽथ स्वस्त्ययनं वाचयीत" अत्र ब्रह्मचारिणावधःशायिनौ स्यातामिति व्रतसमाप्तिपर्यन्तं ब्रह्मचर्यकथनात्। 'यत्तु समानं तद्वक्ष्यामः' इति सूत्रव्याख्यानावसरे विवाहे विदेहेषु सद्य एव व्यवायो दृष्टः। त्रिरात्रमिति गृह्ये ब्रह्मचर्यं विहितम्। अत्र गृह्योक्तमेव कार्यम्। न सद्यो व्यवाय इति वृत्तिकृद्वाक्याच्च त्रिरात्रानन्तरमेव संवेशनाख्यं कर्म कर्तव्यमित्युक्तं भवतीति। अथ खलु 'उच्चावचजनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात्' इति। बोधायनोऽपि– "अनुनयन्त्येतमग्निम्, अथैनां पितुरङ्कादुद्वहति गुरोर्वा 'ये वध्वः' इति। अथैनां दक्षिणे हस्ते गृहीत्वा स्वरथमारोप्य स्वान्गृहानानयति 'पूषा त्वेतो नयतु' इति। पन्थानमनुमन्त्रयते 'सुगं पन्थानम्' इति। अथ ओषधिवनस्पतयो नद्यो वनान्यनुमन्त्रयते 'या ओषधयः' इति। अथ जायामानीय स्वान्गृहान्प्रपादयति 'भद्रान्गृहान्' इति। अथैनामानड्वहे चर्मण्युपवेशयति 'इह गावः' इति। अत्राभ्याममात्या बीजान्यारोपयन्ते। अथ वाचं यच्छत आ नक्षत्राणामुदयात्।

अथाहोरात्रयोः संधिमनुमन्त्रयते 'नीललोहिते भवतः' इति। अथोदितेषु नक्षत्रेषूपनिष्क्रम्य ध्रुवमरुन्धतीं च दर्शयति 'ध्रुवोऽसि' इति ध्रुवम् 'सप्तर्षयः' इत्यरुन्धतीमिति। अथ स्थालीपाकं श्रपयत्या धेनुवरप्रदानात्। अथाज्यशेषेण हिरण्यमन्तर्धाय मूर्ध्नि संस्रावं जुहोति व्यस्तसमस्तव्याहृतिभिः। अथैनां प्रदक्षिणमग्निं पर्याणयति 'अर्यम्णो अग्निम्' इति। अथ संवेशनम्, 'अथ श्रीमन्तमागारं संमृष्टोपलिप्तं गन्धवन्तं पुष्पवन्तं धूपवन्तं दीपवन्तं तल्पवन्तं साधिवासं दिक्षु सर्पिः सूत्रेन्धनप्रद्योतितम् उदकुम्भादर्शोच्छिरसं प्रपाद्य तस्मिन्नेनां संवेश्य तस्या अन्तिके जपति 'उदीर्ष्वातः' इति। अथैनामुपसंवेशयति 'प्रजापतिः स्त्रियाम्' इति। अथास्याः स्तोकोर्तिं विवृणोति 'प्रजायै त्वा' इति। सा यद्यश्रु कुर्यात् तामनुमन्त्रयते 'जीवां रुदन्ती' इति। ब्राह्मणेन ब्राह्मण्यामुत्पन्न प्रागुपनयनाज्जात इत्यभिधीयते उपनीतमात्रो व्रतचारी वेदानां किंचिदधीत्य ब्राह्मण एकां शाखामधीत्य श्रोत्रियो भवति अङ्गाध्याय्यनूचानः कल्पाध्यायी ऋषिकल्पः सूत्रप्रवचनाध्यायी भ्रूणः

चतुर्वेदादृषिः अत ऊर्ध्वं देवः । यदि कामयेत श्रोत्रियं जनयेयमित्यरुन्धत्युपस्थानान्तं कृत्वा त्रिरात्रमक्षारलवणाशिनावधःशायिनौ ब्रह्मचारिणावासाते अहतानां च वाससां परिधानं सायंप्रातश्चालङ्करणम् । इषुप्रतोदयोश्च धारणम् । अग्निपरिचर्या च । चतुर्थ्यां पक्कहोम उपसंवेशनं च । अथ यदि कामयेतानूचानं जनयेयमिति द्वादशरात्रमेतद्व्रतं चरेत् । व्रतान्ते पक्कहोम उपसंवेशनं च । अथ यदि कामयेत ऋषिकल्पं जनयेयमिति मासमेतद्व्रतं चरेत् । व्रतान्ते पक्कहोम उपसंवेशनं च । अथ यदि कामयेत भ्रूणं जनयेयमिति चतुरो मासानेतद्व्रतं चरेद्व्रतान्ते पक्कहोम उपसंवेशनं च । अथ यदि कामयेत ऋषिं जनयेयमिति षण्मासानेतद्व्रतं चरेत् । व्रतान्ते पक्कहोम उपसंवेशनं च । अथ यदि कामयेत देवं जनयेयमिति संवत्सरमेतद्व्रतं चरेद्व्रतान्ते पक्कहोम उपसंवेशनं च । अथ यदा मलवद्वासाः स्यात् इत्यादिना 'सर्वाण्युपगमनानि मन्त्रवन्ति भवन्तीति बोधायनः । 'यज्ञादौ यज्ञार्तावितिं शालीकिः' इत्यन्तेन गृहप्रवेशान-

न्तरकर्तव्यसंवेशनप्रसङ्गादतुसंवेशनमुक्त्वा, गृहप्रवेशात्पञ्चमेऽहनि मत्स्यबलिं वदति— 'अथाभ्यां पञ्चमेऽहनि नापितकर्म कुर्वन्ति। नापिताय पयोदनं दत्त्वा ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य यत्रैकमुदुम्बरमूलं पश्यन्ति, तं प्रदक्षिणं परिसमूह्य प्रदक्षिणं गन्धैरनुलिम्पन् जपति 'यथा त्वं वनस्पते' इति। सुमनोभिः प्रच्छादयति 'यथा त्वं वनस्पते' इति। अत्रैव त्रिवृतान्नेन बलिमुपहरति, मन्त्रं चोदाहरन्ति— 'ऊर्जस्वान्पयस्वान्' इति। अन्नं संस्कृत्य ब्राह्मणान्संपूज्याशिषो वाचयित्वा, जानुदघ्नमुदकमवतीर्य प्राचीनदशेनाहतेन वाससा मत्स्यान्गृह्णीतो ब्रह्मचारिणं पृच्छतः, 'ब्रह्मचारिन्किं पश्यसि' इति। स पृष्टः प्रतिब्रूयात् 'पुत्रांश्च पशूंश्च' इति। अथैनान्मत्स्यानुदुम्बरमूले बकानां बलिमुपाहरति 'दीर्घायुत्वाय वर्चसे' इति। अत्रैव निर्माल्यानि परिभुक्तानि वासांसि प्रतिसरांश्च प्रतिमुच्य उदुम्बरशाखायां संसृजति। अथावगाह्यान्योन्यस्य पृष्ठे धावयित्वा उदकान्तं प्रति यौति 'प्रतियुतो वरुणस्य पाशः' इति। अन्योन्य-

मलंकृत्य रक्तानि वासांसि परिधायाहतेन वाससा वेति । यानेन पद्भ्यां वा गृहं गत्वा प्रक्षालितपाणिपादौ अप आचम्य वाग्यतौ शयनमारभेते । श्वोभूते वैश्वदेवेन प्रतिपद्यते । मासिश्राद्धे न चापरपक्षे" इति । आपस्तम्बोऽपि 'तां ततः प्रवाहयेत् प्रवाहारयेत्' इत्यादि 'गृहानुत्तरया संकाशयति' 'गृहान्प्रपादयन्नुत्तरां वाचयति दक्षिणेन पदा' 'न च देहलीमधितिष्ठति' 'उत्तरपूर्वदेशेऽगारस्याग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं च कृत्वा, उत्तरया चर्मण्युपविशतः उत्तरो वरः' 'अथास्याः पुँस्वोर्जीवपुत्रायाः पुत्रमङ्क उत्तरयोपवेश्य तस्मै फलान्युत्तरेण यजुषा प्रदाय उत्तरे जपित्वा वाचं यच्छत आ नक्षत्रेभ्यः' 'उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य उत्तराभ्यां यथालिङ्गं ध्रुवमरुन्धतीं च दर्शयति' इत्यादि । 'तं चतुर्थ्यांपररात्र इत्युपक्रम्य जयादि प्रतिपद्यते । परिषेचनान्तं कृत्वा उत्तरास्तिस्रो जपित्वा शेषं समावेशने जपेत्' इति। शेषम् अनुवाकशेषम्—आरो-

होरुमित्येवमादि । समावेशने समावेशनकाले जपेत् । समावेशनं च तस्मिन्नेवापररात्रे नियमेन भवति । इदमेव समावेशनं मन्त्रवन्नान्यानि । परिषेचनान्तवचनमानन्तर्यार्थम् । परिषेचनान्ते एतदेव कर्म यथा स्यात् तेन भोजनं प्रागेव भवतीत्यनाकुलायाम् । अथात्र श्रीमन्तमित्यादिना स्तोकोर्तिं विवृणोतीत्यन्तेन, चतुर्थ्यां पक्कहोम उपसंवेशनं चेत्यनेन व्रतान्ते पक्कहोम उपसंवेशनं चेत्येवंरूपैर्वचनैश्च, अथाभ्यां पञ्चमेऽह्नीत्यारभ्य वाग्यतौ शयनमारभेते इत्यन्तेन प्रसिद्धमुपसंवेशनमिति । सूत्रेण प्रवेशहोमानन्तरसंवेशनमनूद्य श्वोभूत इत्यारभ्य अथास्तमितादित्येऽन्योन्यमलंकृत्य उपरि शय्यायां शयाते । वधूमभिमन्त्रयते सुमङ्गलीरियं वधूरिति । अथैनां सर्वसुरभिगन्धमाल्यानक्तीति परिभाषासूत्रेण सर्वाण्युपगमनानि मन्त्रवन्ति भवन्तीति बोधायनो यद्वादौ यद्वर्तावितिं शालीकिरित्यनेन च, त्रिरात्रमुभयोरधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं चेत्यापस्तम्बसूत्रे, यदि कामयेत श्रोत्रियं जनयेयमित्युपक्रम्य ब्रह्मचारिणावधःशायिनौ स्याता-

मिति बोधायनसूत्रे, 'अत ऊर्ध्वमक्षारलवणाशिनौ ब्रह्मचारिणावधःशायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैकऋषिर्जायते' इत्याश्वलायनसूत्रे च त्रिरात्रादिकालविशेष एव स्त्र्युपगमनाभावरूपब्रह्मचर्यप्रतिपादनेन साक्षात्संवेशनप्रतिपादकैः चतुर्थ्यां पक्वहोमसंवेशनं चेत्यादिवचनैश्च ऋतुकालात्प्राक् संवेशनानि सिद्धानि । तथा ऋतौ च संनिपातोदारेणानुव्रतमिति । अस्यार्थः रजोदर्शनादारभ्य षोडशाहोरात्रा ऋतुस्तत्र संनिपातः संप्रयोगोऽक्षरेण सह कर्तव्यः । छान्दसमेकवचनम् । शास्त्रीयो नियमः । स च आद्याश्चतस्रो वर्ज्याः एकादशी त्रयोदशी च शेषा दश ग्राह्या इत्येवमादिरूपः । अनुव्रतं तदनुरोधेन, आपस्तम्बोक्तिस्तु 'नियमः चतुर्थीप्रभृति षोडशीमुत्तरामुत्तरां युग्मां प्रजा निश्रेयसमृतुगमन इत्युपदिशन्ति' इति । तत्र च उत्तरामुत्तरामिति वचनात् षोडश्यां रात्रौ मद्यादियोगाभावे गच्छतः उत्कृष्टः पुत्रो भवति चतुर्थ्यामत्रमः । एवं पञ्चदश्यामुत्कृष्टा कन्या । पञ्चम्यामधमा । एवं मध्ये कल्प्यम् । षोडशस्वेव रात्रिषु गमनं गर्भहेतुः ।

तत्रापि प्रथमं तथान्तरालेऽपि दार एव अन्तरालं मध्यम् ऋतोरन्तराले मध्येऽपि संनिपातः स्वादार एव कामे सति ब्राह्मणवचनाच्च संवेशनम्। यदिदमनन्तरोक्तं संवेशनं तत्र ब्राह्मणवचनं प्रमाणम् 'काममाविजनितोः संभवाम' इति। आविजनितोः पुत्रोत्पत्तिपर्यन्तं यथेच्छं संगच्छेमहि इत्यर्थः। एवमुक्तानि सर्वाण्यपि संवेशनानि दिवा न कर्तव्यानि। तथा चाथर्वणी श्रुतिः— 'प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्वा संयुज्यन्ते' इति। आपस्तम्बोऽपि—'अहन्यसंवेशनम्' इति। एवं चोदाहृतवचनैर्विवाहप्रभृति आर्तवात्पुरस्ताद्दतावन्तराले गर्भकाले च संवेशनानि रात्रौ कर्तव्यानीति स्थितम्। तत्र विशेषमाह आपस्तम्बः— 'सदा निशायां दारं प्रत्यलंकुर्वीत' इति। तथा स्त्रीवाससैव संनिपातः स्याद्यावत्संनिपातं च सहशय्या ततो नानोदकस्पर्शनमपि वा लेपान्प्रक्षाल्याचम्य प्रोक्षणमङ्गानाम्नि' इति। नन्विदमसंगतम्। 'प्राग्रजोदर्शनात्पत्नीं मोहाद्गत्वा पतत्यधः। व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयात्' इति

रजोदर्शनप्राग्भाविसंभोगस्य शुक्लवैयर्थ्यप्रयुक्तब्रह्महत्याल-क्षणपातित्यापादकत्वप्रतिपादकवचनविरोधादिति चेन्न । 'काममाविजानितोः संभवाम' इति । तस्मादृत्विया: स्त्रियः प्रजां विन्दन्ते काममाविजनतोः संभवन्तीति गर्भधारणप्रभृत्याप्रसवं संभोगप्रतिपादकश्रुत्या विरो-धात् । विरोधे त्वनपेक्षं स्यात् । विप्रतिषेधे श्रुतिलक्षणं बलीय इति जैमिन्यापस्तम्बसूत्राभ्यां सापेक्षश्रुतेर्निरपेक्ष-श्रुत्या बाधात् । आपस्तम्बसूत्रे यदा मलवद्वासाः स्यादित्या-दिना सप्रकारम् ऋतुसमावेशनमभिधाय एतदेव ऋतुगम-नम्, ऋतौ च संनिपात इत्यनेनानूद्य अन्तरालेऽपि दार एवेत्यनेन ऋत्वोरन्तरालेऽपि गमनमभिधाय तत्र गर्भधार-णप्रभृत्याप्रसवं संवेशनस्य प्रतिपादितत्वात् । तस्मादृत्वि-यास्त्रियः प्रजां विन्दते काममाविजनितोः संभवन्तीति श्रुतिं ब्राह्मणवचनाच्च संवेशनमित्यनेन सूत्रेण अनृतुकाल-गमनत्वाविशेषेण हेतुना प्रमाणत्वेनोदाहरता आचार्येण तेनैव हेतुना आर्तवात्पूर्वमभिसंवेशने इयमेव श्रुतिः प्रमाण-मित्युक्तं भवति । अत एव उक्तं गृहप्रवेशनप्रभृति त्रिरात्रब्र-

ब्रह्मचर्यप्रतिपादनपूर्वकं चतुर्थदिने संवेशनम्। तथा 'ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम्' इति गौतमवचनेन 'ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा। पर्ववर्जं व्रजेच्चैनां तद्दतो रतिकाम्यया' इति। भार्याप्रार्थनया अनृतावपि गमनप्रतिपादकमनुवचनेन, 'यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्' इति काममाविजनितोरिति श्रुतिसिद्धयथेष्टगमनप्रतिपादकयाज्ञवल्क्यवचनेन, ऋतुकालाभिगमनं पुंसा कार्यं प्रयत्नतः। 'सदैवापर्ववर्जं स्त्रीणां मतं हि तत्' इति बृहस्पतिवचनेन, अथ ऊर्ध्वं ब्रह्मचर्यमित्युपक्रम्य स्वदार इत्येकं मन्त्रवत्प्रयोग इत्येकमृतावित्यपरमथाधिब्रह्मचर्ये विवाहे त्रिरात्रमृतौ त्रिरात्रममावास्यायां पौर्णमास्यां श्राद्धं दत्त्वा च भुक्त्वा चैकरात्रं परस्त्रीषु यावज्जीवमग्न्याधेये द्वादशरात्रमाप्रयणेष्टिपशुबन्धानामुपवसथेष्वेकरात्रमेवमेव, सर्वेषु वेदकर्मसु चातुर्मास्येषु संवत्सरं यथाप्रयोगमन्येषु यज्ञक्रतुषु अन्यत्रतोर्दीर्घसत्रेषु धर्मव्रतेषु च तदेतद्वन्यमिति उक्तकालवर्जामितरकाले स्त्रीगमनस्य ब्रह्मचर्यत्वप्रतिपादकबोधायनपरिभाषासूत्रेण च अनृतु-

कालेऽपि स्त्युपगमनाङ्गीकारेण सुखार्थं शुक्लविमोकस्या-दोषत्वावगमनेन एकस्य वचनस्य बहुस्मृतिविरोधे विप्रति-षिद्धधर्मसमवाये भूयसां स्यात् स्वधर्मत्वमिति न्यायेन बहुभिरेकस्य बाधोऽभ्युपगन्तव्य इत्यप्रमाणमेव निषेधव-चनम्। ननु विरोधे सति अप्रामाण्यं स्यात्। स एव नास्ति। आर्तवानन्तरं विवाहाङ्गीकारेण उभयोरविरो-धेन प्रामाण्यसंभवात्। कुन्तीसत्यवत्योः पुत्रोत्पत्त्यनन्त-रमपि विवाहदर्शनेन आर्तवानन्तरविवाहस्य कैमुतिक-न्यायसिद्धत्वात् इति चेत्तदुच्यते। रजोदर्शनात्पूर्वमेव स्मृतिषु विवाहस्य विहिततया रजोदर्शनानन्तरं विवाहस्य कन्यादानस्य च निन्दिततया च ऋत्वनन्तरं कन्यादान-विवाहयोग्यत्वं वक्तुमशक्यत्वात्। तथा च बृहस्पतिः— 'गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत्। कन्यां ददद्ब्र-ह्मलोकं रौरवं तु रजस्वलाम्'। संवर्तोऽपि— अष्टवर्षा भवेत्कन्या नववर्षा तु रोहिणी। दशवर्षा भवेद्गौरी अत ऊर्ध्वं रजस्वला' विवाहस्त्वष्टवर्षायाः कन्यायास्तु प्रश-स्यते 'प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति।

मासि मासि रजस्तस्याः पिता पिबति शोणितम् ॥
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च । त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् । यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः ॥ असंभाष्यस्त्वपाङ्क्तेयः स विप्रो वृषलीपतिः' इति । इत्येवमादिभिर्बहुभिः स्मृतिभिः रजोदर्शनानन्तरं विवाहकन्याप्रदानयोर्निन्दितत्वेन रजोदर्शनानन्तरकालीनविवाहस्यात्यन्तनिन्दिततत्वात् । कुन्तीसत्यवत्योस्तु अधर्म्योऽपि पुत्रोत्पत्त्यनन्तरो विवाहः दोषाभावस्य कन्यकात्वस्य चानुग्रहेण तेजोविशेषेण च प्रत्यवायाधायको न भवति । इतरेषां तु प्रत्यवायकर एव । तथा चापस्तम्बः— 'दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषां तेषां तेजोविशेषेण प्रत्यवायो न विद्यते, तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरः' इति । तस्मात्प्राग्रजोदर्शनादिति वचनमादरणीयमेव । यद्वा चातुर्मास्यान्तरालकाले— 'न मांसमश्नाति न स्त्रियमुपैति ऋत्वेवाजायां नोपरियास्ते' इत्यापस्तम्बसूत्रेण चातुर्मास्यव्रतान्युपेयान्मधुमांसलवणस्त्र्यवलेखनानि च व-

र्जयेत् । ऋतौ भार्यामुपेयादित्याश्वलायनसूत्रेण, ऋतुकाल एव गमनस्याभ्युपगतत्वात् । अनृतुकाले गमनस्य प्रतिषिद्धत्वाच्च, चातुर्मास्ययाजिनः अन्तरालकाले अनृतौ गमनप्रतिषेधकतया प्रामाण्यं समर्थनीयम् । युक्तं चैतत् । मोहादिति विशेषणेन निषेधपरामर्शनप्रतिपादनात्, पत्नीशब्देन यज्ञसंयोगस्य विशेषणत्वावगमाच्चेति । ननु 'प्राग्जोदर्शनात्' इति वचनेन प्रथमरजोदर्शनात्पूर्वं समावेशनं प्रतिषिध्यते । आधानं तु जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति वचनेन, पुत्रोत्पत्त्यनन्तरं विहितम् । एवं सति कः प्रसङ्गः प्राग्रजोदर्शनाच्चातुर्मास्यान्तरालव्रतानामिति चेन्न । विवाहसमाप्तौ अत्राग्न्याधेयस्य कालः जायामवाप्य दशमेऽहन्यग्निमादधीत इति बोधायनवचनेन, विवाहानन्तरं दशमदिन एव अग्न्याधेयस्य विहितत्वात् । अग्न्याधेयप्रभृत्यथेमान्यज्ञस्राणि भवन्ति । यथैतदग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणमुदगयनदक्षिणायनयोः पशुश्चातुर्मास्यानि ऋतुमुखे षड्होता वसन्ते ज्योतिष्टोम इत्येवं क्षेमप्रापणमिति वचनेन च चातुर्मास्यानामपि

विहितत्वात् आर्तवात्पूर्वं चातुर्मास्यानामस्त्येव प्रसङ्गः। एवमन्यान्यप्येवंजातीयकानि– आर्तवात्पूर्वं गमनप्रतिषेधकानि वचनानि नियमयुक्तगृहस्थपरतया यथायोग्यं योजनीयानि। तस्मात् 'रेमिरे मुदिताः सर्वाः भर्तृभिः सहिता रहः' इति वचनेन विवाहसमनन्तरमेव यत्संवेशनं भगवता वाल्मीकिना उक्तं तत्सर्वं शास्त्रसंमतमेव इति सिद्धम्। यदुक्तं स्त्रीकर्तृकमङ्गलानीति तत्रापस्तम्बः– तथा 'मङ्गलान्यवृतश्च आ स्त्रीभ्यः प्रतीयेरन्' इति 'स्त्रीभ्यः सर्ववर्णेभ्यो धर्मशेषान्प्रतीयात्' इति च 'एतेन देशकुलधर्मा व्याख्याताः' इति च। आश्वलायनोऽपि– 'ब्राह्मण्यश्च वृषाजीवपत्न्यो जीवप्रजा यद्यदुपदिशेयुस्तत्तत्कुर्युः' इति। कालिदासोऽपि 'प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता' इति। कुलधर्मस्यावश्यकतामाह भगवान्गीतायाम् 'उच्छिन्नकुलधर्माणां मनुष्याणां जनार्दन। नरके नियतं वासो भवतीत्यनुशुश्रुमः' इति। आदिपर्वण्यपि भीष्मं प्रति शल्यवचनम्— 'पूर्वं प्रवर्तितं किंचित्कुलेऽस्मिन्नृपसत्तमैः। साधु वा यदि वासाधु तन्नातिक्रान्तमु-

त्सहे ॥ व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः । न च युक्तं तथा वक्तुं भवान्देहीति सत्तम ॥ कुलधर्मः स नो वीर प्रमाणं परमं च तत् । तं भीष्मः प्रत्युवाचेदं मद्रवाराजं महामतिः ॥ धर्म एष परो राजन् स्वयमुक्तः स्वयंभुवा । नात्र कश्चन दोषोऽस्ति पूर्वैर्विधिरयं कृतः ॥ विदितेऽयं च ते शल्य मर्यादा साधुसंमता' । ततः शल्यः भीष्मप्रदत्तं बहुविधं धनं प्रगृह्य स्वसारं दत्तवानिति । रत्नमालायां विवाहप्रकरणेऽपि— 'न शास्त्रदृष्ट्या विदुषा कथंचिद्विलङ्घनीयाः कुलदेशेषु धर्माः । मूलं हि तेषूच्यते वेदशाखाभूयानधर्मस्थितिभङ्गदोषात्' । एवं च पाणिग्रहणगृहप्रवेशलाजाहुतिमङ्गलदेशकुलधर्मसंवेशनाद्यङ्गयुक्तो विवाहः प्रतिपादितः । ततो दशरथभरताह्वानाय समागतं चिरकालोषितं युधाजितमवलोक्य चतुरङ्गबलपरिवृतं सशत्रुघ्नं भरतं मातुलकुलं प्रापयामास ।

गतेषु भरते रामो लक्ष्मणश्च महाबलः ।
पितरं देवसंकाशं तोषयामासतुस्तदा ॥

एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ।
रामस्य शीलवृत्तेन सर्वे विषयवासिनः ॥

प्रिया तु सीता रामस्य दाराः पितृकृता इति ।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो व्यवर्धत ॥

'ततः उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह । निनीषुः कालमुत्कर्षमवमानवमांस्त्यजेत् ' इति मनुना उत्तमकुल-विवाहेन कुलोत्कर्षकथनात् सर्वैरपि स्वस्वकुलोत्कर्षाय उत्तमकुले विवाहः कर्तव्य इति सूचयन्, प्रकृते राजर्षि-सुतः उत्तमराजकन्ययेति च विशेषणद्वयेन वधूवरयोः उत्तमकुलोत्पन्नयोर्विवाहं निगमयति ।

तया स राजर्षिसुतोऽभिरामया
समेयिवान् उत्तमराजकन्यया ।
अतीव रामः शुशुभेऽतिकामया
विभुश्रिया विष्णुरिवामरेश्वरः ॥

———*———

ये धर्मैकनिसर्गसिद्धरुचयो ये वेदवेद्ये परे
पुंसि ब्रह्मणि मैथिलीसहचरे भक्ता रघूणां वरे ।
ये वा कौतुकिनो रघूद्वहकथाशैलीसमाकर्णने
ये वा मर्मविदस्त एतदुररीकुर्वन्तु तैस्तैर्गुणैः ॥

प्रतिदिनमपि श्रीयज्ञेशप्रसादसुपेक्षा
गुरुपरकृपाधाम्ना श्रीमन्त्रियम्बकयज्वना ।
प्रथमरचिते काण्डे रामायणस्य महर्षिणा
प्रकटितमिदं धर्मांकूतं यथामति गृह्यताम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये
चतुर्विंशत्साहस्रिकायां संहितायां
बालकाण्डः समाप्तः ॥

